[1]महुलित्तखग्गसरिसं दुविहं पुण होइ वेयणीयं तु ।
सायासायविभिण्णं सुहदुक्खं देइ जीवस्स ॥ ३३४ ॥

मधुलिप्तखड्गसदृशं द्विविधं पुनः भवति वेदनीयं तु ।
सातासातविभिन्नं सुखदुःखं ददाति जीवाय ॥

आऊ चउप्पयारं सुरणारयमणुयतिरियगईबद्धं ।
हडिखित्तपुरिसतुल्लं जीवे भवधारणसमत्थं ॥ ३३५ ॥

आयुः चतुष्प्रकारं सुरनारकमनुष्यतिर्यग्गतिबद्धं ।
हलिक्षिप्तपुरुषतुल्यं जीवे भवधारणसमर्थं ॥

---

१ कुइवा ख. ।

**चित्तपडं व विचित्तं णाणाणामेहिं[1] वत्तणं णामं ।**
**तेणवइ संखगुणियं गइजाइसरीरआईहिं ॥ ३३६ ॥**

चित्रपटवत् विचित्रं नानानामभिः वर्तनं नाम ।
त्रिनवतिः संख्यगुणितं गतिजातिशरीरादिभिः ॥

**गोदं कुलालसरिसं णिच्चुच्चकुलेसु पायणे दच्छं ।**
**घडरंजणाइकरणे कुंभयंकारो[2] जहा णिउणो ॥ ३३७ ॥**

गोत्रं कुलालसदृशं नीचोच्चकुलेषु प्रापणे दक्षं ।
घटरञ्जनादिकरणे कुंभकारो यथा निपुणः ॥

**जह भंडयारिपुरिसो धणं णिवारेइ राइणा दिण्णं ।**
**तह अंतरायकम्मं णिवारणं कुणइ लद्धीणं ॥ ३३८ ॥**

यथा भाण्डागारिपुरुषः धनं निवारयति राज्ञा दत्तं ।
तथान्तरायकर्म निवारणं करोति लब्धीनां ॥

**तं पंचभेयउत्तं दाणे लाहे य भोइ उवभोए ।**
**तह वीरिएण भणियं अंतरायं जिणिंदेहिं ॥ ३३९ ॥**

तत्पंचभेदयुक्तं दाने लाभे च भोगे उपभोगे ।
तथा वीर्येण भणितं अन्तरायं जिनेन्द्रैः ॥

**एसो पयडीबंधो अणुभागो होइ तस्स सत्तीए ।**
**अणुभवणं जं तीवे[3] तिव्वं मंदे[4] मंदाणुरूवेण ॥ ३४० ॥**

---

१ ण ख. । २ कुंभयारो ख. । ३ जीवे ख। ४ मंदे इति पाठः उभयपुस्तके नास्ति ।

एषः प्रकृतिबन्धोऽनुभागो भवति तस्य शक्त्याः ।
अनुभवनं यत्तीव्रे तीव्रं मन्दे मन्दानुरूपेण ॥

प्रकृत्यनुभागबन्धौ ।

---

**तिण्हं खलु पढमाणं उक्कस्सं अंतराइयस्सेव ।**
**तीसं कोडाकोडीसायारणामाणमेव ठिदी ॥ ३४१ ॥**

तिसृणां खलु प्रथमानामुत्कृष्टमन्तरायस्य च ।
त्रिंशत्कोटाकोटिसागरनाम्नामेव स्थितिः ॥

**मोहस्स सत्तरी खलु वीसं पुण होइ णामगोत्तस्स ।**
**तेत्तीससागराणं उवमाओ आउसस्सेय ॥ ३४२ ॥**

मोहस्य सप्ततिः खलु विंशतिः पुनर्भवति नामगोत्रयोः ।
त्रयस्त्रिंशत्सागराणां उपमा आयुष एव ॥

उत्कृष्टम् ।

---

**वारसय वेयणीए णामागोदे य अट्ठ य मुहुत्ता ।**
**भिण्णमुहुत्तं तु ठिदि सेसाणं सा वि पंचण्हं ॥ ३४३ ॥**

द्वादश वेदनीये नामगोत्रयोश्च अष्टौ मुहूर्ताः ।
भिन्नमुहूर्तस्तु स्थितिः शेषाणां सापि पंचानां ॥

जघन्या, इति स्थितिबन्धः ।

---

१ प्रकृतिबन्ध इत्येव पाठः पुस्तके ।

पुव्वकयकम्मसडणं णिज्जरा सा पुणो हवे दुविहा।
पढमा विवायजाया विदिया अविवायजाया य ॥ ३४४ ॥

पूर्वकृतकर्मसटनं निर्जरा सा पुनः भवति द्विविधा।
प्रथमा विपाकजाता द्वितीया अविपाकजाता च ॥

कालेण उवाएण य पच्चंति जहा वणस्सुईफलाइं।
तह कालेण तवेण य पच्चंति कयाइं कम्माइं ॥ ३४५ ॥

कालेनोपायेन च पचन्ति यथा वनस्पतिफलानि।
तथा कालेन तपसा च पचन्ति कृतानि कर्माणि ॥

निर्जरा।

---

णिस्सेस कम्ममुक्खो सो मुक्खो जिणवरेहिं पण्णत्तो।
रायद्दोसाभावे सहावथक्कस्स जीवस्स ॥ ३४६ ॥

निःशेषकर्ममोक्षः स मोक्षः जिनवरैः प्रज्ञप्तः।
रागद्वेषाभावे स्वभावस्थितस्य जीवस्य ॥

सो पुण दुविहो भणिओ एक्कदेसो य सव्वमोक्खो य।
देसो चउघाइखए सव्वो णिस्सेसणासम्मि ॥ ३४७ ॥

स पुनः द्विविधो भणित एकदेशश्च सर्वमोक्षश्च।
देशः चतुर्घातिक्षये सर्वः निःशेषनाशे ॥

मोक्षः।

---

एए सत्तपयारा जिणदिट्ठा भासिया मए तच्चा।
सद्दहइ जो हु जीवो सम्मादिट्ठी हवे सो हु ॥ ३४८ ॥

एतानि सप्तप्रकाराणि जिनदृष्टानि भाषितानि मया तत्वानि ।
श्रद्दधाति यस्तु जीवः सम्यग्दृष्टिः भवेत् स तु ॥

**अविरियसम्मादिट्ठी एसो उत्तो मया समासेण ।**
**एत्तो उड्ढं वोच्छं समासदो देसविरदो य ॥ ३४९ ॥**

अविरतसम्यग्दृष्टिः एष उक्तः मया समासेन ।
इत ऊर्ध्वं वक्ष्ये समासतो देशविरतं च ॥

इत्यविरतगुणस्थानं चतुर्थं ।

---

**पंचमयं गुणठाणं विरयाविरउत्ति णामयं भणियं ।**
**तत्थ वि खयउवसमिओ खाइओ उवसमो चेव ॥ ३५० ॥**

पंचमकं गुणस्थानं विरताविरत इति नामकं भणितं ।
तत्रापि क्षायोपशमिकः क्षायिकः औपशमिकश्च ॥

**जो तसवहाउविरओ णो विरओ तह य थावरवहाओ ।**
**एक्कसमयम्मि जीवो विरयाविरउत्ति जिणु कहई ॥३५१॥**

यस्त्रसवधाद्विरतो नो विरतस्तथा च स्थावरवधात् ।
एकसमये जीवो विरताविरत इति जिनः कथयति ॥

**इलयाइथावराणं अत्थि पवित्तित्ति विरइ इयराणं ।**
**मूलगुणट्ठपउत्तो बारहवयभूसिओ हु देसजई ॥ ३५२ ॥**

इलादिस्थावराणामस्ति प्रवृत्तिरिति विरतिरितरेषां ।
मूलगुणाष्टप्रयुक्तो द्वादशव्रतभूषितो हि देशयतिः ॥

**हिंसाविरई सच्चं अदत्तपरिवज्जणं च थूलवयं ।**
**परमहिलापरिहारो परिमाणं परिग्गहस्सेव ॥ ३५३ ॥**

हिंसाविरतिः सत्यं अदत्तपरिवर्जनं च स्थूलव्रतं ।
परमहिलापरिहारः परिमाणं परिग्रहस्यैव ॥

**दिसिविदिसिपच्चक्खाणं अणत्थदंडाण होइ परिहारो ।**
**भोओपभोयसंखा एए हु गुणव्वया तिण्णि ॥ ३५४ ॥**

दिग्विदिक्प्रत्याख्यानं अनर्थदण्डानां भवति परिहारः ।
भोगोपभोगसंख्या एतानि हि गुणव्रतानि त्रीणि ॥

**देवे थुवइ तियाले पव्वे पव्वे सुपोसहोवासं ।**
**अतिहीण संविभागो मरणंते कुणइ सल्लिहणं ॥ ३५५ ॥**

देवान् स्तौति त्रिकाले, पर्वणि पर्वणि सुप्रोषधोपवासः ।
अतिथीनां संविभागः, मरणान्ते करोति सल्लेखनां ॥

**महुमज्जमंसविरई चाओ पुण उंबराण पंचण्हं ।**
**अट्ठेदे मूलगुणा हवंति फुडु देसविरयम्मि ॥ ३५६ ॥**

मधुमद्यमांसविरतिः त्यागः पुनः उदम्बराणां पंचानां ।
अष्टावेते मूलगुणा भवन्ति स्फुटं देशविरते ॥

**अट्टरउद्दं झाणं भद्दं अत्थित्ति तम्हि गुणठाणे ।**
**बहुआरंभपरिग्गहजुत्तस्स य णत्थि तं धम्मं ॥ ३५७ ॥**

आर्त्तरौद्रं ध्यानं भद्रं अस्तीति तस्मिन् गुणस्थाने ।
बह्वारम्भपरिग्रहयुक्तस्य च नास्ति तद्धर्म्यम् ॥

**धम्मोदएण जीवो असुहं परिचयइ सुहगई लेई ।**
**कालेण सुक्ख मिलइ इंदियबलकारणं जाणि ॥ ३५८ ॥**

---

१ अस्याग्रे उक्तं च श्लोकः ख-पुस्तके ।
मित्रे कलत्रे विभवे तनूजे सौख्ये गृहे चाप विहाय मोहं ।
[illegible] पंचपदं स्मरित्वा सल्लेखना सा विहिता मुनीन्द्रैः ॥ १ ॥

धर्मोदयेन जीवोऽशुभं परित्यजति शुभगतिं प्राप्नोति ।
कालेन सुखं मिलति इन्द्रियबलकारणं जानीहि ॥

**इट्ठविओए अट्टं उप्पज्जइ तह अणिट्ठसंजोए ।**
**रोयपकोवे तइयं णियाणकरणे चउत्थं तु ॥ ३५९ ॥**

इष्टवियोगे आर्तं उत्पद्यते तथा अनिष्टसंयोगे ।
रोगप्रकोपे तृतीयं निदानकरणे चतुर्थं तु ॥

**अट्टज्झाणपउत्तो बंधइ पावं णिरंतरं जीवो ।**
**मरिऊण य तिरियगई को वि णरो जाइ तज्झाणे ॥३६०॥**

आर्तध्यानयुक्तो बध्नाति पापं निरन्तरं जीवः ।
मृत्वा च तिर्यग्गतिं कोऽपि नरो याति तद्ध्याने ॥

**रुद्दं कसायसहियं जीवो संभवइ हिंसयाणंदं ।**
**मोसाणंदं विदियं तेयाणंदं पुणो तइयं ॥ ३६१ ॥**

रुद्रं कषायसहितं जीवः संभवति हिंसानन्दं ।
मृषानन्दं द्वितीयं स्तेयानन्दं पुनस्तृतीयं ॥

**हवइ चउत्थं झाणं रुद्दं णामेण रक्खणाणंदं ।**
**जस्स य माहप्पेण य णरयगईभायणो जीवो ॥ ३६२ ॥**

भवति चतुर्थं ध्यानं रौद्रं नाम्ना रक्षणानन्दं ।
यस्य च माहात्म्येन नरकगतिभाजनो जीवः ॥

**गिहवावाररयाणं गेहीणं इंदियत्थपरिकलियं ।**
**अट्टज्झाणं जायइ रुद्दं वा मोहछण्णाणं ॥ ३६३ ॥**

गृहव्यापाररतानां गेहिनामिन्द्रियार्थपरिकलितं ।
आर्तध्यानं जायते रौद्रं वा मोहच्छन्नानां ॥

**झाणेहिं तेहिं पावं उप्पण्णं तं खवइ भद्दझाणेण ।**
**जीवो उवसमजुत्तो देसजई णाणसंपण्णो ॥ ३६४ ॥**

ध्यानैस्तैः पापं उत्पन्नं तत्क्षपयति भद्रध्यानेन।
जीव उपशमयुक्तो देशयतिः ज्ञानसम्पन्नः॥

**भद्दस्स लक्खणं पुण धम्मं चिंतेइ भोयपरिमुक्को।**
**चिंतिय धम्मं सेवइ पुणरवि भोए जहिच्छाए॥ ३६५॥**

भद्रस्य लक्षणं पुनः धर्मं चिन्तयति भोगपरिमुक्तः।
चिन्तयित्वा धर्मं सेवते पुनरपि भोगान् यथेच्छया॥

**धम्मज्झाणं भणियं आणापायाविवायविचयं च।**
**संठाणं विचयं तह कहियं झाणं समासेण॥ ३६६॥**

धर्म्यध्यानं भणितं आज्ञापायविपाकविचयं च।
संस्थानविचयं तथा कथितं ध्यानं समासेन॥

**छद्दव्वणवपयत्था सत्त वि तच्चाइं जिणवराणाए।**
**चिंतइ विसयविरत्तो आणाविचयं तु तं भणियं॥ ३६७॥**

षड्द्रव्यनवपदार्थान् सप्तापि तत्वानि जिनवराज्ञया।
चिन्तयति विषयविरक्त आज्ञाविचयं तु तद्भणितं॥

**असुहकम्मस्स णासो सुहस्स वा हवेइ केणुवाएण।**
**इय चिंतंतस्स हवे अपायविचयं परं झाणं॥ ३६८॥**

अशुभकर्मणः नाशः शुभस्य वा भवति केनोपायेन।
एतच्चिन्तयतः भवेदपायविचयं परं ध्यानं॥

**असुहसुहस्स विवाओ चिंतइ जीवाण चउगइगयाण।**
**विवायविचयं झाणं भणियं तं जिणवरिंदेहिं॥ ३६९॥**

अशुभशुभस्य विपाकः चिन्तयति जीवानामशुभगतिगतानां॥
विपाकविचयं ध्यानं भणितं तज्जिनवरेन्द्रैः॥

**अहउड्ढतिरियलोए चिंतेइ सपज्जयं ससंठाणं ।**
**विचयं संठाणस्स य भणियं झाणं समासेण ।। ३७० ।।**

अधऊर्ध्वतिर्यग्लोकं चिन्तयति सपर्ययं ससंस्थानं ।
विचयं संस्थानस्य च भणितं ध्यानं समासेन ।।

**मुक्खं धम्मज्झाणं उत्तं तु पमायविरहिए ठाणे ।**
**देसविरए पमत्ते उवयारेणेव णायव्वं ।। ३७१ ।।**

मुख्यं धर्मध्यानमुक्तं तु प्रमादविरहिते स्थाने ।
देशविरते प्रमत्ते उपचारेणैव ज्ञातव्यं ।।

**दहलक्खणसंजुत्तो अहवा धम्मोत्ति वण्णिओ सुत्ते ।**
**चिंता जा तस्स हवे भणियं तं धम्मझाणुत्ति ।। ३७२ ।।**

दशलक्षणसंयुक्तोऽथवा धर्म इति वर्णितः सूत्रे ।
चिन्ता या तस्य भवेत् भणितं तद्धर्मध्यानमिति ।।

**अहवा वत्थुसहावो धम्मं वत्थू पुणो व सो अप्पा ।**
**झायंताणं कहियं धम्मज्झाणं मुणिंदेहिं ।। ३७३ ।।**

अथवा वस्तुस्वभावो धर्मः वस्तु पुनश्च स आत्मा ।
ध्यायमानानां तत् कथितं धर्म्यध्यानं मुनीन्द्रैः ।।

**तं फुडु दुविहं भणियं सालंबं तह पुणो अणालंबं ।**
**सालंबं पंचण्हं परमेट्ठीणं सरूवं तु ।। ३७४ ।।**

तत्स्फुटं द्विविधं भणितं सालम्बं तथा पुनरनालम्बं ।
सालंबं पंचानां परमेष्ठीनां स्वरूपं तु ।।

**हरिरइयसमवसरणो अट्ठमहापाडिहेरसंजुत्तो ।**
**सियकिरण विप्फुरंतो झायव्वो अरुहपरमेट्ठी ।। ३७५ ।।**

---

१ णे ख. ।

हरिरचितसमवशरणोऽष्टमहाप्रातिहार्यसंयुक्तः ।
सितकिरणेन विस्फुरन् ध्यातव्योऽर्हत्परमेष्ठी ॥

णट्ठट्ठकम्मबंधो अट्ठगुणट्ठो य लोयसिहरत्थो ।
सुद्धो णिच्चो सुहमो झायव्वो सिद्धपरमेट्ठी ॥ ३७६ ॥

नष्टाष्टकर्मबन्धोऽष्टगुणस्थश्च लोकशिखरस्थः ।
शुद्धो नित्यः सूक्ष्मः ध्यातव्यः सिद्धपरमेष्ठी ॥

छत्तीसगुणसमग्गो णिच्चं आयरइ पंचआयारो ।
सिस्साणुग्गहकुसलो भणिओ सो सूरिपरमेट्ठी ॥ ३७७ ॥

षड्त्रिंशद्गुणसमग्रः नित्यं आचरति पंचाचारं ।
शिष्यानुग्रहकुशलो भणितः स सूरिपरमेष्ठी ॥

अज्झावयगुणजुत्तो धम्मोवदेसयारि चरियट्ठो ।
णिस्सेसागमकुसलो परमेट्ठी पाठओ झाओ ॥ ३७८ ॥

अध्यापनगुणयुक्तो धर्मोपदेशकारी चर्यास्थः ।
निःशेषागमकुशलः परमेष्ठी पाठको ध्येयः ॥

उग्गतवतवियगत्तो तियालजोएण गमियअहरत्तो ।
साहियमोक्खस्सपओ झाओ सो साहुपरमेट्ठी ॥ ३७९ ॥

उग्रतपस्तपितगात्रः त्रिकालयोगेन गमिताहोरात्रः ।
साधितमोक्षपथः ध्येयः स साधुपरमेष्ठी ॥

एवं तं सालंवं धम्मज्झाणं हवेइ णियमेण ।
झायंताणं जायइ विणिज्जरा असुहकम्माणं ॥ ३८० ॥

एवं तत्सालंबं धर्मध्यानं भवति नियमेन ।
ध्यायमानानां जायते विनिर्जरा अशुभकर्मणां ॥

---

१ सिहरत्थो. क. । २ हो ख. ।

**जं पुणु वि णिरालंवं तं झाणं गयपमायगुणठाणे ।**
**चत्तगेहस्स जायइ धरियंजिणलिंगरूवस्स ॥ ३८१ ॥**[1]

यत्पुनरपि निरालंबं तद्ध्यानं गतप्रमादगुणस्थाने ।
त्यक्तगृहस्य जायते धृतजिनलिंगरूपस्य ॥

**जो भणइ को वि एवं अत्थि गिहत्थाण णिच्चलं झाणं ।**
**सुद्धं च णिरालंवं ण मुणइ सो आयमो जइणो ॥ ३८० ॥**

यो भणति कोऽप्येवं अस्ति गृहस्थानां निश्चलं ध्यानं ।
शुद्धं च निरालंबं न मनुते स आगमं यतीनां ॥

**कहियाणि दिट्ठिवाए पडुच्च गुणठाण जाणि झाणाणि ।**
**तह्मा स देसविरओ मुक्खं धम्मं ण झाएई ॥ ३८३ ॥**

कथितानि दृष्टिवादे प्रतीत्य गुणस्थानानि जानीहि ध्यानानि ।
तस्मात् स देशविरतो मुख्यं धर्म्यं न ध्यायति ॥

**किं जं सो गिहवंतो बहिरंतरगंथपरिमिओ णिच्चं ।**
**बहुआरंभपउत्तो कह झायइ सुद्धमप्पाणं ॥ ३८४ ॥**

किं यत् स गृहवान् बाह्याभ्यन्तरग्रन्थपरिमितो नित्यं ।
बह्वारम्भप्रयुक्तः कथं ध्यायति शुद्धमात्मानं ॥

**घरवावारा केई करणीया अत्थि तेण ते सव्वे ।**
**झाणट्ठियस्स पुरओ चिट्ठंति णिमीलियच्छिस्स ॥ ३८५ ॥**

गृहव्यापाराणि कियन्ति करणीयानि सन्ति तेन तानि सर्वाणि ।
ध्यानस्थितस्य पुरतः तिष्ठन्ति निमीलिताक्षणः ॥

**अह ढिंकुलिया झाणं झायइ अहवा स सोवए झाणी ।**
**सोवंतो झायव्वं ण ठाइ चित्तम्मि वियलम्मि ॥ ३८६ ॥**

1 जिणरूवलिंगस्स ख. ।

अथ ढिकुलिके ध्यानं ध्यायति अथवा स स्वपिति ध्यानी।
स्वपतः ध्यातव्यं न तिष्ठति चित्ते विकले ॥

**झाणाणं संताणं अहवा जाएइ तस्स झाणस्स।**
**आलंवणरहियस्स य ण ठाइ चित्तं थिरं जम्हा ॥३८७॥**

ध्यानानां सन्तानं अथवा जायते तस्य ध्यानस्य।
आलंबनरहितस्य च न तिष्ठति चित्तं स्थिरं यस्मात् ॥

**तम्हा सो सालंवं झायउ झाणं पि गिहवई णिच्चं।**
**पंचपरमेट्ठीरूवं अहवा मंतक्खरं तेसिं ॥ ३८८ ॥**

तस्मात् स सालंबं धायतु ध्यानमपि गृहपतिर्नित्यं।
पंचपरमेष्ठिरूपमथवा मंत्राक्षरं तेषां ॥

**जइ भणइ को वि एवं गिहवावारेसु वट्टमाणो वि**
**पुण्णो अम्ह ण कज्जं जं संसारे सुपाडेई ॥ ३८९ ॥**

यदि भणति कोऽप्येवं गृहव्यापारेषु वर्तमानोऽपि।
पुण्येनास्माकं न कार्यं यत्संसारे सुपातयति ॥

**मेहुणसण्णारूढो मारइ णवलक्खसुहुमजीवाई।**
**इय जिणवरेहिं भणियं वज्झंतरणिग्गंथरूवेहिं ॥ ३९० ॥**

मैथुनसंज्ञारूढो मारयति अनवलक्ष्यसूक्ष्मजीवान्।
एतज्जिनवरैः भणितं बाह्याभ्यन्तरनिर्ग्रन्थरूपैः ॥

**गेहे वट्टंतस्स य वावारसयाइं सया कुणंतस्स।**
**आसवइ कम्ममसुहं अट्टरउद्दे पवत्तस्स ॥ ३९१ ॥**

गेहे वर्तमानस्य च व्यापारशतानि सदा कुर्वतः।
आस्रवति कर्माशुभं आर्तरौद्रप्रवृत्तस्य ॥

**जह गिरिणई तलाए अणवरयं पविसए सलिलपरिपुण्णं ।**
**मणवयतणुजोएहिं पविसइ असुहेहिं तह पावं ॥ ३९२ ॥**

यथा गिरिनदी तडागेऽनवरतं प्रविशति सलिलपरिपूर्णे ।
मनवचनतनुयोगैः प्रविशति अशुभैः तथा पापं ।

**जाम ण[2] छंडइ गेहं ताम ण[3] परिहरइ इंतयं पावं ।**
**पावं अपरिहरंतो हेऊ[4] पुण्णस्स मा चयउ ॥ ३९३ ॥**

यावन्न त्यजति गृहं तावन्न परिहरति एतत्पापं ।
पापमपरिहरन् हेतुं पुण्यस्य मा त्यजतु ॥

**आ(मा)मुक्क पुण्णहेउं पावस्सासवं अपरिहरंतो य ।**
**बज्झइ पावेण णरो सो दुग्गइ जाइ मरिऊणं ॥ ३९४ ॥**

मा त्यज पुण्यहेतुं पापस्यास्त्रवमपरिहरंश्च ।
बध्यते पापेन नरः स दुर्गतिं याति मृत्वा ॥

**पुण्णस्स कारणाइं पुरिसो परिहरउ जेण णियचित्तं ।**
**विसयकसायपउत्तं णिग्गेहियं[5] हयपमाएण ॥ ३९५ ॥**

पुण्यस्य कारणानि पुरुषः परिहरतु येन निजचित्तं ।
विषयकषायप्रयुक्तं निगृहीतं हतप्रमादेन ॥

**गिहवावारविरत्तो गहियंजिणलिंग रहियसपमाओ ।**
**पुण्णस्स कारणाइं परिहरउ सयावि सो पुरिसो ॥ ३९६ ॥**

गृहव्यापारविरक्तो गृहीतजिनलिंगः रहितस्त्रप्रमादः ।
पुण्यस्य कारणानि परिहरतु सदापि स पुरुषः ॥

**असुहस्स कारणेहिं य कम्मच्छक्केहि णिच्च वट्टंतो ।**
**पुण्णस्स कारणाइं बंधस्स भएण णिच्छंतो[6] ॥ ३९७ ॥**

---

१ इ. ख । २–३ न ख । ४ उ. ग. । ५ गिरोहियं ख. । ६ णे. ख. ।

अशुभस्य कारणे च कर्मषट्क नित्यं वर्तमानः ।

पुण्यस्य कारणानि बन्धस्य भयेन नेच्छन् ॥

**ण मुणइ इय जो पुरिसो जिणकहियपयत्थणवसरूवं तु ।**

**अप्पाणं सुयणमज्झे हासस्स य ठाणयं कुणई ॥ ३९८ ॥**

न मनुते एतत् यः पुरुषो जिनकथितपदार्थनवस्वरूपं तु ।

आत्मानं सुजनमध्ये हास्यस्य च स्थानकं करोति ॥

**पुण्णं पुव्वायरिया दुविहं अक्खंति सुत्तउत्तीए ।**

**मिच्छपउत्तेण कयं विवरीयं सम्मजुत्तेण ॥ ३९९ ॥**

पुण्यं पूर्वाचार्या द्विविधं कथयन्ति सूत्रोक्त्या ।

मिथ्यात्वप्रयुक्तेन कृतं विपरीतं सम्यक्त्वयुक्तेन ॥

**मिच्छादिट्ठीपुण्णं फलइ कुदेवेसु कुणरतिरिएसु ।**

**कुच्छियभोगधरासु य कुच्छियपत्तस्स दाणेण ॥ ४०० ॥**

मिथ्यादृष्टिपुण्यं फलति कुदेवेषु कुनरतिर्यक्षु ।

कुत्सितभोगधरासु च कुत्सितपात्रस्य दानेन ॥

**जइ वि सुजायं वीयं ववसायपउत्तओ विजइ कसओ ।**

**कुच्छियखेत्ते ण फलइ तं वीयं जह तहा दाणं ॥ ४०१ ॥**

यद्यपि सुजातं बीजं व्यवसायप्रयुक्तो वपति कृषकः ।

कुत्सितक्षेत्रे न फलति तद्बीजं यथा तथा दानं ॥

**जइ फलइ कह वि दाणं कुच्छियजाईहिं कुच्छियसरीरं ।[1]**

**कुच्छियभोए दाउं पुणरवि पाडेइ संसारे ॥ ४०२ ॥**

यदि फलति कथमपि दानं कुत्सितजातिषु कुत्सितशरीरं ।

कुत्सितभोगान् दत्वा पुनरपि पातयति संसारे ॥

---

१ कुच्छियजाईहिं देइ कुसरीरं ख. ।

**संसारचक्कवाले, परिब्भमंतो हु जोणिलक्खाइं ।**
**पावइ विविहे दुक्खे, विरयंतो विविहकम्माइं[1] ॥ ४०३ ॥**

संसारचक्रवाले परिभ्रमन् हि योनिलक्षाणि ।
प्राप्नोति विविधान् दुःखान् विरचयन् विविधकर्माणि ॥

**सम्मादिट्ठीपुण्णं ण होइ संसारकारणं णियमा ।**
**मोक्खस्स होइ हेउं जइ वि णियाणं ण सो कुणई ॥ ४०४ ॥**

सम्यग्दृष्टिपुण्यं न भवति संसारकारणं नियमात् ।
मोक्षस्य भवति हेतुः यदि च निदानं न स करोति ॥

**अकइयणियाणसम्मो[3] पुण्णं काऊण णाणचरणट्ठो ।**
**उप्पज्जइ दिवलोए सुहपरिणामो सुलेसो वि ॥ ४०५ ॥**

अकृतनिदानसम्यग्दृष्टिः पुण्यं कृत्वा ज्ञानचरणस्थः ।
उत्पद्यते दिवलोके शुभपरिणामः सुलेश्योऽपि ॥

**अंतरमुहुत्तमज्झे देहं चइऊण माणुसं कुणिमं ।**
**गिण्हइ उत्तमदेहं सुचरियकम्माणुभावेण ॥ ४०६ ॥**

अन्तर्मुहूर्तमध्ये देहं त्यक्त्वा मानुषं कुणिमं ।
गृह्णाति उत्तमदेहं सुचरितकर्मानुभावेन ॥

**चम्मं रुहिरं मंसं मेज्जा अट्ठिं च तह वसा सुक्कं ।**
**सिंभं[4] पित्तं अंतं मुत्त पुरीसं च रोमाणि ॥ ४०७ ॥**

---

१ अंगाइं ख. । २ अस्मादग्रे " उक्तं च " पाठः ख–पुस्तके ।

जीवं तह परिणामं कम्मंगइ विगहिदियं,
रायदोसं च कमे भमेइ संसारचक्कम्मि ॥ १ ॥

पुस्तकानुसारी पाठः । ३ अकय नियाणो सम्मो ख. । ४ सिंसीभिम ख. ।

चर्म रुधिरं मांसं मेदोऽस्थिश्च तथा वसा शुक्रं ।
श्लेष्म पित्तं अंत्रं मूत्रं पुरीषं च रोमाणि ॥

**णहदंतसिरण्हारु[1]लालो[2] सेउयं च णिमिस आलस्सं ।**
**णिद्दा तण्हा य जरा अंगे देवाण ण हि अत्थि ॥ ४०८ ॥**

नखदन्तशिरानारुलाला: स्वेदकं च निमेषं आलस्यं ।
निद्रा तृष्णा च जरा अङ्गे देवानां न हि सन्ति ॥

**सुइ अमलो वरवण्णो देहो सुहफासगंधसंपण्णो ।**
**वालरवितेयसरिसो चारुसरूवो सया तरुणो ॥ ४०९ ॥**

शुचि: अमलो वरवर्ण: देह: शुभस्पर्शगन्धसम्पन्न: ।
बालरवितेजसदृश: चारुस्वरूप: सदा तरुण: ॥

**अणिमा[3] महिमा लहिमा पावइ पागम्म तह य ईसत्तं ।**
**वसयत्त कामरूवं एत्तियहि गुणेहि संजुत्तो ॥ ४१० ॥**

अणिमा महिमा लघिमा प्राप्ति: प्राकाम्यं तथा चेशित्वं ।
वशित्वं कामरूपं एतै: गुणै: संयुक्त: ॥

**देवाण होइ देहो अइउत्तमेण पुग्गलेण संपुण्णो ।**
**महजाहरणणिउत्तो अइरम्मो होइ पुण्णेण ॥ ४११ ॥**

---

१ सिरण्हाउ ख. । २ सेयं लवलो क-पुस्तके पाठ:, अयं तु ख-पुस्तकात्संयोजित: । ३ ख-पुस्तके अस्या व्याख्या वर्तते तद्यथा ।

व्याख्या—अणुशरीरविकरणमणिमा । मेरोरपि महत्तरशरीरविकरणं महिमा । वायोरपि लघुतरशरीरकरणं लघिमा । भूमौ स्थित्वाऽङ्गुल्यग्रेण मेरुशिखरदिवाकरादिस्पर्शनशक्ति: प्राप्ति: । अप्सु भूमाविव गमनं भूमौ जले इवोन्मज्जनकरणं प्राकाम्यं । त्रैलोक्यप्रभुत्वं ईशित्वं । सर्वजीववशीकरणलब्धिर्वशित्वं । युगपदनेकरूपविकरणशक्ति: कामरूपित्वं ॥

देवानां भवति देहोऽत्युत्तमेन पुद्गलेन सम्पूर्णः ।
सहजाहरणनियुक्तोऽतिरम्यो भवति पुण्येन ॥

**उप्पण्णो कणयमए कायक्कंतिहिं भासियं भवणे ।**
**पेच्छंतो रयणमयं पासायं कणयदित्तिल्लं ॥ ४१२ ॥**

उत्पन्नः कनकमये कायकान्तिभिः भासिते भवने ।
पश्यन् रत्नमयं प्रासादं कनकदीप्तिम् ॥

**अणुकूलं परियणयं तरलियणयणं च अच्छराणिवहं ।**
**पिच्छंतो णमियसिरं सिरकइयकरंजली देवे ॥ ४१३ ॥**

अनुकूलं परिजनकं तरलितनयनं च अप्सरोनिवहं ।
पश्यन् नमितशीर्षान् शिरःकृतकराञ्जलीन् देवान् ॥

**णिसुणंतो थोत्तसए सुरवरसत्थेण विरइए ललिए ।**
**तुंवुरुगाइयगीए वीणासद्देण सुइसुहए ॥ ४१४ ॥**

निःशृण्वन् स्तोत्रान् सुरवरसार्थेन विरचितान् ललितान् ।
तुम्बुरुगीतगीतान् वीणाशब्देन श्रुतिसुखदान् ॥

**चिंतइ किं एवड्डुं मज्झ पहुत्तं इमं पि किं जायं ।**
**किं ओ लग्गइ एसो अमरगणो विणयसंपण्णो ॥ ४१५ ॥**

चिन्तयति किमेतावन्मम प्रभुत्वं इदमपि किं जातं ।
किमुत लगति एषः अमरगणः विनयसम्पन्नः ॥

**को हं इह कस्साओ केण विहाणेण इयं गहं पत्तो ।**
**तविओ को उग्गतवो केरिसियं संजमं विहियं ॥ ४१६ ॥**

कोऽहं इह कथमागतः केन विधानेन इमं गृहं प्राप्तः ।
तपितं किमुग्रतपः कीदृशं संयमं विहितं ॥

---

१ पयं. ख. पदं ।

किं दाणं मे दिण्णो केरिसपत्ताण काय सुभत्तीए ।
जेणाहं कयपुण्णो उप्पण्णो देवलोयम्मि ॥ ४१७ ॥

किं दानं मया दत्तं कीदृशपात्राणां कया सुभक्त्या ।
येनाहं कृतपुण्यः उत्पन्नो देवलोके ॥

इय चिंतंतो पसरइ ओहीणाणं तु भवसहावेण ।
जाणइ सो आसिभवं विहियं धम्मप्पहावं च ॥ ४१८ ॥

इति चिन्तयन् प्रसारयति अवधिज्ञानं तु भवस्वभावेन ।
जानाति स अतीतभवं विहितं धर्मप्रभावं च ॥

पुणरवि तमेव धम्मं मणसा सद्दहइ सम्मदिट्ठी सो ।
वंदेइ जिणवराणं णंदिसरपहुइसव्वाइं[1] ॥ ४१९ ॥

पुनरपि तमेव धर्मं मनसा श्रद्दधाति सम्यग्दृष्टिः सः ।
वन्दते जिनवरान् नन्दीश्वरप्रभृतिसर्वान् ॥

इय बहुकालं सग्गे भोगं[2] भुंजंतु[3] विविहरमणीयं[4] ।
चइऊण आउसखए उप्पज्जइ मच्चलोयम्मि ॥ ४२० ॥

इति बहुकालं स्वर्गे भोगं भुंजानः विविधरमणीयं ।
च्युत्वा आयुःक्षये उत्पद्यते मर्त्यलोके ॥

उत्तमकुले महंतो बहुजणणमणीये संपयापउरे ।
होऊण अहियरूवो वलजोव्वणरिद्धिसंपुण्णो ॥ ४२१ ॥

उत्तमकुले महति बहुजननमनीये सम्पदाप्रचुरे ।
भूत्वा अधिकरूपः बलयौवनर्धिसम्पूर्णः ॥

तत्थ वि विविहे भोए णरखेत्तभवे अणोवमे परमे ।
भुंजित्ता णिव्विण्णो संजमयं चेव गिण्हेई ॥ ४२२ ॥

---

१ इ. ख. जिनगृहान् । २ भोये ख. । ३ ए. ख. । ४ ए. ख. ।

तत्रापि विविधान् भोगान् नरक्षेत्रभवाननुपमान् परमान् ।
भुक्त्वा निर्विण्णः संयमं चैव गृह्णाति ॥

**लद्धं जइ चरमतणु चिरकयपुण्णेण[1] सिज्झए णियमा ।**
**पाविय केवलणाणं जहखाइयसंजयं सुद्धं ॥ ४२३ ॥**

लब्धं यदि चरमतनु चिरकृतपुण्येन सिद्धयति नियमात् ।
प्राप्य केवलज्ञानं यथाख्यातसंयतं शुद्धं ॥

**तम्हा सम्मादिट्ठी पुण्णं मोक्खस्स कारणं हवई ।**
**इय णाऊण गिहत्थो पुण्णं चायरउ जत्तेण ॥ ४२४ ॥**

तस्मात्सम्यग्दृष्टेः पुण्यं मोक्षस्य कारणं भवति ।
इति ज्ञात्वा गृहस्थः पुण्यं चार्जयतु यत्नेन ॥

**पुण्णस्स कारणं फुडु पढमं ता हवइ देवपूया य ।**
**कायव्वा भत्तीए सावयवग्गेण परमाय[2] ॥ ४२५ ॥**

पुण्यस्य कारणं स्फुटं प्रथमं सा भवति देवपूजा च ।
कर्तव्या भक्त्या श्रावकवर्गेण परमया ॥

**फासुयजलेण ण्हाइय णिवसिय वत्थाइं गंपि तं ठाणं ।**
**इरियावहं च सोहिय उवविसियं पडिमयासेणं ॥ ४२६ ॥**

प्रासुकजलेन स्नात्वा निवेश्य वस्त्राणि गन्तव्यं तत्स्थानं ।
ईर्यापथं च शोधयित्वा उपविश्य प्रतिमासनेन ॥

**पुज्जाउवयरणाइ य पासे सण्णिहिय मंतपुव्वेण ।**
**ण्हाणेणं ण्हाइत्ता आचमणं कुणउ मंतेण ॥ ४२७ ॥**

पूजोपकरणानि च पार्श्वे सन्निधाय मंत्रपूर्वेण ।
स्नानेन स्नात्वा आचमनं करोतु मंत्रेण ॥

१ भे ख. । २ ए. ख. ।

**आसणठाणं किच्चा सम्मत्तपुव्वं तु झाइए अप्पा ।**
**सिहिमंडलमज्झत्थं जालासयजलियणियदेहं ॥ ४२८ ॥**

आसनस्थानं कृत्वा सम्यक्त्वपूर्वं तु ध्यायतु आत्मानं ।
शिखिमण्डलमध्यस्थं ज्वालाशतज्वलितनिजदेहं ॥

**पावेण सह सदेहं झाणे डज्झंतयं खु चिंतंतो ।**
**बंधउ संतीमुद्दा पंचपरमेट्ठिणामाय ॥ ४२९ ॥**

पापेन सह स्वदेहं ध्याने दह्यमानं खलु चिन्तयन् ।
बध्नातु शान्तिमुद्रां पंचपरमेष्ठिनामानं ॥

**अमयक्खरं णिवेसउ पंचसु ठाणेसु सिरसि धरिऊण ।**
**सा मुद्दा पुणु चिंतउ धाराहिं सवतयं अमयं ॥ ४३० ॥**

अमृताक्षरं निवेशयतु पंचसु स्थानेषु शिरसि धृत्वा ।
तां मुद्रां पुनः चिन्तयतु धाराभिः स्रवदमृतं ॥

**पावेण सह सरीरं दड्ढ जं आसि झाणजलणेण ।**
**तं जायं जं छारं पक्खालउ तेण [२] मंतेण ॥ ॥ ४३१ ॥**

पापेन सह शरीरं दग्धं यत् आसीत् ध्यानज्वलनेन ।
तज्जातं यत्क्षारं प्रक्षालयतु तेन मंत्रेण ॥

**पडिदिवसं जं पावं पुरिसो आसवइ तिविहजोएण ।**
**तं णिद्दहइ णिरुत्तं तेण ज्झाणेण संजुत्तो ॥ ४३२ ॥**

प्रतिदिवसं यत्पापं पुरुषः आस्रवति त्रिविधयोगेन ।
तन्निर्दहति निःशेषं तेन ध्यानेन संयुक्तः ॥

---

१ मज्झगयं ख. । २ णियदेहं ख. निजदेहं ।

**जं सुद्धो तं अप्पा सकायरहिओ य कुणइ ण हु किं पि ।**
**तेण पुणो णियदेहं पुण्णण्णवं चिंतए झाणी ॥ ४३३ ॥**

य: शुद्ध: आत्मा स्वकायरहितश्च करोति न हि किमपि ।
तेन पुनर्निजदेहं पुण्यार्णवं चिन्तयेत् ध्यानी ॥

**उट्ठाविऊण देहं संपुण्णं कोडिचंदसंकासं ।**
**पच्छा सयलीकरणं कुणओ परमेट्ठिमंतेण ॥ ४३४ ॥**

उत्थाय देहं सम्पूर्ण कोटिचन्द्रसंकाशं ।
पश्चाच्छकलीकरणं करोतु परमेष्टिमंत्रेण ॥

**अहवा खिप्पेउ सा(से)हा णिस्सेउ करंगुलीहिं वामेहिं ।**
**पाए णाही हियए मुहे य सीसे य ठविऊणं ॥ ४३५ ॥**

अथवा क्षिपेतु शेषां ? निवेशयतु ? कराङ्गुलै: वामै: ।
पादे नाभ्यां हृदये मुखे च शिरसि च स्थापयित्वा ॥

**अंगे णासं किच्चा इंदो हं कप्पिऊण णियकाए ।**
**कंकण सेहर मुद्दी कुणओ जण्णोपवीयं च ॥ ४३६ ॥**

अंगे न्यासं कृत्वा इन्द्रोऽहं कल्पयित्वा निजकाये ।
कंकणं शेखरं मुद्रिकां कुर्यात् यज्ञोपवीतं च ॥

**पीढं मेरुं कप्पिय तस्सोवरि ठाविऊण जिणपडिमा ।**
**पच्चक्खं अरहंतं चित्ते भावेउ भावेण ॥ ४३७ ॥**

पीठं मेरुं कल्पयित्वा तस्योपरि स्थापयित्वा जिनप्रतिमां ।
प्रत्यक्षं अर्हन्तं चित्ते भावयेत् भावेन ॥

**कलसचउक्कं ठाविय चउसु वि कोणेसु णीरपरिपुण्णं ।**
**घयदुद्धदहियभरियं णवसयदलछण्णमुहकमलं ॥ ४३८ ॥**

---

१ संसुद्धो सो अप्पा ख. । संशुद्ध: स आत्मा । २ पे ख. । ३ सहा ख. ।

कलशाचतुष्कं स्थापयित्वा चतुर्ष्वपि कोणेषु नीरपरिपूर्णं ।
घृतदुग्धदधिभृतं नवशतदलच्छन्नमुखकमलं ॥

आवाहिऊण देवे सुरवइसिहिकालणेरिए वरुणे ।
पवणे जक्खे समूली सपियसवाहणेससत्थे य ॥ ४३९ ॥

आहूय देवान् सुरपति-शिखि-काल नैर्ऋत्यान् वरुणान् ।
पवनान् यक्षान् सशूलिनः सप्रियसवाहनान् सशस्त्रांश्च ॥

दाऊण पुज्जदव्वं बलिचरुयं तह य जण्णभायं च ।
सव्वेसिं मंतेहि य बीयक्खरणामजुत्तेहिं ॥ ४४० ॥

दत्वा पूजाद्रव्यं बलिचरुकं तथा च यज्ञभागं च ।
सर्वेषां मंत्रैश्च बीजाक्षरनामयुक्तैः ॥

उच्चारिऊण मंते अहिसेयं कुणउ देवदेवस्स ।
णीरघयखीरदहियं खिवउ अणुक्कमेण जिणसीसे ॥ ४४१ ॥

उच्चार्य मंत्रान् अभिषेकं कुर्यात् देवदेवस्य ।
नीरघृतक्षीरदधिकं क्षिपेत् अनुक्रमेण जिनशीर्षे ॥

ण्हवणं काऊण पुणो अमलं गंधोवयं च वंदित्ता ।
सवलहणं च जिणिंदे कुणऊ कस्सीरमलएहिं ॥ ४४२ ॥

स्नपनं कारयित्वा पुनः अमलं गन्धोदकं च वन्दित्वा ।
उद्वर्तनं च जिनेन्द्रे कुर्यात् काश्मीरमलयैः ॥

आलिहउ सिद्धचक्कं पट्टे दव्वेहिं णिरुसुयंधेहि ।
गुरुउवएसेण फुडं संपण्णं सव्वमंतेहिं ॥ ४४३ ॥

आलिखेत् सिद्धचक्रं पट्टे द्रव्यैः निःसुगन्धैः ।
गुरूपदेशेन स्फुटं संपन्नं सर्वमंत्रैः ॥

सोलदलकमलमज्झे अरिहं विलिहेह बिंदुकलसहियं ।
बंभेण वेढइत्ता उवरिं पुणु मायबीएण ॥ ४४४ ॥

षोडशदलकमलमध्ये अर्हं विलिखेत् बिन्दुकलसहितं ।
ब्रह्मणा वेष्टयित्वा उपरि पुनः मायाबीजेन ॥

सोलससरेहि वेढह देहवियप्पेण अट्ठवग्गा वि ।
अट्ठहि दलेहि सुपयं अरिहंताणं णमो सहियं ॥ ४४५ ॥

षोडशस्वरैः वेष्ट्य देहविकल्पेन अष्टवर्गानपि ।
अष्टभिर्दलैः सुपदं अर्हद्भ्यो नमः सहितं ॥

मायाए तं सव्वं तिउणं वेढेह अंकुसारूढं ।
कुणह धरामंडलयं बाहिरयं सिद्धचक्कस्स ॥ ४४६ ॥

मायया तत्सर्वं त्रिगुणं वेष्टयेत् अंकुशारूढं ।
कुर्यात् धरामण्डलकं बाह्यं सिद्धचक्रस्य ॥

इय संखेवं कहियं जो पूयइ गंधदीवधूवेहिं ।
कुसुमेहि जवइ णिच्चं सो हणइ पुराणयं पावं ॥ ४४७ ॥

इति संक्षेपेण कथितं यः पूजयति गन्धदीपधूपैः ।
कुसुमैः जपति नित्यं स हन्ति पुराणकं पापं ॥

जो पुणु वड्डद्दा(द्धा)रो सव्वो भणिओ हु सिद्धचक्कस्स ।
सो एहं ण उद्धरिओ इण्हि सामग्गि ण उ तस्स ॥ ४४८ ॥

यः पुनः बृहदुद्धारो सर्वो भणितो हि सिद्धचक्रस्य ।
सोऽत्र न उद्धर्तव्य इदानीं सामग्री न च तस्य ॥

---

१ सोलहदलकंजमज्झे. ख. । २ वेड्ढत्ता क. । ३ पुराकयं ख. । पुराकृतं । ४ वड्ढद्धारो । ५ इत्थ. ख. ।

जइ पुज्जइ को वि णरो उद्धारित्ता गुरूवएसेण।
अट्ठदलविउणतिउणं चउग्गुणं बाहिरे कंजे ॥ ४४९ ॥

यदि पूजयति कोऽपि नरः उद्धार्य गुरूपदेशेन।
अष्टदलद्विगुणत्रिगुणं चतुर्गुणं बाह्ये कंजे ॥

मज्झे अरिहं देवं पंचपरमेट्ठिमंतसंजुत्तं।
लहिऊण कण्णियाए अट्ठदले अट्ठदेवीओ ॥ ४५० ॥

मध्ये अर्हं देवं पंचपरमेष्ठिमंत्रयुक्तं।
लिखित्वा कर्णिकायां अष्टदले अष्टदेवीः ॥

सोलहदलेसु सोलहविज्जादेवीउ मंतसहियाओ।
चउवीसं पत्तेसु य जक्खा जक्खी य चउवीसं ॥ ४५१ ॥

षोडशदलेषु षोडशविद्यादेवीः मंत्रसहिताः।
चतुर्विंशतौ पत्रेषु च यक्षान् यक्षीश्च चतुर्विंशतिं ॥

बत्तीसा अमरिंदा[1] लिहेह बत्तीसकंजपत्तेसु।
णियणियमंतपउत्ता गणहरवलएण वेढेह ॥ ४५२ ॥

द्वात्रिंशतममरेन्द्रान् लिखेत् द्वात्रिंशत्कंजपत्रेषु।
निजनिजमंत्रप्रयुक्तान् गणधरवलयेन वेष्टयेत् ॥

सत्तप्पयाररेहा सत्त वि विलिहेह वज्जसंजुत्ता।
चउरंसो चउदारा कुणह पयत्तेण जुत्तीए ॥ ४५३ ॥

सप्तप्रकाररेखाः सप्तापि विलिखेत् वज्रसंयुक्ताः।
चतुरंशांश्चतुर्द्वारान् कुर्यात् प्रयत्नेन युक्त्या ॥

एवं जंतुद्धारं इत्थं मइ अक्खियं समासेण।
सेसं किं पि विहाणं णायव्वं गुरुपसाएण ॥ ४५४ ॥

१ कप्पिंदा ख. । कल्पेन्द्रान्।

एवं यंत्रोद्धारं इत्थं मया कथितं समासेन ।
शेषं किमपि विधानं ज्ञातव्यं गुरुप्रसादेन ॥

**अट्ठविहअच्चणाए पुज्जेयव्वं इमं खु णियमेण ।**
**दव्वेहिं सुअंधेहि य लिहियव्वं अइपवित्तेहिं ॥ ४५५ ॥**

अष्टविधार्चनया पूजितव्यं इदं खलु नियमेन ।
द्रव्यैः सुगन्धैश्च लेखितव्यं अतिपवित्रैः ॥

**जो पुज्जइ अणवरयं पावं णिद्दहइ आसिभवबद्धं ।**
**पडिदिणकयं च विहुणइ बंधइ पउराइं पुण्णाइं ॥ ४५६ ॥**

यः पूजयति अनवरतं पापं निर्दहति पूर्वभवबद्धं ।
प्रतिदिनकृतं च विहन्ति बध्नाति प्रचुराणि पुण्यानि ॥

**इह लोए पुण मंता सव्वे सिज्झंति पढियमित्तेण ।**
**विज्जाओ सव्वाओ हवंति फुडु साणुकूलाओ ॥ ४५७ ॥**

इहलोके पुनर्मंत्राः सर्वे सिद्ध्यन्ति पठितमात्रेण ।
विद्याः सर्वा भवन्ति स्फुटं सानुकूलाः ॥

**गहभूयडायणीओ सव्वे णासंति तस्स णामेण ।**
**णिव्विसियरणं पयडइ सुसिद्धचक्कप्पहावेण ॥ ४५८ ॥**

ग्रहभूतपिशाचिन्यः सर्वा नश्यन्ति तस्य नाम्ना ।
निर्विषीकरणं प्रकटयति सुसिद्धचक्रप्रभावेन ॥

**वसियरणं आइट्ठी थंभं णेहं[1] च संतिकम्माणि ।**
**णाणाजराण हरणं कुणेइ तं झाणजोएण ॥ ४५९ ॥**

वशीकरणं आकृष्टिं स्तम्भनं स्नेहं शान्तिकर्म ।
नानाजराणां हरणं करोति तद्ध्यानयोगेन ॥

---

१ कोहं ख. ।

पहरंति ण तस्स रिउणा सत्तू मित्तत्तणं च उवयादि ।
पुज्जा हवेइ लोए सुवल्लहो णरवरिंदाणं ॥ ४६० ॥

प्रहरन्ति न तस्य रिपवः शत्रुः मित्रत्वं च उपयाति ।
पूजा भवति लोके सुवल्लभो नरवरेन्द्राणां ॥

किं बहुणा उत्तेण य मोक्खं[1] सोक्खं[2] च लब्भई[3] जेण ।
केत्तियमेत्तं एयं सुसाहियं सिद्धचक्केण ॥ ४६१ ॥

किं बहुना उक्तेन च मोक्षः सौख्यं च लभ्यते येन ।
कियन्मात्रमेतत्सुसाधितं सिद्धचक्रेण ॥

अहवा जइ असमत्थो पुज्जइ परमेट्ठिपंचकं चक्कं ।
तं पायडं खु लोए इच्छियफलदायगं परमं ॥ ४६२ ॥

अथवा यद्यसमर्थः पूजयेत् परमेष्ठिपंचकं चक्रं ।
तत् प्रकटं खलु लोके इच्छितफलदायकं परमं ॥

सिररेहभिण्णसुण्णं चंदुकलाबिंदुएण संजुत्तं ।
मत्ताहिवउवरगयं[4] सुवेढियं कामबीएण ॥ ४६३ ॥

शिरोरेफभिन्नशून्यं चन्द्रकलाबिन्दुकेन संयुक्तं ।
मात्राधिकोपरिगतं ? सुवेष्टितं कामबीजेन ॥

वामदिसाई णयारं मयारसविसग्गदाहिणे भाए ।
बहिअट्ठपत्तकमलं तिउणं वेढह मायाए ॥ ४६४ ॥

वामदिशायां नकारं मकारसविसर्गदक्षिणे भागे ।
बहिरष्टपत्रकमलं त्रिगुणं वेष्टयेत् मायया ॥

पणमंति मुत्तिमेगे अरहंतपयं दलेसु सेसेसु ।
धरणीमंडलमज्झे झाएह सुरच्चियं चक्कं ॥ ४६५ ॥

१ मग्गं ख. । २ मोक्खं ख. । ३ ए. ख. । ४ मंताहिव ख ।

प्रणव इति ? मूर्तिमेकस्मिन् ? अर्हत्पदं दलेषु शेषेषु ।
धरणीमण्डलमध्ये ध्यायेत् सुरार्चितं चक्रं ॥

**अह एउणवण्णासे कोट्ठे काऊण विउलरेहाहिं ।**
**अयरोइअक्खराइं कमेण विण्णिसहं सव्वाइं ॥ ४६६ ॥**

अथवा एकोनपंचाशान् कोष्ठान् कृत्वा विपुलरेखाभिः ।
अतिरोच्यक्षराणि क्रमेण विनिवेशय सर्वाणि ॥

**ता णिसहं जहयारं मज्झिमठाणेसु ठाइ जुत्तीए ।**
**वेढह बीएण पुणो इलमंडलउयरमज्झत्थं ॥ ४६७ ॥**

तावत् निवेशय यथाकारं मध्यमस्थानेषु स्थापय युक्त्या ।
वेष्टय बीजेन पुनः इलामण्डलोदरमध्यस्थं ॥

**एए जंतुद्धारे पुज्जह परमेट्ठिपंचअहिहाणे ।**
**इच्छइ फलदायारो पावघणपडलहंतारो ॥ ४६८ ॥**

एतान् यंत्रोद्धारान् पूजयेत् परमेष्ठिपंचाभिधानान्[1] ।
इच्छितफलदातृन् पापघनपटलहन्तृन् ॥

**अट्ठविहच्चण काउं पुव्वपउत्तम्मि ठाँवियं[2] पडिमा ।**
**पुज्जेह तग्गयमणो विविहहि पुज्जाहिं भत्तीए ॥ ४६९ ॥**

अष्टविधार्चनां कृत्वा पूर्वप्रोक्ते स्थापितां प्रतिमां ।
पूजयेत् तद्गतमनाः विविधाभिः पूजाभिः भक्त्या ॥

**पसमइ रयं असेसं जिणपयकमलेसु दिण्णजलधारा ।**
**भिंगारणालणिग्गय भवंतभिंगेहि कव्वुरिया ॥ ४७० ॥**

प्रशमति रजः अशेषं जिनपदकमलेषु दत्तजलधारा ।
भृंगारनालनिर्गता भ्रमद्भृंगैः कर्बुरिता ॥

---

१ इ. ख. । २ ठाविउं—स्थापयित्वा ख. ।

चंदणसुअंधलेओ जिणवरचलणेसु जो कुणइ भविओ ।
लहइ तणू विकिरियं सहावसुयंधयं अमलं ।। ४७१ ।।

चन्दनसुगन्धलेपं जिनवरचरणेषु यः करोति भव्यः ।
लभते तनुं वैक्रियिकं स्वभावसुगन्धकं अमलं ।।

पुण्णाणं पुज्जेहि य अक्खयपुंजेहि देवपयपुरओ ।
लब्भंति णवणिहाणे[1] सुअक्खए[2] चक्कवट्टित्तं ।। ४७२ ।।

पुण्यैः पूजयेच्च अक्षतपुंजैः देवपदपुरतः ।
लभ्यन्ते नवनिधानानि स्वक्षयानि चक्रवर्तित्वं ।।

अलिचुंबिएहिं पुज्जइ जिणपयकमलं च जाइमल्लीहिं ।
सो हवइ सुरवरिंदो रमेइ सुरतरुवरवणेहिं ।। ४७३ ।।

अलिचुम्बितैः पूजयति जिनपदकमलं च जातिमल्लिकैः ।
स भवति सुरवरेन्द्रः रमते सुरतरुवरवनेषु ।।

दहिखीरसप्पिसंभवउत्तमचरुएहिं पुज्जए जो हु ।
जिणवरपायपओरुह सो पावइ उत्तमे भोए ।। ४७४ ।।

दधिक्षीरसर्पिःसंभवोत्तमचरुकैः पूजयेत् यो हि ।
जिनवरपादपयोरुहं स प्राप्नोति उत्तमान् भोगान् ।।

कप्पूरतेल्लपयलियमंदमरुपहयणडियदीवेहिं ।
पुज्जइ जिणपयपोमं[3] ससिसूरविसमतणुं लहई ।। ४७५ ।।

कर्पूरतैलप्रज्वलितमन्दमरुत्प्रहतनटितदीपैः ।
पूजयति जिनपदपद्मं शशिसूर्यसमतनुं लभते ।।

सिल्हारसअयरुम्मीसियणिग्गयधूवेहिं[4] बहलधूमेहिं ।
धूवइ जो जिणचरणेसु लहइ सुहवत्तणं[5] तिजए ।। ४७६ ।।

१ नवनिहाणे ख । २ पुण अक्खये ख. । ३ जिणपयजुयलं ख । ४ सिल्हार सगुरु. ख । ५ सुहवत्तणं तिजाइ ख, सुहवत्तणं तिजएगं क ।

सिलारसागुरुमिश्रितनिर्गतधूपैः बहलधूम्रैः ।
धूपयेद्यः जिनचरणेषु लभते शुभवर्तनं त्रिजगति ॥

**पक्केहिं रसड्ढुसुमुज्जलेहिं जिणचरणपुरओप्पविएहिं ।**
**णाणाफलेहिं पावइ पुरिसो हियइच्छयं सुफलं ॥ ४७७ ॥**

पक्कै रसाढ्यैः समुज्वलैः जिनवरचरणपुरतउपयुक्तैः ।
नानाफलैः प्राप्नोति पुरुषः हृदयेप्सितं सुफलं ॥

**इय अट्ठभेयअच्चण काउं पुण जवहु मूलविज्जा य ।**
**जा जत्थ जहाउत्ता सयं च अट्ठोत्तरं जावा ॥ ४७८ ॥**

इत्यष्टभेदार्चनं कृत्वा पुनः जपेत् मूलविद्यां च ।
यां यत्र यथोक्तां शतं चाष्टोत्तरं जापं ॥

**किच्चा काउस्सग्गं देवं झाएह समवसरणत्थं ।**
**लद्धट्ठपाडिहेरं णवकेवललद्धिसंपुण्णं ॥ ४७९ ॥**

कृत्वा कायोत्सर्गं देवं ध्यायेत् समशरणस्थं ।
लब्धाष्टप्रातिहार्यं नवकेवललब्धिसम्पूर्णं ॥

**णट्ठचउघाइकम्मं[1] केवलणाणेण मुणियतियलोयं ।**
**परमेट्ठी अरिहंतं परमप्पं परमझाणत्थं ॥ ४८० ॥**

नष्टचतुर्घातिकर्माणं केवलज्ञानेन ज्ञातत्रिलोकं ।
परमेष्ठिनमर्हन्तं परमात्मानं परमध्यानस्थं ॥

**झाणं झाऊण पुणो मज्झाण्हियवंदणत्थ[2] काऊणं ।**
**उवसंहरिय विसज्जउ जे पुव्वावाहिया देवा ॥ ४८१ ॥**

ध्याने ध्यात्वा पुनः मध्यान्हिकवन्दनामत्र कृत्वा ।
उपसंहृत्य विसर्जयेत् यान् पूर्वमाहूतान् देवान् ॥

---

१ घण ख. चउट्ठ क । २ वंदणं च ख. ।

एणविहाणेण फुडं पुज्जा जो कुणइ भत्तिसंजुत्तो ।
सो डहइ णियं पावं बंधइ पुण्णं तिजयखोहं ॥ ४८२ ॥

एतद्विधानेन स्फुटं पूजां यः करोति भक्तिसंयुक्तः ।
स दहति निजं पापं बध्नाति पुण्यं त्रिजगत्क्षोभं ॥

उववज्जइ दिवलोए भुंजइ भोए मणिच्छिए इट्ठे ।
बहुकालं चविय पुणो उत्तममणुयत्तणं लहई ॥ ४८३ ॥

उत्पद्यते स्वर्गलोके भुंक्ते भोगान् मनइच्छितान् इष्टान् ।
बहुकालं च्यूत्वा पुनः उत्तममनुष्यत्वं लभते ॥

होऊण चक्कवट्टी चउदहरयणेहि णवणिहाणेहिं ।
पालिय छक्खंडधरा भुंजिय भोए णिरुगरिट्ठा ॥ ४८४ ॥

भूत्वा चक्रवर्ती चतुर्दशरत्नैर्नवनिधानैः ।
पालयित्वा षट्खण्डधरां भुक्त्वा भोगान् निर्गरिष्टान् ॥

संपत्तबोहिलाहो रज्जं परिहरिय भविय णिग्गंथो ।
लहिऊण सयलसंजम धरिऊण महव्वया पंच ॥ ४८५ ॥

संप्राप्तबोधिलाभः राज्यं परिहृत्य भूत्वा निर्ग्रन्थः ।
लब्ध्वा सकलसंयमं धृत्वा महाव्रतानि पंच ॥

लहिऊण सुक्कझाणं उप्पाइय केवलं वरं णाणं ।
सिज्झेइ णट्ठकम्मो अहिसेयं लहिय मेरुम्मि ॥ ४८६ ॥

लब्ध्वा शुक्लध्यानं उत्पाद्य केवलं वरं ज्ञानं ।
सिद्ध्यति नष्टकर्मा अभिषेकं लब्ध्वा मेरौ ॥

इय णाऊण विसेसं पुण्णं आयरइ कारणं तस्स ।
पावहणं जाम सयलं संजमयं अप्पमत्तं च ॥ ४८७ ॥

इति ज्ञात्वा विशेषं पुण्यं अर्जयेत् कारणं तस्य ।
पापघ्नं यावत् सकलं संयमं अप्रमत्तं च ॥

**भावह अणुव्वयाइं पालह सीलं, च कुणह उववासं ।**
**पव्वे पव्वे णियमं, दिज्जह अणवरह दाणाइं ॥ ४८८ ॥**

भावयेत् अणुव्रतानि, पालयेत् शीलं, च कुर्यादुपवासं ।
पर्वे पर्वे, नियमं, दद्यात् अनवरतं दानानि ॥

**अभयपयाणं पढमं, विदियं तह होइ सत्थदाणं च ।**
**तइयं ओसहदाणं, आहारदाणं चउत्थं च ॥ ४८९ ॥**

अभयप्रदानं प्रथमं द्वितीयं भवति शास्त्रदानं च ।
तृतीयं त्वौषधदानं आहारदानं चतुर्थं च ॥

**सव्वेसिं जीवाणं अभयं जो देइ मरणभीरूणं ।**
**सो णिब्भओ तिलोए उत्तस्मो होइ सव्वेसिं ॥ ४९० ॥**

सर्वेषां जीवानां अभयं यो ददाति मरणभीरूणां ।
स निर्भयः त्रिलोके उत्कृष्टो भवति सर्वेषां ॥

**सुयदाणेण य लब्भइ मइसुइणाणं च ओहिमणणाणं ।**
**बुद्धितवेण य सहियं पच्छा वरकेवलं णाणं ॥ ४९१ ॥**

श्रुतदानेन च लभते मतिश्रुतज्ञानं च अवधिमनोज्ञानं ।
बुद्धितपोभ्या च सहितं पश्चाद्वरकेवलं ज्ञानं ॥

**ओसहदाणेण णरो अतुलियबलपरक्कमो महासत्तो ।**
**वाहिविमुक्कसरीरो चिराउ सो होइ तेयट्ठो ॥ ४९२ ॥**

१ अस्मादग्रे. ख–पुस्तके " उक्तं च "––
**ज्ञानवान् ज्ञानदानेन, निर्भयोऽभयदानतः ।**
**अन्नदानात्सुखी नित्यं, निर्व्याधिः भेषजाद्भवेत् ॥**

औषधदानेन नरोऽतुलितबलपराक्रमो महासत्वः ।
व्याधिविमुक्तशरीरश्चिरायुः स भवति तेजस्थः ॥

**दाणस्साहार फलं को सक्कइ वण्णिऊण भुवणयले ।**
**दिण्णेण जेण भोआ लब्भंति मणिच्छिया सव्वे ॥ ४९३**

दानस्य आहारस्य फलं कः शक्नोति वर्णयितुं भुवनतले ।
दत्तेन येन भोगा लभ्यन्ते मनइच्छिताः सर्वे ॥

**दायारो वि य पत्तं दाणविसेसो तहा विहाणं च**
**एए चउअहियारा णायव्वा होंति भव्वेण ॥ ४९४ ॥**

दातापि च पात्रं दानविशेषस्तथा विधानं च ।
एते चतुरधिकारा ज्ञातव्या भवन्ति भव्येण ॥

**दायारो उवसंतो, मणवयकाएण संजुओ दच्छो ।**
**दाणे कयउच्छाहो, पयडियवरछग्गुणो, अमयो ॥ ४९५॥**

दाता उपशान्तो, मनोवचनकायेन संयुक्तो, दक्षः, ।
दाने कृतोत्साहः, प्रकटितवरषड्गुणः, अमयः ॥

**भत्ती तुट्ठी य खमा सद्धा सत्तं च लोहपरिचाओ ।**
**विण्णाणं तक्काले सत्तगुणा होंति दायारे ॥ ४९६ ॥**

भक्तिः तुष्टिः क्षमा श्रद्धा सत्वं च लोभपरित्यागः ।
विज्ञानं तत्काले सप्तगुणा भवन्ति दातरि ॥

**तिविहं भणंति पत्तं मज्झिम तह उत्तमं जहण्णं च ।**
**उत्तमपत्तं साहू मज्झिमपत्तं च सावया भणिया ॥ ४९७ ।**

त्रिविधं भणन्ति पात्रं मध्यमं तथोत्तमं जघन्यं च ।
उत्तमपात्रं साधुः मध्यमपात्रं च श्रावका भणिताः ॥

---

१ विणइ ख. विनयी ।

**अविरइसम्मादिट्ठी जहण्णपत्तं तु अक्खियं समये ।**
**णाउं पत्तविसेसं दिज्जइ दाणाइं भत्तीए ॥ ४९८ ॥**

अविरतसम्यग्दृष्टिः जघन्यपात्रं तु कथितं समये ।
ज्ञात्वा पात्रविशेषं दद्यात् दानानि भक्त्या ॥

**मिच्छादिट्ठी पुरिसो दाणं जो देइ उत्तमे पत्ते ।**
**सो पावइ वरभोए फुडु उत्तमभोयभूमीसु ॥ ४९९ ॥**

मिथ्यादृष्टिः पुरुषो दानं यो ददाति उत्तमे पात्रे ।
स प्राप्नोति वरभोगान् स्फुटं उत्तमभोगभूमीषु ॥

**मज्झिमपत्ते मज्झिमभोयभूमीसु पावए भोए ।**
**पावइ जहण्णभोए जहण्णपत्तस्स दाणेण ॥ ५०० ॥**

मध्यमपात्रे मध्यमभोगभूमिषु प्राप्नोति भोगान् ।
प्राप्नोति जघन्यभोगान् जघन्यपात्रस्य दानेन ॥

**उत्तमछित्ते वीयं फलइ जहा लक्खकोडिगुणेहिं ।**
**दाणं उत्तमपत्ते फलइ तहा किमिच्छभणिएण ॥५०१॥**

उत्तमक्षिते बीजं फलति यथा लक्षकोटिगुणैः ।
दानं उत्तमपात्रे फलति तथा किमिच्छभणितेन ॥

**सम्मादिट्ठी पुरिसो उत्तमपुरिसस्स दिण्णदाणेण ।**
**उववज्जइ दिवलोए हवइ स महड्ढिओ देओ ॥ ५०२ ॥**

सम्यग्दृष्टिः पुरुष उत्तमपुरुषस्य दत्तदानेन ।
उपपद्यते स्वर्गलोके भवति स महर्द्धिको देवः ॥

**जहणीरं उच्छुगयं कालं परिणवइ अमयरूवेण ।**
**तह दाणं वरपत्ते फलेइ भोएहिं विविहेहिं ॥ ५०३ ॥**

---

१–४९९ और ५०० गाथासूत्रयोः ख–पुस्तके पौर्वापर्यं ।

यथा नीरमिक्षुगतं काले परिणमति अमृतरूपेण ।
तथा दानं वरपात्रे फलति भोगैः विविधैः ॥

**उत्तमरयणं खु जहा उत्तमपुरिसासियं च बहुमुल्लं ।**
**तह उत्तमपत्तगयं दाणं णिउणेहि णायव्वं ॥ ५०४ ॥**

उत्तमरत्नं खलु यथा उत्तमपुरुषाश्रितं च बहुमूल्यं ।
तथोत्तमपात्रगतं दानं निपुणैः ज्ञातव्यं ॥

**किं[1] किंचि वि वेयमयं किंचि वि पत्तं तवोमयं परमं ।**
**तं पत्तं संसारे तारणयं होइ[2] णियमेण ॥ ५०५ ॥**

।किं किंचिदपि वेदमयं किंचिदपि पात्रं तपोमयं परमं ।
तत्पात्रं संसारे तारकं भवति नियमेन ॥

**वेओ किल सिद्धंतो तस्सद्दा णवपयत्थछद्दव्वं ।**
**गुणमग्गणठाणा वि य जीवट्ठाणाणि सव्वाणि ॥ ५०६ ॥**

वेदः किल सिद्धान्तः तस्यार्थान्नवपदार्थषड्द्रव्याणि ।
गुणमार्गणास्थानान्यपि च जीवस्थानानि सर्वाणि ॥

**परमप्पयस्स रूवं, जीवकम्माण उहयसब्भावं, ।**
**जो जाणइ सविसेसं, वेयमयं होइ तं पत्तं ॥ ५०७ ॥**

परमात्मनो रूपं जीवकर्मणोरुभयोः स्वभावं ।
यो जानाति सविशेषं वेदमयं भवति तत्पात्रं ॥

**बहिरब्भंतरतवसा कालो परिखवइ जिणोवएसेण ।**
**दिढबंभचेर णाणी पत्तं तु तवोमयं भणियं[3] ॥ ५०८ ॥**

बाह्याभ्यन्तरतपसा कालं परिक्षिपति जिनोपदेशेन ।
दृढब्रह्मचर्यो ज्ञानी पात्रं तु तपोमयं भणितं ॥

---

१ किंचि वि वेयमयं पत्तं ख. २ भणियं. ख. । ३ होंति ख. । ४ व्वा ख. ।

जह णावा णिच्छिद्दा गुणमइया विविहरयणपरिपुण्णा ।
तारइ पारावारे बहुजलयरसंकडे भीमे ॥ ५०९ ॥

यथा नौः निश्छिद्रा गुणमया विविधरत्नपरिपूर्णा ।
तारयति पारावारे बहुजलचरसंकटे भीमे ॥

तह संसारसमुद्दे जाइजरामरणजलयराइण्णे ।
दुक्खसहस्सावत्ते तारेइ गुणाहियं पत्तं ॥ ५१० ॥

तथा संसारसमुद्रे जातिजरामरणजलचराकीर्णे ।
दुःखसहस्रावर्ते तारयति गुणाधिकं पात्रं ॥

कुच्छिगयं जस्सण्णं जीरइ तवझाणबंभचरिएहिं ।
सो[1] पत्तो णित्थारइ अप्पाणं चेव दायारं ॥ ५११ ॥

कुक्षिगतं यस्यान्नं जीर्यते तपोध्यानब्रह्मचर्यैः ।
तत्पात्रं निस्तारयति आत्मानं चैव दातारं ॥

एरिसपत्तम्मि वरे दिज्जइ आहारदाणमणवज्जं ।
पासुयसुद्धं अमलं जोग्गं मणदेहसुक्खयरं ॥ ५१२ ॥

एतादृशपात्रे वरे दद्यात् आहारदानमनवद्यं ।
प्रासुकशुद्धं अमलं योग्यं मनोदेहसुखकरं ॥

कालस्स य अणुरूवं रोयारोयत्तणं च णाऊणं ।
दायव्वं जहजोग्गं आहारं गेहवंतेण ॥ ५१३ ॥

कालस्य चानुरूपं रोगारोगत्वं ज्ञात्वा ।
दातव्यं यथायोग्यं आहारं गृहवता ॥

पत्तस्सेस सहावो जं दिण्णं दायगेण भत्तीए ।
तं करपत्ते सोहिय गहियव्वं विगयरएण ॥ ५१४ ॥

1 तं पत्तं ख ।

पात्रस्यैष स्वभावो यद्दत्तं दायकेन भक्त्या ।
तत्करपात्रे शोधयित्वा गृहीतव्यं विगतरागेन ॥

**दायारेण पुणो वि य अप्पाणो सुक्खमिच्छमाणेण ।**
**देयं उत्तमदाणं विहिणा वरणीयसत्तीए ॥ ५१५ ॥**

दात्रा पुनरपि च आत्मनः सुखमिच्छता ।
देयं उत्तमदानं विधिना वर्णितशक्त्या ॥

**जो[1] पुण हुंतइ धणकणइं[2] मुणिहिं कुभोयणु देइ ।**
**जम्मि जम्मि दालिद्दडउ पुट्ठिं ण तहो छंडेइ ॥ ५१६ ॥**

यः पुनः सति धनकनके मुनिभ्यः कुभोजनं ददाति ।
जन्मनि जन्मनि दारिद्र्यं पृष्ठिं न तस्य त्यजति ॥

**देहो पाणा रूवं विज्जा धम्मं तवो सुहं मोक्खं ।**
**सव्वं दिण्णं णियमा हवेइ आहारदाणेणं ॥ ५१७ ॥**

देहः प्राणा रूपं विद्या धर्मः तपः सुखं मोक्षः ।
सर्वं दत्तं नियमात् भवेत् आहारदानेन ॥

**भुक्खसमा ण हु वाही अण्णसमाणं च ओसहं णत्थि ।**
**तम्हा आहारदाणे आरोयत्तं हवे दिण्णं ॥ ५१८ ॥**

बुभुक्षासमो न हि व्याधिः अन्नसमानं च औषधं नास्ति ।
तस्मादाहारदानेन आरोग्यत्वं भवेद्दत्तं ॥

**आहारमओ देहो आहारेण विणा पडेइ णियमेण ।**
**तम्हा जेणाहारो दिण्णो देहो हवे तेण ॥ ५१९ ॥**

आहारमयो देह आहारेण विना पतति नियमेन ।
तस्माद्येनाहारो दत्तो देहो भवेत्तेन ॥

---

१ इदं दोहकं ख—पुस्तके उक्तं चेति लिखित्वा लिखितं । २ कणधणइं ख. ।

**ता देहो ता पाणा ता रूवं ताम णाणविण्णाणं ।**
**जामाहारो पविसइ देहे जीवाण सुक्खयरो ॥ ५२० ॥**

तावद्देहस्तावत्प्राणास्तावद्रूपं तावज्ज्ञानविज्ञानं ।
यावदाहारो प्रविशति देहे जीवानां सुखकरः ॥

**आहारसणे देहो देहेण तवो तवेण रयसडणं ।**
**रयणासेण य णाणं णाणे मुक्खो जिणो भणई ॥ ५२१ ॥**

आहाराशने देहो देहेन तपस्तपसा रजःसटनं ।
रजोनाशेन च ज्ञानं ज्ञाने मोक्षो जिनो भणति ॥

**चउविहदाणं उत्तं जं तं सयलमवि[1] होइ इह दिण्णं ।**
**सविसेसं दिण्णेण य इक्केणाहारदाणेण ॥ ५२२ ॥**

चतुर्विधदानं उक्तं यत् तत्सकलमपि भवति इह दत्तं ।
सविशेषं दत्तेन च एकेनाहारदानेन ॥

**भुक्खाकयमरणभयं णासइ जीवाण तेण तं अभयं ।**
**सो एव हणइ वाही उसहं तेण आहारो ॥ ५२३ ॥**

बुभुक्षाकृतमरणभयं नाशयति जीवानां तेन तदभयं ।
स एव हन्ति व्याधिं[2] औषधं तेनाहारः ॥

**आयाराईसत्थं आहारवलेण पढइ णिस्सेसं ।**
**तम्हा तं सुयदाणं दिण्णं आहारदाणेण ॥ ५२४ ॥**

आचारादिशास्त्रं आहारबलेन पठति निःशेषं ।
तस्मात् तच्छ्रुतदानं दत्तं आहारदानेन ॥

**हयगयगोदाणाइं धरणीरयकणयजाणदाणाइं[3] ।**
**तित्तिं ण कुणंति मया जह[4] तित्तिं कुणइ आहारो ॥ ५२५ ॥**

---

१ समलं पि ख. । २ क्षुद्व्याधिं । ३ धरणीरयकणयरयणदाणाइं ख. । ४ जेण क. ।

हयगजगोदानानि धरणीरत्नकनकयानदानानि ।

तृप्तिं न कुर्वन्ति सदा यथा तृप्तिं करोति आहारः ॥

**जह रइणाणं वइरं सेलेसु य उत्तमो जहा मेरू ।**

**तह दाणाणं पवरो आहारो होइ णायव्वो ॥ ५२६ ॥**

यथा रत्नानां वज्रं शैलेषु च उत्तमो यथा मेरुः ।

तथा दानानां प्रवर आहारो भवति ज्ञातव्यः ॥

**सो दायव्वो पत्ते विहाणजुत्तेण सा विही एसा ।**

**पडिगहमुच्चट्ठाणं पादोदयअंचणं च पणमं च ॥ ५२७ ॥**

स दातव्यः पात्रे विधानयुक्तेन स विधिरेषः ।

प्रतिग्रहमुच्चस्थानं पादोदकमर्चनं च प्रणामं च ॥

**मणवयणकायसुद्धी एसणसुद्धी य परम कायव्वा ।**

**होइ फुडं आयरणं णवव्विहं पुव्वकम्मेण ॥ ५२८ ॥**

मनवचनकायशुद्धिरेषणशुद्धिश्च परमा कर्तव्या ।

भवति स्फुटमाचरणं नवविधं पूर्वकर्मणा ॥

**एवं विहिणा[1] जुत्तं देयं दाणं तिसुद्धभत्तीए ।**

**वज्जिय कुच्छियपत्तं तह य अपत्तं च णिस्सारं ॥ ५२९ ॥**

एवं विधिना युक्तं देयं दानं त्रिशुद्धभक्त्या ।

वर्जयित्वा कुत्सितपात्रं तथा चापात्रं च निःसारं ॥

**जं रयणत्तयरहियं[3] मिच्छामयकहियधम्मअणुलग्गं ।**

**जइ वि हु तवइ सुघोरं तहा वि तं कुच्छियं पत्तं ॥५३०॥**

यद्रत्नत्रयरहितं मिथ्यामतकथितधर्मानुलग्नं ।

यद्यपि हि तप्यते सुघोरं तथापि तत्कुत्सितं पात्रं ॥

---

१ विहिणा ख. विधिना । २ पुन्न. ख. पुण्य । ३ सहियं क–पुस्तके । ४ यम. क. ।

**जस्स ण तवो ण चरणं ण चावि जस्सत्थि वरगुणो कोई ।**
**तं जाणेह अपत्तं अफलं दाणं कयं तस्स ॥ ५३१ ॥**

यस्य न तपो न चरणं न चापि यस्यास्ति वरगुणः कश्चित् ।
तज्जानीयादपात्रमफलं दानं कृतं तस्य ॥

**ऊसरखित्ते बीयं सुक्खे रुक्खे य णीरअहिसेओ ।**
**जह तह दाणमवत्ते दिण्णं खु णिरत्थयं होई ॥ ५३२ ॥**

ऊषरक्षेत्रे बीजं शुष्के वृक्षे च नीराभिषेकः ।
यथा तथा दानमपात्रे दत्तं खलु निरर्थकं भवति ॥

**कुच्छियपत्ते किंचि वि फलइ कुदेवेसु कुणरतिरिएसु ।**
**कुच्छियभोयधरासु य लवणंवुहिकालउवहीसु ॥ ५३३ ॥**

कुत्सितपात्रे किंचिदपि फलति कुदेवेषु कुनरतिर्यक्षु ।
कुत्सितभोगधरासु च लवणाम्बुधिकालोदधिषु ॥

**लवणे अडयालीसा कालसमुद्दे य तित्तिया चेव ।**
**अंतरदीवा भणिया कुभोयभूमीय विक्खाया ॥ ५३४ ॥**

लवणे अष्टचत्वारिंशत् कालसमुद्रे च तावन्त एव ।
अन्तर्द्वीपा भणिता कुभोगभूम्या विख्याताः ॥

**उप्पज्जंति मणुस्सा कुपत्तदाणेण तत्थ भूमीसु ।**
**जुवलेण गेहरहिया णग्गा तरुमूलि णिवसंति ॥ ५३५ ॥**

उत्पद्यन्ते मनुष्याः कुपात्रदानेन तत्र भूमिषु ।
युगलेन गृहरहिता नग्नाः तरुमूले निवसन्ति ॥

**पल्लोवमआउस्सा वत्थाहरणेहि वज्जिया णिच्चं ।**
**तरुपल्लवपुप्फरसं फलाण रसं चेव भक्खंति ॥ ५३६ ॥**

---

१ जुवलेय ख. ।

पल्योपमायुषः वस्त्राभरणेन वर्जिता नित्यं ।
तरुपल्लवपुष्परसं फलानां रसं चैव भक्षयन्ति ॥

**दीवे कहिं पि मणुया सक्करगुडखंडसण्णिहा भूमी ।**
**भक्खंति पुट्ठिजणया अइसरसा पुव्वकम्मेण[1] ॥ ५३७ ॥**

द्वीपे कापि मनुजाः शर्करागुडखण्डसन्निभां भूमिं ।
भक्षयन्ति पुष्टिजनकां अतिसरसां पूर्वकर्मणा ॥

**केई[2] गयसीहमुहा केई हरिमहिसकेविकोलमुहा ।**
**केई आदरिसमुहा केई पुण एयपाया य ॥ ५३८ ॥**

केचित् गजसिंहमुखाः केचिद्धरिमहिषकपिकोलूकमुखाः ।
केचिदादर्शमुखाः केचित्पुनः एकपादाश्च ॥

**ससमुक्कुलिकण्णा वि य कण्णप्पावरणदीहकण्णा य ।**
**लंगूलधरा अवरे अवरे मणुया अभासा य ॥ ५३९ ॥**

शशशष्कुलिकर्णा अपि च कर्णप्रावरणदीर्घकर्णाश्च ।
लाङ्गूलधरा अपरे अपरे मनुष्या अभाषकाश्च ॥

**एए णरा पसिद्धा तिरिया वि हवंति कुभोयभूमीसु ।**
**मणुसुत्तरबाहिरेसु अ असंखदीवेसु ते होंति ॥ ५४० ॥**

एते नराः प्रसिद्धाः तिर्यञ्चोऽपि भवन्ति कुभोगभूमिषु ॥
मानुषोत्तरबाह्ये च असंख्यद्वीपेषु ते भवन्ति ॥

**सव्वे मंदकसाया सव्वे णिस्सेसवाहिपरिहीणा ।**
**मरिऊण विंतरा वि हु जोइसुभवणेसु जायंति ॥ ५४१ ॥**

सर्वे मन्दकषायाः सर्वे निःशेषव्याधिपरिहीनाः ।
मृत्वा व्यन्तरेष्वपि हि ज्योतिर्भवनेषु जायन्ते ॥

---

१ पुण्योदयेन । २ केई ख—केचित् ।

तत्थ चुया पुणं[1] संता तिरियणरो[2] पुणं[3] हवंति ते सव्वे ।
काऊण तत्थ पावं पुणो[4] वि णिरयावहा[5] होंति ॥ ५४२ ॥

ततश्च्युताः पुनः सन्तः तिर्यङ्नराः पुनः भवन्ति ते सर्वे ।
कृत्वा तत्र पापं पुनरपि नरकपथा भवन्ति ॥

चंडालभिल्लछिंपियडोंवयकल्लाल एवमाईणि ।
दीसंति रिद्धिपत्ता कुच्छियपत्तस्स दाणेण ॥ ५४३ ॥

चण्डालभिल्लछिंपकडोंबकलवारा एवमादिकाः ।
दृश्यन्ते ऋद्धिप्राप्ताः कुत्सितपात्रस्य दानेन ॥

केई पुण गयतुरया गेहे रायाण उण्णई पत्ता ।
दिस्संति मच्चलोए कुच्छियपत्तस्स दाणेण ॥ ५४४ ॥

केचित्पुनः गजतुरगा गृहे राज्ञां उन्नतिं प्राप्ताः ।
दृश्यन्ते मर्त्यलोके कुत्सितपात्रस्य दानेन ॥

केई पुण दिवलोए उववण्णा वाहणत्तणेण ते मणुया ।
सोयंति जाइदुक्खं पिच्छिय रिद्धी सुदेवाणं ॥ ५४५ ॥

केचित्पुनः स्वर्गलोके उत्पन्ना वाहनत्वेन ते मनुजाः ।
सोचन्ति जातिदुःखं प्रेक्ष्य ऋद्धिं सुदेवानां ॥

णाऊण तस्स दोसं सम्माणह मा कया वि सिविणम्मि ।
परिहरह सया दूरं वुहियाण[6] वि सविससप्पं व ॥ ५४६ ॥

ज्ञात्वा तस्य दोषं सम्मानयेन्मा कदापि स्वप्ने ।
परिहरेत् सदा दूरं [illegible]..सविषसर्पवत् ? ॥

---

१ पणसत्ता क. पणासक्ता च्युतरक्ताः । २ णरे ख. । ३ पुण ण ख. । ४ पुणु वि ख. । ५ तिरियावहा. ख. । ६ छुहियाण विसविसमण्णं वा ख. ।

**पत्थरमया वि दोणी पत्थरमप्पाणयं च वोलेइ ।**
**जह तह कुच्छियपत्तं संसारे चेव वोलेइ ॥ ५४७ ॥**

प्रस्तरमय्यपि द्रोणी प्रस्तरमात्मानं च निमज्जयति ।
यथा तथा कुत्सितपात्रं संसारे एव निमज्जयति ॥

**णावा जह सच्छिद्दा परमप्पाणं च उवहिसलिलम्मि ।**
**वोलेइ तह कुपत्तं संसारमहोवही भीमे ॥ ५४८ ॥**

नौर्यथा सच्छिद्रा परमात्मानं चोदधिसलिले ।
निमज्जयति तथा कुपात्रं संसारमहोदधौ भीमे ॥

**लोहमए कुतरंडे लग्गो पुरिसो हु तीरिणीवाहे ।**
**वुड्डइ जह तह वुड्डइ कुपत्तसम्माणओ पुरिसो ॥ ५४९ ॥**

लोहमये कुतरण्डे लग्नः पुरुषो हि तीरणीवाहे ।
मज्जति यथा तथा मज्जति कुपात्रसम्मानकः पुरुषः ॥

**ण लहंति फलं गरुयं कुच्छियपहुछित्तसेविया पुरिसा ।**
**जह तह कुच्छियपत्ते दिण्णा[3] दाणा मुणेयव्वा ॥ ५५० ॥**

न लभन्ते फलं गुरुकं कुत्सितप्रभुच्छुप्तसेवकाः पुरुषाः ।
यथा तथा कुत्सितपात्रे दत्तानि दानानि मन्तव्यानि ॥

**णत्थि वयसीलसंजमझाणं तवणियमबंभचेरं च ।**
**एमेव भणइ पत्तं अप्पाणं लोयमज्झम्मि[4] ॥ ५५१ ॥**

---

१ गया क. । २ आलुंखिअ आलिद्धं छिक्कं छित्तं परामुसिअं । इत्येते आश्लिष्टार्थे । ३ दिण्णं दाणं मुणेयव्वं. ख. । ४ अस्मादग्रे गाथैका ख—पुस्तके. ।

**कलहमग्गंथधारी दाणमहादाणगहणसंतुट्ठा ।**
**चवला मुणि बहुभासी सवणो ण होइ सुद्धवयधारी ॥ १ ॥**

नास्ति व्रतशीलसंयमध्यानं तपोनियमब्रह्मचर्यं च ।
एवमेव भणति पात्रं आत्मानं लोकमध्ये ॥

**मयकोहलोहगहिओ उड्डियहत्थो य जायणासीलो ।**
**गिहवावारासत्तो[1] जो सो पत्तो कहं हवइ ॥ ५५२ ॥**

मदक्रोधलोभगर्हितः उत्थितहस्तश्च याचनाशीलः ।
गृहव्यापारासक्तः यः स पात्रं कथं भवति ॥

**हिंसाइदोसजुत्तो अट्टरउद्देहिं गमियअहरत्तो ।**
**कयविक्कयवट्टंतो इंदियविसएसु लोहिल्लो ॥ ५५३ ॥**

हिंसादिदोषयुक्त आर्तरौद्रैः गमिताहोरात्रः ।
क्रयविक्रयवर्तमानः इन्द्रियविषयेषु लुब्धः ॥

**उत्तमपत्तं णिंदिय गुरुठाणे अप्पयं पकुव्वंतो ।**
**होउं पावेण गुरू वुड्डइ पुण कुगइउवहिम्मि ॥ ५५४ ॥**

उत्तमपात्रं निन्दित्वा गुरुस्थाने आत्मानं प्रकुर्वन् ।
भूत्वा पापेन गुरुः ब्रुडति पुनः कुगत्युदधौ ॥

**जो बोलइ अप्पाणं संसारमहण्णवम्मि गरुयम्मि ।**
**सो अण्णं कह तारइ तस्साणुमग्गे जणं लग्गं ॥ ५५५ ॥**

यः निमज्जयति आत्मानं संसारमहार्णवे गुरुके ।
स अन्यं कथं तारयति तस्यानुमार्गे जनं लग्नं ॥

**एवं पत्तविसेसं णाऊणं देह दाणमणवरयं ।**
**णियजीवसग्गमोक्खं इच्छयमाणो पयत्तेण ॥ ५५६ ॥**

एवं पात्रविशेषं ज्ञात्वा देहि दानमनवरतं ।
निजजीवस्वर्गमोक्षाविच्छन् प्रयत्नेन ॥

---

१ गिहवावारमपसो ख. ।

लहिऊण संपया जो देइ ण दाणाइं मोहसंछण्णो ।
सो अप्पाणं अप्पे[1] वंचेइ य णत्थि संदेहो ॥ ५५७ ॥
लब्ध्वा सम्पत् यो ददाति न दानादि मोहसंछन्नः ।
स आत्मानं आत्मना वंचयति च नास्ति सन्देहः ॥
ण य देइ णेय[2] भुंजइ अत्थं णिखणेइं[3] लोहसंछण्णो ।
सो तणकयपुरिसो इव रक्खइ सस्सं परस्सत्थे ॥ ५५८ ॥
न च ददाति नैव भुंक्तेऽर्थं निक्षिपति लोभसंच्छन्नः ।
स तृणकृतपुरुष इव रक्षति सस्यं परस्यार्थे ॥
किविणेण संचियधणं ण होइ उवयारियं जहा तस्स ।
महुयरि इव संचियमहु हरंति अण्णे मपाणेहिं ॥ ५५९ ॥
कृपणेन संचितधनं न भवति उपकारकं यथा तस्य ।
मधुकरीव संचितमधु हरन्ति अन्ये सप्राणैः ॥
कस्स थिरा इह लच्छी कस्स थिरं जुव्वणं[4] धणं जीवं ।
इय मुणिऊण सुपुरिसा दिंति सुपत्तेसु दाणाइं ॥ ५६० ॥
कस्य स्थिरेह लक्ष्मीः कस्य स्थिरं यौवनं धनं जीवितं ।
इति ज्ञात्वा सुपुरुषा ददति सुपात्रेषु दानानि ।
दुक्खेण लहइ वित्तं वित्ते लद्धे वि दुल्लहं चित्तं ।
लद्धे चित्ते वित्ते सुदुल्लहो पत्तलंभो य ॥ ५६१ ॥
दुःखेन लभते वित्तं वित्ते लब्धेऽपि दुर्लभं चित्तं ।
लब्धे चित्ते वित्ते सुदुर्लभः पात्रलाभश्च ॥
चित्तं वित्तं पत्तं तिण्णि वि पावेइ कह वि जइ पुरिसो ।
तो ण लहइ अणुकूलं सयणं पुत्तं कलत्तं च ५६२ ॥

---

१ अप्पणं च्चि य. ख. । २ णय सइं भुंजइ क. । ३ रक्खेइ. ख. । ४ जोवणं ग. ।

चित्तं वित्तं पात्रं त्रीण्यपि प्राप्नोति कथमपि यदि पुरुषः ।
तर्हि न लभतेऽनुकूलं स्वजनं पुत्रं कलत्रं च ॥

**पडिकूलमाइ काउं विग्घं कुव्वंति धम्मदाणस्स ।**
**उवएसंति दुबुद्धिं दुग्गइगमकारया असुहा ॥ ५६३ ॥**

प्रतिकूलमादि कृत्वा विघ्नं कुर्वन्ति धर्मदानस्य ।
उपदिशन्ति दुर्बुद्धिं दुर्गतिगमकारकामशुभां ॥

**सो कह सयणो भण्णइ विग्घं जो कुणइ धम्मदाणस्स ।**
**दाऊण पावबुद्धी[1] पाडइ दुक्खायरे णरए ॥ ५६४ ॥**

स कथं स्वजनो भण्यते विघ्नं यः करोति धर्मदानस्य ।
दत्वा पापबुद्धिं पातयति दुःखाकरे नरके ॥

**सो सयणो सो बंधू सो मित्तो जो सहिज्जओ धम्मे ।**
**जो धम्मविग्घयारी सो सत्तू णत्थि संदेहो ॥ ५६५ ॥**

स स्वजनः स बन्धुः स मित्रं यः सहायकः धर्मे ।
यो धर्मविघ्नकारी स शत्रुः नास्ति सन्देहः ॥

**ते धण्णा लोयतए तेहि णिरुद्धाइं कुगइगमणाइं ।**
**वित्तं पत्तं चित्तं पाविवि जहिं दिण्णदाणाइं ॥ ५६६ ॥**

ते धन्या लोकत्रये तैर्निरुद्धानि कुगतिगमनानि ।
वित्तं पात्रं चित्तं प्राप्य यैः दत्तदानानि ॥

**मुणिभोयणेण दव्वं जस्स गयं जुव्वणं च तवयरणे ।**
**सण्णासेण य जीवं जस्स गयं किं गयं तस्स ॥ ५६७ ॥**

मुनिभोजनेन द्रव्यं यस्य गतं यौवनं च तपश्चरणे ।
सन्यासेन च जीवितं यस्य गतं किं गतं तस्स ॥

---

१ पापोपदेश ।

**जह जह वड्ढइ लच्छी तह तह दाणाइं देह पत्तेसु ।**
**अहवा हीयइ जह जह देह विसेसेण तह तह य॥ ५६८ ॥**

यथा यथा वर्धते लक्ष्मीः तथा तथा दानानि देहि पात्रेषु ।
अथवा हीयते यथा यथा देहि विशेषेण तथा तथा च ॥

**जेहिं ण दिण्णं दाणं ण चावि पुज्जा किया जिणिंदस्स ।**
**ते हीणदीणदुग्गय भिक्खं ण लहंति जायंता ॥ ५६९ ॥**

यैर्न दत्तं दानं न चापि पूजा कृता जिनेन्द्रस्य ।
ते हीनदीनदुर्गता भिक्षां न लभन्ते याचमानाः ॥

**परपेसणाइं[1] णिच्चं करंति भत्तीए[2] तह य णियपेट्टं ।**
**पूरंति ण णियघरे परवसगासेण जीवंति ॥ ५७० ॥**

परपेषणादिकं नित्यं कुर्वन्ति भक्त्या तथा च निजोदरं ।
पूरयन्ति न निजगृहे परवशग्रासेन जीवन्ति ॥

**खंधेण वहंति णरं गामत्थं दीहपंथसमसंता ।**
**तं चेव विण्णवंता मुहकयकरविणयसंजुत्ता ॥ ५७१ ॥**

स्कन्धेन वहन्ति नरं ग्रामार्थं दीर्घपथसमासक्ताः ।
तमेव विनमन्तः मुखकृतकरविनयसंयुक्ताः ॥

**पहु तुम्ह समं जायं कोमलअंगाइं सुट्ठुसुहियाइं ।**
**इय मुहपियाइं काऊं मलंति पाया सहत्थेहिं ॥ ५७२ ॥**

प्रभो ! युष्माकं समं जातानि कोमलाङ्गानि सुष्ठुसुभगानि ।
इति मुखप्रियाणि कृत्वा संवहन्ते पादान् स्वहस्ताभ्यां ॥

१ यंत्रेण धान्यदलनादिकर्म । २ यकारवदुच्चारणं अस्य ।

**रक्खंति गोगवाइं छेलयखरतुरयछेत्तखलिहाणं[1] ।**
**तूंणंति कप्पडाइं घडंति पिडउल्लयाइं च ॥ ५७३ ॥**

रक्षन्ति गोगवादिकं अजाखरतुरगक्षेत्रखलियानान् ।
तुर्णन्ति[3] कर्पटादिकं घटन्ते पिढैरादिकानि ॥

**धावंति मत्थहत्था उण्हं ण गणंति तह य सीयाइं ।**
**तुरयमुहफेणसित्ता रयलित्ता गलियपासेया ॥ ५७४ ॥**

धावन्ति शस्त्रहस्ता उष्णं न गणयन्ति तथा च शीतादि ।
तुरगमुखफेनसिक्ता रजोलिप्ता गलितप्रस्वेदाः ॥

**पिच्छिय परमहिलाओ घणथणमयणयणचंदवयणाइं[6] ।**
**ताडेइ णियं सीसं झूरइ हिययम्मि दीणमुहो ॥ ५७५ ॥**

प्रेक्ष्य परमहिलाः घनस्तनमदनयनचन्द्रवदनानि ।
ताडयति निजं शीर्षं झूरयति ( रुदति ) हृदये दीनमुखः ॥

**परसंपया णिएऊं पभणइ हा ! किं मया ण दिण्णाइं ।**
**दाणाइं पवरपत्ते उत्तमभत्तीय जुत्तेण ॥ ५७६ ॥**

परसम्पदः दृष्ट्वा प्रभणति हा किं मया न दत्तानि ।
दानानि प्रवरपात्रे उत्तमभक्त्या युक्तेन ॥

**एवं णाऊण फुडं लोहो उवसामिऊण णियचित्ते ।**
**णियवित्ताणुस्सारं दिज्जह दाणं सुपत्तेसु ॥ ५७७ ॥**

एवं ज्ञात्वा स्फुटं लोभं उपशम्य निजचित्ते ।
निजवित्तानुसारं देहि दानं सुपात्रेषु ॥

**जं उप्पज्जइ दव्वं तं कायव्वं च बुद्धिवंतेणँ ।**
**छहभायगयं सव्वं पढमो भावो हु धम्मस्स ॥ ५७८ ॥**

१ देश्यशब्दोऽयं । २ बु. ख. । ३ तन्तुवायकर्म कुर्वन्ति । ३ फलकपल्यंककवाटादिकं निर्मापयन्ति । ५ सीयं च ख. । ६ ओ ख. । वदनाः । ७ हि. ख. । द. ख. ।

यदुत्पद्यते द्रव्यं तत्कर्तव्यं च बुद्धिमता ।
षड्भागगतं सर्वं प्रथमो भागो हि धर्मस्य ॥

**बीओ भावो गेहे दायव्वो कुडुंबपोसणत्थेण ।**
**तइओ भावो भोए[1] चउत्थओ सयणवग्गम्मि ॥ ५७९ ॥**

द्वितीयो भागो गृहे दातव्यः कुटुम्बपोषणार्थे ।
तृतीयो भागः भोगे चतुर्थः स्वजनवर्गे ॥

**सेसा जे वे भावा ठायव्वा होंति ते वि पुरिसेण ।**
**पुज्जामहिमाकज्जे अहवा कालावकालस्स ॥ ५८० ॥**

शेषौ यौ द्वौ भागौ स्थापनीयौ भवतः तावपि पुरुषेण ।
पूजामहिमकार्ये[2] अथवा कालापकालाय ॥

**अहवा णियं विढत्तं कस्स वि मा देहि होहि लोहिल्लो ।**
**मो को वि कुणउ वाऊ जह तं दव्वं समं जाइ ॥ ५८१ ॥**

अथवा निजं वित्तं ? कस्यापि मा देहि भव लुब्धः ।
स कमपि कुरु उपायं यथा तद्द्रव्यं समं याति ॥

**तं दव्वं जाइ समं जं खीणं पुज्जमहिमदाणेहिं ।**
**जं पुण धराणिहत्तं णट्ठं तं जाणि णियमेण ॥ ५८२ ॥**

तद्द्रव्यं याति समं यत्क्षीणं पूजामहिमदानैः ।
यत्पुनः धरानिहितं नष्टं तज्जानीहि नियमेन ॥

**सइं ठाणाओ भुल्लइ अहवा मूसेहि णिज्जए तं पि ।**
**अह भाओ अह पुत्तो चोरो तं लेइ अह राओ ॥ ५८३ ॥**

स्वयं स्थानं विस्मरति अथवा मूषकैः नीयते तदपि ।
अथ भ्राता अथ पुत्रः चोरस्तत् गृह्णाति अथ राजा ॥

---

१ सभोए क. । २ पूजाद्यर्थमित्यर्थः ।

**अहवा तरुणी महिला जायइ अण्णेण जारपुरिसेण ।**
**सह तं गिण्हिय दव्वं अण्णं देसंतरं दुट्ठा ॥ ५८४ ॥**

अथवा तरुणी महिला याति अन्येन जारपुरुषेण ।
सह तद्गृहीत्वा द्रव्यं अन्यदेशान्तरं दुष्टा ॥

**इय जाणिऊण णूणं देह सुपत्तेसु चउविहं दाणं ।**
**जह कयपावेण मया मुच्चह लिप्पह सुपुण्णेण ॥ ५८५ ॥**

इति ज्ञात्वा नूनं देहि सुपात्रेषु चतुर्विधं दानं ।
यथा कृतपापेन सदा मुच्येत लिप्येत सुपुण्येन ॥

**पुण्णेण कुलं विउलं कित्ती पुण्णेण भमइ तइलोए ।**
**पुण्णेण रूवमतुलं सोहग्गं जोवणं तेयं ॥ ५८६ ॥**

पुण्येन कुलं विपुलं कीर्तिः पुण्येन भ्रमति त्रिलोके ।
पुण्येन रूपमतुलं सौभाग्यं यौवनं तेजः ॥

**पुण्णबलेणुववज्जइ कहमवि पुरिसो य भोयभूमीसु ।**
**भुंजेइ तत्थ भोए दहकप्पतरुब्भवे दिव्वे ॥ ५८७ ॥**

पुण्यबलेनोत्पद्यते कथमपि पुरुषश्च भोगभूमिषु ।
भुंक्ते तत्र भोगान् दशकल्पतरूद्भवान् दिव्यान् ॥

**गिहतरुवर वरगेहे भोयणरुक्खा य भोयणे सरिसे ।**
**कणयमयभायणाणि य भायणरुक्खा पयच्छंति ॥ ५८८ ॥**

गृहतरुवरा वरगृहानपि भोजनवृक्षाश्च भोजनानि सरसानि ।
कनकमयभाजनानि च भाजनवृक्षा प्रयच्छन्ति ॥

**वत्थंगा वरवत्थे कुसुमंगा दिंति कुसुममालाओ ।**
**दिंति सुयंधविलेवण विलेवणंगा महारुक्खा ॥ ५८९ ॥**

वस्त्राङ्गा वरवस्त्राणि कुसुमाङ्गा ददति कुसुममालाः ।
ददति सुगन्धविलेपनं विलेपनाङ्गा महावृक्षाः ॥

**तूरंगा वरतूरे मज्जंगा[1] दिंति सरसमज्जाइं ।**
**आहरणंगा दिंति य आहरणे कणयमणिजडिए ॥ ५९० ॥**

तूर्याङ्गा वरतौर्याणि मद्याङ्गा ददति सरसमद्यानि ।
आभरणाङ्गा ददति च आभरणानि कनकमणिजटितानि ॥

**रयणिदिणं ससिसूरा जह तह दीवंति जोइसारुक्खा ।**
**पायव दसप्पयारा चिंतिययं दिंति मणुयाणं ॥ ५९१ ॥**

रजनीदिनयोः शशिसूरा यथा तथा दीपन्ति ज्योतिर्वृक्षाः ।
पादपा दशप्रकाराः चिन्तितं ददति मनुष्येभ्यः ॥

**जरमोय वाहिवेअणकासं सासं च जिंभणं छिक्का ।**
**एए अण्णे दोसा ण हवंति हु भोयभूमीसु ॥ ५९२ ॥**

जराशोकव्याधिवेदनाकासं श्वसनं जृम्भणं क्षुतं ।
एते अन्ये दोषा न भवन्ति हि भोगभूमिषु ॥

**सव्वे भोए दिव्वे भुंजित्ता आउसावसाणम्मि ।**
**सम्मादिट्ठीमणुया कप्पावासेसु जायंति ॥ ५९३ ॥**

सर्वान् भोगान् दिव्यान् भुक्त्वा आयुरवसाने ।
सम्यग्दृष्टिमनुजाः कल्पवासिषु जायन्ते ॥

**जे पुणु मिच्छादिट्ठी विंतरभवणे सुजोइसा होंति ।**
**जम्हा मंदकसाया तम्हा देवेसु जायंति ॥ ५९४ ॥**

ये पुनर्मिथ्यादृष्टयः व्यन्तरभावनाः सुज्योतिष्का भवन्ति ।
यस्मान्मन्दकषाया तस्माद्देवेषु जायन्ते ॥

1 पानाङ्गाः ।

**केई समसरणगया[1] जोइसभवणे सुविंतरा देवा ।**
**गहिऊणं[2] सम्मदंसण तत्थ चुया हुंति वरपुरिसा ॥ ५९५ ॥**

केचित्समवशरणगता ज्योतिष्कभावना: सुव्यन्तरा देवा: ।
गृहीत्वा सम्यग्दर्शनं ततश्च्युता भवन्ति वरपुरुषा: ॥

**लहिऊण देसंसजम मयलं वा होइ सुरोत्तमो[3] सग्गे ।**
**भोत्तूण सुहे रम्मे पुणो वि अवयरइ मणुयत्ते[4] ॥ ५९६ ॥**

लब्ध्वा देशसंयमं सकलं वा भवति सुरोत्तम: स्वर्गे ।
भुक्त्वा शुभान् रम्यान् पुनरपि अवतरति मनुजत्वे ॥

**तत्थ वि सुहाइं भुत्तं दिक्खा गहिऊण भविय णिग्गंथो ।**
**सुक्कज्झाणं पाविय कम्मं हणिऊण सिज्झेइ ॥ ५९७ ॥**

तत्रापि शुभानि भुक्त्वा दीक्षां गृहीत्वा भूत्वा निर्ग्रन्थ: ।
शुक्लध्यानं प्राप्य कर्म हत्वा सिद्ध्यति ॥

**सिद्धं[5] सरूवरूवं कम्मरहियं च होइ झाणेण ।**
**सिद्धावासी य णरो ण हवइ संसारिओ जीवो ॥ ५९८ ॥**

सिद्धं स्वरूपरूपं कर्मरहितं च भवति ध्यानेन ।
सिद्धावासी च नरो न भवति संसारी जीव: ॥

**पंचमयं गुणठाणं एयं कहियं मया समासेण ।**
**एत्तो उड्ढं वोच्छं पमत्तयविरयं तु छट्ठमयं ॥ ५९९ ॥**

पंचमं गुणस्थानं एतत्कथितं मया समासेन ।
इत ऊर्ध्वं वक्ष्ये प्रमत्तविरत्तं तु षष्ठमकं ॥

इत्यविरतगुणस्थानं पंचमम् ।

---

१ केइ समवसरणया क. । २ लहिऊण. ख. । ३ होइ उत्तमे सग्गे. ख. । ४ स. क. ५ सिद्धसरूवं रूवं ख. ।

इत्थेव तिण्णि भावा खयउवसमाइं होंति गुणठाणे।
पणदह हुंति पमाया पमत्तविरओ हवे तम्हा ॥ ६०० ॥

अत्रैव त्रयो भावाः क्षयोपशमादयो भवन्ति गुणस्थाने।
पंचदश भवन्ति प्रमादाः प्रमत्तविरतो भवेत्तस्मात् ॥

[1]वत्तावत्तपमाए जो णिवसइ पमत्तसंजदो होइ। पंचसं १-
सयलगुणसीलकलिओ महव्वई चित्तलायरणो ॥ ६०१ ॥

व्यक्ताव्यक्तप्रमादे यो निवसति प्रमत्तसंयतो भवति।
सकलगुणशीलकलितो महाव्रती चित्रलाचरणः ॥

[2]विकहा तह य कसाया इंदिय णिद्दा तह य पणओ य।
चउ चउ पणमेगेगे हुंति पमाया हु पण्णरसा ॥ ६०२ ॥

विकथास्तथा च कषाया इन्द्रियाणि निद्रा तथा च प्रणयश्च।
चतस्रः चत्वारः पंच एका एकः भवन्ति प्रमादा हि पंचदश ॥

झायइ धम्मज्झाणं अट्टं पि य णोकसायउदयाओ।
सज्झायभावणाए उवसामइ पुणु वि झाणम्मि ॥ ६०३ ॥

ध्यायति धर्म्यध्यानं आर्तमपि नोकषायोदयात्।
स्वाध्यायभावनाभ्यां उपशाम्यति पुनरपि ध्याने ॥

तज्झाणजायकम्मं खवेइ आवासएहिं परिपुण्णो।
णिंदणगरहणजुत्तो जुत्तो पडिकमणकिरियाहिं ॥ ६०४ ॥

तद्ध्यानजातकर्म क्षिपति आवश्यकैः परिपूर्णः।
निन्दनगर्हणयुक्तो युक्तः प्रतिक्रमणक्रियाभिः ॥

जा[3]व पमाए वट्टइ जा ण थिरं थाइ णिच्चलं झाणं।
णिंदणगरहणजुत्तो आवासइ कुणइ ता भिक्खू ॥ ६०५ ॥

१-२ गाथाद्वयं गोम्मटसारेऽपि वर्तते। ३ जाम ख.।

यावत्प्रमादे वर्तते यावन्न स्थिरं तिष्ठति निश्चलं ध्यानं ।
निन्दनगर्हणयुक्तः आवश्यकानि करोति तावत् भिक्षुः ॥

**छट्ठमए गुणठाणे वट्टंतो परिहरेइ छावासं ।**
**जो साहु सो ण मुणई परमायमसारसंदोहं ॥ ६०६ ॥**

षष्ठमके गुणस्थाने वर्तमानः परिहरति षडावश्यकानि ।
यः साधुः स न जानाति परमागमसारसंदोहं ॥

**अहव मुणंतो छंडइ सव्वावासाइं सुत्तवद्धाइं ।**
**सो तेण होइ चत्तो सुआयमो जिणवरिंदस्स ॥ ६०७ ॥**

अथवा जानन् त्यजति सर्वावश्यकानि सूत्रबद्धानि ।
तर्हि तेन भवति त्यक्तः स्वागमो जिनवरेन्द्रस्य ॥

**आयमचाए चत्तो परमप्पा होइ तेण पुरिसेण ।**
**परमप्पयचाएण य मिच्छत्तं पोसियं होइ ॥ ६०८ ॥**

आगमत्यक्ते त्यक्तः परमात्मा भवति तेन पुरुषेण ।
परमात्मत्यागेन मिथ्यात्वं पोषितं भवति ॥

**एवं णाऊण सया जाम ण पावेहि णिच्चलं झाणं ।**
**मणसंकप्पविमुक्कं तावासय कुणह वयसहियं ॥ ६०९ ॥**

एवं ज्ञात्वा सदा यावन्न प्राप्नोति निश्चलं ध्यानं ।
मनःसंकल्पविमुक्तं तावदावश्यकं कुर्यात् व्रतसहितं ॥

**आवासयाइं कम्मं विज्जावच्चं च दाणपूजाइं ।**
**जं कुणइ सम्मदिट्ठी तं सव्वं णिज्जरणिमित्तं ॥ ६१० ॥**

आवश्यकादि कर्म वैयावृत्त्यं च दानपूजादि ।
यत्करोति सम्यग्दृष्टिस्तत्सर्वं निर्जरानिमित्तं ॥

---

१ या ख. ।

**जस्स ण णहगामित्तं पायविलेओ ण ओसहीलेवो ।**
**सो णावाइ समुद्दं तारेइ किमिच्छभणीएण ॥ ६११ ॥**

यस्य न नभोगामित्वं पादविलेपो न औषधिलेपः ।
स नौरिव ? समुद्रं तारयति किमिच्छभणितेन ॥

**जा संकप्पो चित्ते सुहासुहो भोयणाइकिरियाओ ।**
**ता कुणउ सो वि किरियं पडिकमणाई य णिस्सेसं ॥६१२॥**

यावत्संकल्पश्चित्ते शुभाशुभः भोजनादिक्रियातः ।
तावत्करोतु तामपि क्रियां प्रतिक्रमणादिकां च निःशेषां ॥

**एसो पमत्तविरओ साहु मए कहिउ समासेण ।**
**एत्तो उड्ढं वोच्छं अप्पमत्तो णिसामेह ॥ ६१३ ॥**

एष प्रमत्तविरत्तः साधु मया कथितः समासेन ।
इत ऊर्ध्वं वक्ष्येऽप्रमत्तं निशाम्यत ॥

इति प्रमत्तगुणस्थानं षष्ठम् ।

---

**णट्ठासेसपमाओ वयगुणसीलेहिं मंडिओ णाणी ।**
**अणुवसमओ अखवओ झाणणिलीणो हु अप्पमत्तो सो।६१४।**

नष्टाशेषप्रमादो व्रतगुणशीलैर्मंडितो ज्ञानी ।
अनुपशमकोऽक्षपको ध्याननिलीनो हि अप्रमत्तः सः ॥

**पुव्वुत्ता जे भावा हवंति तिण्णेव तत्थ णायव्वा ।**
**मुक्खं धम्मज्झाणं हवेइ णियमेण इत्थेव ॥ ६१५ ॥**

पूर्वोक्ता ये भावा भवन्ति त्रय एव तत्र ज्ञातव्याः ।
मुख्यं धर्म्यध्यानं भवेत् नियमेन अत्रैव ॥

---

१ वणसणायाइं क. नावइ ख. । २ प्राकृतपंचसंग्रहेऽपीयं गाथा वर्तते ।

**झायारो पुण झाणं झेयं तह हवइ फलं च तस्सेव ।**
**एए चउअहियारा णायव्वा होंति णियमेण ॥ ६१६ ॥**

ध्याता पुनर्ध्यानं ध्येयं तथा भवति फलं च तस्यैव ।
एते चतुरधिकारा ज्ञातव्या भवन्ति नियमेन ॥

**आहारासणणिद्दा विजओ तह इंदियाण पंचण्हं ।**
**वावीसपरिसहाणं[1] कोहाईणं कसायाणं ॥ ६१७ ॥**

आहारासननिद्राणां विजयस्तथा इन्द्रियाणां पंचानां ।
द्वाविंशतिपरीषहानां क्रोधादीनां कषायाणां ॥

**णिस्संगो[2] णिम्मोहो णिग्गयवावारकरणसुत्तड्ढो ।**
**दिढकाओ थिरचित्तो एरिसओ होइ झायारो ॥ ६१८ ॥**

निःसंगो निर्मोहो निर्गतव्यापारकरणसूत्राढ्यः ।
दृढकायः स्थिरचित्त एतादृशो भवति ध्याता ॥

ध्याता ।

---

**चित्तणिरोहे झाणं चउविहभेयं च तं मुणेयव्वं ।**
**पिंडत्थं च पयत्थं रूवत्थं रूववज्जियं चेव ॥ ६१९ ॥**

चित्तनिरोधे ध्यानं चतुर्विधभेदं च तन्मन्तव्यं ।
पिण्डस्थं च पदस्थं रूपस्थं रूपवर्जितं चैव ॥

**पिंडो वुच्चइ देहो तस्स मज्झट्ठिओ हु णियअप्पा ।**
**झाइज्जइ अइसुद्धो विप्फुरिओ सेयकिरणट्ठो ॥ ६२० ॥**

पिण्ड उच्यते देहस्तस्य मध्यस्थितो हि निजात्मा ।
ध्यायते अतिशुद्धो विस्फुरितः सितकिरणस्थः ॥

---

१ परीसह ख. । २ इदं गाथासूत्रं क–पुस्तके नास्ति, प्रकरणानुसारित्वाद-वश्यभाव्यत्वादत्र ख–पुस्तकात्संयोजितं । ३ पाठोऽयं क–पुस्तके नास्ति ।

**देहत्थो झाइज्जइ देहस्संबंधविरहिओ णिच्चं ।**
**णिम्मलतेय फुरंतो गयणयले सूरविंवेव ॥ ६२१ ॥**

देहस्थो ध्यायते देहसम्बन्धविरहितो नित्यं ।
निर्मलतेजसा स्फुरन् गगनतले सूर्यबिम्ब इव ॥

**जीवपएसप्पचयं पुरिसायारं हि णिययदेहत्थं ।**
**अमलगुणं झायंतं झाणं पिंडत्थअहिहाणं ॥ ६२२ ॥**

जीवप्रदेशप्रचयं पुरुषाकारं हि निजदेहस्थं ।
अमलगुणं ध्यायन् ध्यानं पिण्डस्थाभिधानं ॥

पिंडस्थम् ।

---

**जारिसओ देहत्थो झाइज्जइ देहबाहिरे तह य ।**
**अप्पा सुद्धसहावो तं रूवत्थं फुडं झाणं ॥ ६२३ ॥**

यादृशो देहस्थो ध्यायते देहबाह्ये तथा च ।
आत्मा शुद्धस्वभावस्तद्रूपस्थं स्फुटं ध्यानं ॥

**रूवत्थं पुण दुविहं सगयं तह परगयं च णायव्वं ।**
**तं परगयं भणिज्जइ झाइज्जइ जत्थ पंचपरमेट्ठी ॥ ६२४ ॥**

रूपस्थं पुनः द्विविधं स्वगतं तथा परगतं च ज्ञातव्यं ।
तत्परगतं भण्यते ध्यायते यत्र पंचपरमेष्ठी ॥

**सगयं तं रूवत्थं झाइज्जइ जत्थ अप्पणो अप्पा ।**
**णियदेहस्स बहित्थो फुरंतरवितेयसंकासो ॥ ६२५ ॥**

स्वगतं तु रूपस्थं ध्यायते यत्र आत्मना आत्मा ।
निजदेहाद्बहिस्थः स्फुरद्रवितेजःसंकाशः ॥

---

१ ध्यायतीति क्रियाध्याहारः । २ पाठोऽयं क–पुस्तके नास्ति ।

रूपस्थम् ।

देवच्चणाविहाणं जं कहियं देसविरयठाणम्मि ।
होइ पयत्थं झाणं कहियं तं वरजिणिंदेहि ॥ ६२६ ॥

देवार्चनाविधानं यत्कथितं देशविरतस्थाने ।
भवति पदस्थं ध्यानं कथितं तद्वरजिनेन्द्रैः ॥

एयपयमक्खरं वा जवियइ जं पंचगुरुवसंबंधं ।
तं पि य होइ पयत्थं झाणं कम्माण णिद्दहणं ॥ ६२७ ॥

एकपदमक्षरं वा जप्यते यत्पंचगुरुसम्बन्धं ।
तदपि च भवति पदस्थं ध्यानं कर्मणां निर्दहनं ॥

पदस्थम् ।

ण य चिंतइ देहत्थं देहबहित्थं ण चिंतए किं पि ।
ण सगयपरगयरूवं तं गयरूवं णिरालंवं ॥ ६२८ ॥

न च चिन्तयति देहस्थं देहबाह्यस्थं न चिन्तयेत्किमपि ।
न स्वगतपरगतरूपं तद्गतरूपं निरालम्बं ॥

जत्थ ण करणं चिंता अक्खररूवं ण धारणा धेयं ।
ण य वावारो कोई चित्तस्स य तं णिरालंवं ॥ ६२९ ॥

यत्र न करणं चिन्ता अक्षररूपं न धारणा ध्येयं ।
न च व्यापारः कश्चिच्चित्तस्य च तन्निरालम्बं ॥

इंदियविसयवियारा जत्थ खयं जंति रायदोसं च ।
मणवावारा सव्वे तं गयरूवं मुणेयव्वं ॥ ६३० ॥

१–२ क–पुस्तके नास्ति । रूपातीत

इन्द्रियविषयविकारा यत्र क्षयं यान्ति रागद्वेषौ च ।
मनोव्यापाराः सर्वे तद्गतरूपं मन्तव्यं ॥

गतरूपं, इति ध्यानम् ।

---

झेयं तिविहपयारं अक्खर-रूवं तह अरूवं च ।
रूवं परमेट्ठिगयं अक्खरयं तेसिमुच्चारं ॥ ६३१ ॥

ध्येयं त्रिविधप्रकारं अक्षर-रूपं तथाऽरूपं च ।
रूपं परमेष्ठिगतं अक्षरकं तेषामुच्चारणं ॥

गयरूवं जं झेयं जिणेहि भणियं पि तं णिरालंवं ।
सुण्णं पि तं ण सुण्णं जम्हा रयणत्तयाइण्णं ॥ ६३२ ॥

गतरूपं यद्ध्येयं जिनैर्भणितमपि तन्निरालंबं ।
शून्यमपि तन्न शून्यं यस्माद्रत्नत्रयाकीर्णं ॥

[1]ध्येयम् ।

---

झाणस्स फलं तिविहं कहंति वरजोइणो विगयमोहा ।
इहभवपरलोयभवं सव्वंकम्मक्खए तइयं ॥ ६३३ ॥

ध्यानस्य फलं त्रिविधं कथयन्ति वरयोगिनो विगतमोहाः ।
इहभवपरलोकभवं सर्वकर्मक्षये तृतीयं ॥

झाणस्स य सत्तीए जायंति अईसयाणि विविहाणि ।
दूरालोयणपहुई झाणे आएसकरणं च ॥ ६३४ ॥

ध्यानस्य च शक्त्या जायन्ते अतिशयानि विविधानि ।
दूरालोकनप्रभृतीनि ध्याने आदेशकरणं च ॥

---

१ क-पुस्तके नास्ति । २ पुस्तकद्वयेऽपि नास्ति ।

**मइसुइओहीणाणं मणपज्जय केवलं तहा णाणं ।**
**रिद्धीओ सव्वाओ जइपूया[1] इह फलं झाणे[2] ॥ ६३५ ॥**

मतिश्रुतावधिज्ञानं मनःपर्ययः केवलं तथा ज्ञानं ।
ऋद्धयः सर्वा यतिपूजा इह फलं ध्याने ॥

**सक्काईइंदत्तं अहमिंदत्तं च सग्गलोयम्मि ।**
**लोयंतियदेवत्तं तं परभवगयफलं झाणे ॥ ६३६ ॥**

शक्रादीन्द्रत्वं अहमिन्द्रत्वं च स्वर्गलोके ।
लौकान्तिकदेवत्वं तत्परभवगतफलं ध्याने ॥

**तणुपंचस्स य णासो सिद्धसरूवस्स चेव उप्पत्ती ।**
**तिहुयणपहुत्तलाहो लाहो य अणंतविरियस्स ॥ ६३७ ॥**

तनुपंचानां नाशः सिद्धस्वरूपस्य चैवोत्पत्तिः ।
त्रिभुवनप्रभुत्वलाभो लाभश्चानन्तवीर्यस्य ॥

**अट्ठगुणाणं लद्धी लोयसिहरग्गखित्तसंवासो ।**
**तइयफलं कहियमिणं जिणवरचंदेहि झाणस्स ॥ ६३८ ॥**

अष्टगुणानां लब्धिः लोकशिखराग्रक्षेत्रसंवासः ।
तृतीयफलं कथितमिदं जिनवरचन्द्रैर्ध्यानस्य ॥

**एवं धम्मज्झाणं कहियं अपमत्तगुण समासेण ।**
**सालंबमणालंबं तं मुक्खं इत्थ[3] णायव्वं ॥ ६३९ ॥**

एवं धर्म्यध्यानं कथितं अप्रमत्तगुणे समासेन ।
सालम्बमनालंबं तन्मुख्यं अत्र ज्ञातव्यं ॥

---

१ जिण. ख. । २ " अस्टासोर्डीप् " इति त्रैविक्रमेण तृतीयास्थाने सप्तमी एवमन्यत्रापि । ३ तत्थ ख. ।

**एदम्हि गुणट्ठाणे अत्थि[1] आवासयाण परीहारो ।**
**झाणमणम्मि[2] थिरत्तं णिरंतरं अत्थि[3] तं जम्हा ॥ ६४० ॥**

एतस्मिन् गुणस्थाने अस्ति आवश्यकानां परिहारः ।
ध्यानमनसि स्थिरत्वं निरन्तरं अस्ति तद्यस्मात् ॥

**सत्तमयं गुणठाणं कहियं अपमत्तणामसंजुत्तं ।**
**एत्तो अपुव्वणामं वुच्छामि जहाणुपुव्वीए ॥ ६४१ ॥**

सप्तमकं गुणस्थानं कथितं अप्रमत्तनामसंयुक्तं ।
इतोऽपूर्वनाम वक्ष्यामि यथानुपूर्व्या ॥

इत्यप्रमत्तगुणस्थानं सप्तमम् ।

---

**तं दुब्भेयपउत्तं खवयं उवसामियं च णायव्वं ।**
**खवए खवओ भावो उवसमए होइ उवसमओ ॥ ६४२ ॥**

तद्द्विभेदप्रोक्तं क्षपकमुपशमकं च ज्ञातव्यं ।
क्षपके क्षपको भाव उपशमके भवति उपशमकः ॥

**खवएसु उवसमेसु य अउव्वणामेसु हवइ तिपयारं ।**
**सुक्कज्झाणं णियमा पुहुत्तसवियक्कसवियारं[4] ॥ ६४३ ॥**

---

१ अत्थि ण आवासयाग. क. । २ झाणम्मि अइथिरत्तं ख. । ३ णत्थि. क. ।
४ अस्मादग्रेऽयं पाठः ख-पुस्तके। उक्तं च--

श्रुते चिन्ता वितर्कः स्याद्वीचारः संक्रमो मतः ।
पृथक्त्वं स्यादनेकत्वं भवत्येतत्त्रयात्मकं ॥ १ ॥

तद्यथा—

द्रव्याद्द्रव्यान्तरं याति गुणाद्गुणान्तरं व्रजेत् ॥
पर्यायादन्यपर्यायं सपृथक्त्वं भवत्यतः ॥ २ ॥
सुशुद्धात्मानुभूत्यात्मा भावश्रुतावलम्बनात् ।
अन्तर्जल्पो वितर्कः स्याद्यस्मिंस्तु सवितर्कजं ॥ ३ ॥
अर्थादर्थान्तरे शब्दाच्छब्दान्तरे च संक्रमः ।
योगाद्योगान्तरे यत्र सवीचारं तदुच्यते ॥ ४ ॥

क्षपकेषु उपशमेषु चापूर्वनामसु भवति त्रिप्रकारं ।
शुक्लध्यानं नियमात् पृथक्त्वसवितर्कसविचारं ॥

**पज्जायं च गुणं वा जम्हा दव्वाण मुणइ भेएण ।**
**तम्हा पुहुत्तणामं भणियं झाणं मुणिंदेहिं[1] ॥ ६४४ ॥**

पर्यायं च गुणं वा यस्मात् द्रव्याणां जानाति भेदेन ।
तस्मात्पृथक्त्वनाम भणितं ध्यानं मुनीन्द्रैः ॥

**भणियं सुयं वियक्कं वट्टइ सह तेण तं खु अणवरयं ।**
**तम्हा तस्स वियक्कं सवियारं पुण भणिस्सामो ॥ ६४५ ॥**

भणितं श्रुतं वितर्कं वर्तते सह तेन तत्खलु अनवरतं ।
तस्मात्तस्य वितर्कं सवीचारं पुनर्भणिष्यामः ॥

**जोएहिं तीहिं वियरइ अक्खरअत्थेसु तेण सवियारं ।**
**पढमं सुक्कज्झाणं अतिक्खपरसोवमं भणियं ॥ ६४६ ॥**

योगैः त्रिभिः विचरति अक्षरार्थेषु तेन सविचारं ।
प्रथमं शुक्लध्यानं अतीक्ष्णपरशूपमं भणितं ॥

**जह चिरकालो लग्गइ अतिक्खपरसेण रुक्खविच्छेएं[2] ।**
**तह कम्माण य हणणे चिरकालो पढमसुक्कम्मि ॥६४७॥**

यथा चिरकालो लगति अतीक्ष्णपरशुना वृक्षविच्छेदे ।
तथा कर्मणां च हनने चिरकालः प्रथमशुक्ले ॥

---

१ अस्मादग्रेऽयं पाठः ख-पुस्तके. । सहभाविनो गुणाः, क्रमभाविनो पर्यायाः, आत्मद्रव्ये ज्ञानदर्शनादयो गुणा नरनारकादयो भवपर्यायाः उक्तं च—

सहभूता गुणा ज्ञेयाः सुवर्णे पीतता यथा ।
क्रमभूतास्तु पर्याया जीवे गत्यादयो यथा ॥ १ ॥

२ पुस्तकद्वयेऽपि 'विच्छेओ' इति पाठः ।

**खइएण[1] उवसमेण य कम्माणं जं अउव्वपरिणामो ।**
**तम्हा तं गुणठाणं अउव्वणामं तु तं भणियं[2] ॥ ६४८ ॥**

क्षयेणोपशमेन च कर्मणां यदपूर्वपरिणामः ।
तस्मात्तद्गुणस्थानं अपूर्वनाम तु तद्भणितं ॥

इत्यपूर्वनामगुणस्थानमष्टमम् ।

---

**जह तं अउव्वणामं अणियट्टी तह य होइ णायव्वं ।**
**उवसमखाइयभावं हवेइ[3] फुडु तम्हि ठाणम्मि ॥ ६४९ ॥**

यथा तदपूर्वनाम अनिवृत्ति तथा च भवति ज्ञातव्यं ।
औपशमिकक्षायिकभावौ भवतः स्फुटं तस्मिन् गुणस्थाने ॥

**सुक्कं तत्थ पउत्तं जिणेहिं पुव्वुत्तलक्खणं झाणं ।**
**णत्थि णियत्ती पुणरवि जम्हा अणियट्टि तं तम्हा ॥६५०॥**

शुक्लं तत्र प्रोक्तं जिनैः पूर्वोक्तलक्षणं ध्यानं ।
नास्ति निवृत्तिः पुनरपि यस्मात् अनिवृत्ति तत्तस्मात् ॥

**हुंति[4] अणियट्टिणो ते पडिसमयं जस्स[5] एक्कपरिणामं[6] ।**
**विमलयरझाणहुअवहसिहाहिं णिद्दड्ढकम्मवणा ॥६५१॥**

भवन्ति अनिवर्तिनस्ते प्रतिसमयं येषां एकपरिणामः ।
विमलतरध्यानहुतवहशिखाभिः निर्दग्धकर्मवनाः ॥

इत्यनिवृत्तिगुणस्थानं नवमम् ।

---

१ खएणेति पुस्तकद्वये २ कहियं. ख. । ३ हवंति क । ४ गोम्मटसारेऽपीयं गाथा । ५ जम्मि ख. 'जस्सि' अन्यत्र । ६ मो ।

**जह अणियट्टि पउत्तं खाइयउवसमियसेढिसंजुत्तं ।**
**तह सुहुमसंपरायं दुब्भेयं होइ जिणकहियं ॥ ६५२ ॥**

यथाऽनिवृत्ति प्रोक्तं क्षायिकौपशमिकश्रेणिसंयुक्तं ।
तथा सूक्ष्मसाम्परायं द्विभेदं भवति जिनकथितं ॥

**तत्थेव हि दो भावा झाणं पुणु तिविहभेय तं सुक्कं ।**
**लोहकसाए सेसे ममलत्तं[1] होइ चित्तस्स ॥ ६५३ ॥**

तत्रैव हि द्वौ भावौ ध्यानं पुनः त्रिविधभेदं तच्छुक्लं ।
लोभकषाये शेषे समलत्वं भवति चित्तस्य ॥

**जह[2] कोसुंभयवत्थं होइ सया सुहुमरायसंजुत्तं ।**
**एवं सुहुमकसाओ सुहुमसराओत्ति णिद्दिट्ठो ॥ ६५४ ॥**

यथा कौसुम्भ वस्त्रं भवति सदा सूक्ष्मरागसंयुक्तं ।
एवं सूक्ष्मकषायः सूक्ष्मसराग इति निर्दिष्टः ॥

इति सूक्ष्मसाम्परायगुणस्थानं दशमम् ।

---

**जो उवसमइ कसाए मोहस्संबंधिपयडिवूहं च ।**
**उवसामओत्ति भणिओ खवओ णामं ण सो लहइ ॥६५५॥**

य उपशाम्यति कषायान् मोहस्य सम्बन्धिप्रकृतिव्यूहं च ।
उपशामक इति भणितः क्षपकः नाम न लभते ॥

**सुक्कज्झाणं पढमं भाओ पुण तत्थ उवसमो भणिओ ।**
**मोहोदयाउ कोई पडिऊण य जाइ मिच्छत्तं ॥ ६५६ ॥**

शुक्लध्यानं प्रथमं भावः पुनः तत्रोपशमः भणितः ।
मोहोदयात् कश्चित् प्रतिपत्य च याति मिथ्यात्वं ॥

---

१ णिव्वत्तं ख. । २ प्राकृतपंचसंग्रहेऽपीयं गाथा । तत्र ' धुदकोसुंभयवत्थं, इति पाठः ।

**कोई पमायरहियं ठाणं आसिज्ज पुण वि आरुहइ ।**
**चरमसरीरो जीवो खवयसेढीं च रयहणणे ॥ ६५७ ॥**

कश्चित्प्रमादरहितं स्थानमाश्रित्य पुनरप्यारोहयति ।
चरमशरीरो जीवः क्षपकश्रेणिं च रजोहनने ॥

**कालं काउं कोई तत्थ य उवसामगे गुणट्ठाणे ।**
**सुक्कज्झाणं झाइय[1] उववज्जइ सव्वसिद्धीए ॥ ६५८ ॥**

कालं कृत्वा कश्चित्तत्रोपशमके गुणस्थाने ।
शुक्लध्यानं ध्यात्वोत्पद्यते सर्वार्थसिद्धौ ॥

**हेट्ठट्ठिओ हु चेट्ठइ पंको सरपाणियम्मि जह सरई[2] ।**
**तह मोहो तम्मि गुणे हेउं लहिऊण उल्लैलइ[3] ॥ ६५९ ॥**

अधःस्थितो हि चेष्टते पंकः सरःपानीये यथा शरदि ।
तथा मोहस्तस्मिन् गुणे हेतुं लब्ध्वा उद्गच्छति ॥

**जो खवयसेढिरूढो ण होइ उवसामिओत्ति सो जीवो ।**
**मोहक्खयं कुणंतो उत्तो खवओ जिणिंदेहिं ॥ ६६० ॥**

यः क्षपकश्रेण्यारूढो न भवति उपशामक इति स जीवः ।
मोहक्षयं कुर्वन् उक्तः क्षपको जिनेन्द्रैः ॥

इत्युपशान्तगुणस्थानमेकादशम ।

**णिस्सेसमोहखीणे खीणकसायं तु णामगुणठाणं ।**
**पावइ जीवो णूणं खाइयभावेण संजुत्तो ॥ ६६१ ॥**

निःशेषमोहक्षीणे क्षीणकषायं तु नाम गुणस्थानं ।
प्राप्नोति जीवो नूनं क्षायिकभावेन संयुक्तः ॥

१ झायइ क. ख. । २ ए. ख. । ३ समुल्लसइ ख. ।

**जह सुद्धफलियभायणि खित्तं णीरं खु णिम्मलं सुद्धं।**
**तह णिम्मलपरिणामो खीणकसाओ मुणेयव्वो ॥ ६६२ ॥**

यथा शुद्धस्फटिकभाजने क्षिप्तं नीरं खलु निर्मलं शुद्धं ।
तथा निर्मलपरिणामः क्षीणकषायो मन्तव्यः ॥

**सुक्कज्झाणं बीयं भणियं सवियक्कएक्कअवियारं ।**
**माणिक्कसिहाचवलं[1] अत्थि तहिं णत्थि संदेहो ॥ ६६३ ॥**

शुक्लध्यानं द्वितीयं भणितं सवितर्कैकत्वाविचारं ।
माणिकशिखाचपलं अस्ति तत्र नास्ति सन्देहः ॥

**होऊण खीणमोहो हणिऊण य मोहविडविवित्थारं ।**
**घाइत्तयं च घाइय दुचरिमसमएसु झाणेण[2-3] ॥ ६६४ ॥**

भूत्वा क्षीणमोहो हत्वा च मोहविटपिविस्तारं ।
घातित्रिकं च घातयित्वा द्विचरमसमयेषु ध्यानेन ॥

**घाइचउक्कविणासे उप्पज्जइ सयलविमलकेवलयं ।**
**लोयालोयपयासं णाणं णिरुपद्दवं णिच्चं ॥ ६६५ ॥**

---

१ माणिक्कसिहा अचलं ख. । २ झाणेसु. ख. । ३ अस्मादग्रे 'उक्तं च' पाठः ख–पुस्तके ।

**अपृथक्त्वमवीचारं सवितर्कगुणान्वितं ।**
**सन्ध्यायस्येकयोगेन शुक्लध्यानं द्वितीयकं ॥ १ ॥**

तद्यथा—

**निजात्मद्रव्यमेकं वा पर्यायमथवा गुणं ।**
**निश्चलं चिन्त्यते यत्र तदेकत्वं विदुर्बुधाः ॥ २ ॥**
**तद्द्रव्यगुणपर्यायपरावर्तविवर्जितं ।**
**चिन्तनं तदवीचारं स्मृतं सद्ध्यानकोविदैः ॥ ३ ॥**
**निजशुद्धात्मनिष्ठत्वाद्भावश्रुतावलम्बनात् ।**
**चिंतनं क्रियते यत्र सवितर्कं तदुच्यते ॥ ४ ॥**

घातिचतुष्कविनाशे उत्पद्यते सकलविमलकेवलकं।
लोकालोकप्रकाशं ज्ञानं निरुपद्रवं नित्यं ॥

**आवरणाण विणासे दंसणणाणाणि अंतरहियाणि।**
**पावइ मोहविणासे अणंतसुक्खं च परमप्पा ॥ ६६६ ॥**

आवरणयोः विनाशे दर्शनज्ञाने अन्तरहिते।
प्राप्नोति मोहविनाशे अनन्तसुखं च परमात्मा ॥

**विग्घविणासे पावइ अंतररहियं च वीरियं परमं।**
**उच्चइ सजोइकेवलि तइयज्झाणेण सो तइया ॥ ६६७ ॥**

विघ्नविनाशे प्राप्नोति अन्तरहितं च वीर्यं परमं।
उच्यते सयोगकेवली तृतीयध्यानेन स तत्र? ॥

इति क्षीणकषायगुणस्थानं द्वादशम्।

---

**सुद्धो खाइयभावो अवियप्पो णिच्चलो जिणिंदस्स।**
**अत्थि तया तं झाणं सुहमकिरियाअपडिवाई ॥६६८॥**

शुद्धः क्षायिको भावोऽविकल्पो निश्चलो जिनेन्द्रस्य।
अस्ति तत्र तद्ध्यानं सूक्ष्मक्रियाप्रतिपाति ॥

**परिफंदो अइसुहमो जीवपएसाण अत्थि तक्काले।**
**तेणाणू आइट्टा आसवि[1]य पुणो वि विहडंति ॥ ६६९ ॥**

परिस्पन्दोऽतिसूक्ष्मो जीवप्रदेशानामस्ति तत्काले।
तेन अणवः........आगत्य च पुनरपि विघटन्ते ॥

**जं णत्थि रायदोसो तेण ण बंधो हु अत्थि केवलिणो।**
**जह सुक्ककुड्डलग्गा वालुया झडियंति तह कम्मं ॥ ६७० ॥**

---

१ झडइ. ख.

यन्न स्तः रागद्वेषौ तेन न बन्धो हि अस्ति केवलिनः ।
यथा शुष्ककुड्यलग्ना वालुका निपतन्ति तथा कर्म ॥

**ईहारहिया किरिया गुणा वि सव्वे वि खाइया तस्स ।**
**सुक्खं सहावजायं कमकरणविवज्जियं णाणं ॥ ६७१ ॥**

ईहारहिता क्रिया गुणा अपि सर्वेऽपि क्षायिकास्तस्य ।
सुखं स्वभावजातं क्रमकरणविवर्जितं ज्ञानं ॥

**णाणेण तेण जाणइ कालत्तयवट्टिए तिहुवणत्थे ।**
**भावे समे य विसमे सच्चेयणाचेयणे सव्वे ॥ ६७२ ॥**

ज्ञानेन तेन जानाति कालत्रयवर्तमानान् त्रिभुवनार्थान् ।
भावान् समांश्च विषमान् सचेतनाचेतनान् सर्वान् ॥

**एक्कं एक्कम्मि खणे अणंतपज्जायगुणसमाइण्णं ।**
**जाणइ[1] जह तह जाणइ सव्वइं दव्वाइं[2] समयम्मि ॥६७३॥**

एकमेकस्मिन् क्षणे अनन्तपर्यायगुणसमाकीर्णं ।
जानाति यथा तथा जानाति सर्वाणि द्रव्याणि समये ॥

**जाणंतो पिच्छंतो कालत्तयवट्टियाइं दव्वाइं ।**
**उत्तो सो सव्वण्हू परमप्पा परमजोईहि ॥ ६७४ ॥**

जानन् पश्यन् कालत्रयवर्तमानानि द्रव्याणि ।
उक्तः स सर्वज्ञः परमात्मा परमयोगिभिः ॥

**तित्थयरत्तं पत्ता जे ते पावंति समवसरणाइं ।**
**सक्केण कयविहूई पंचक्कल्लाणपुज्जा य ॥ ६७५ ॥**

तीर्थकरत्वं प्राप्ता ये ते प्राप्नुवन्ति समवशरणादिकं ।
शक्रेण कृतविभूतिं पंचकल्याणपूजां च ॥

---

१ जाणइ पसइ जह तह ख. । २ सव्वाई. क. ।

सम्मुग्घाईकिरिया णाणं तह देसणं च सुक्खं च।
सव्वेसिं सामण्णं अरहंताणं च इयराणं ॥ ६७६ ॥

समुद्घातक्रिया ज्ञानं तथा दर्शनं च सुखं च।
सर्वेषां समानं अर्हतां चेतरणां च ॥

जेसिं आउसमाणं णामं गोदं च वेयणीयं च।
ते अकयसमुग्घाया सेसा य कयंति समुग्घायं ॥ ६७७ ॥

येषां आयुः समानं नाम गोत्रं च वेदनीयं च।
ते अकृतसमुद्घाताः शेषाश्च कुर्वन्ति समुद्घातं ॥

अंतरमुहुत्तकालो हवइ जहण्णो वि उत्तमो तेसिं।
गयवरिसूणा कोडी पुव्वाणं हवइ णियमेण ॥ ६७८ ॥

अन्तर्मुहूर्तकालो भवति जघन्योऽपि उत्तमः तेषां।
*गतवर्षोना कोटिः पूर्वाणां भवति नियमेन ॥*

इति सयोगकेवलिगुणस्थानं त्रयोदशम्।

---

पच्छा अजोइकेवलि हवइ जिणो अघाइकम्म हणमाणो।
लहुपंचक्खरकालो हवइ फुडं तम्मि गुणठाणे ॥ ६७९ ॥

पश्चादयोगकेवली भवति जिनः अघातिकर्मणां हन्ता।
लघुपंचाक्षरकालो भवति स्फुटं तस्मिन् गुणस्थाने ॥

परमोरालियकायं सिढिलं होऊण गलइ तक्काले।
थक्कइ सुद्धसुहावो घणणिविडपएसपरमप्पा ॥ ६८० ॥

परमौदारिककायः शिथिलो भूत्वा गलति तत्काले।
तिष्ठति शुद्धस्वभावः घननिबिडप्रदेशपरमात्मा ॥

---

१ अर्हच्छब्दोऽयं तीर्थकरत्ववाची।

**णट्ठाकिरियपवित्ती सुक्कज्झाणं च तत्थ णिद्दिट्ठं ।**
**खाइयभावो सुद्धो णिरंजणो वीयराओ य ॥ ६८१ ॥**

नष्टक्रियाप्रवृत्तिः शुक्लध्यानं च तत्र निर्दिष्टं ।
क्षायिको भावः शुद्धो निरंजनो वीतरागश्च ॥

**झाणं सजोइकेवलि जह तह अजोइस्स णत्थि परमत्थें ।**
**उवयारेण पउत्तं भूयत्थणयविवक्खाए ॥ ६८२ ॥**

ध्यानं सयोगकेवलिनो यथा तथाऽयोगिनः नास्ति परमार्थेन ।
उपचारेण प्रोक्तं भूतार्थनयाविवक्षया ॥

**झाणं तह झायारो झेयवियप्पा य होंति मणसहिए ।**
**तं णत्थि केवलिदुगे तह्मा झाणं ण संभवइ ॥ ६८३ ॥**

ध्यानं तथा ध्याता ध्येयविकल्पाश्च भवन्ति मनःसहिते ।
तन्नास्ति केवलिद्विके तस्माद्ध्यानं न संभवति ॥

**मणसहियाणं झाणं मणो वि कम्मइयकायजोयाओ ।**
**तत्थ वियप्पो जायइ सुहासुहो कम्मउदएण ॥ ६८४ ॥**

मनःसहितानां ध्यानं मनोऽपि कार्मणकाययोगात् ।
तत्र विकल्पो जायते शुभाशुभो कर्मोदयेन ॥

**असुहे असुहं झाणं सुहझाणं होइ सुहपओगेण ।**
**सुद्धे सुद्धं कहियं सासवाणासवं दुविहं ॥ ६८५ ॥**

अशुभेऽशुभं ध्यानं शुभध्यानं भवति शुभोपयोगेन ।
शुद्धे शुद्धं कथितं सास्रवानस्रवं द्विविधं ॥

**पढमं बीयं तइयं सासवयं होइ इय जिणो भणइ ।**
**विगयासवं चउत्थं झाणं कहियं समासेण ॥ ६८६ ॥**

प्रथमं द्वितीयं तृतीयं सास्रवं भवति एवं जिनो भणति ।
विगतास्रवं चतुर्थं ध्यानं कथितं समासेन ॥

णट्टट्टपयडिबंधो चरमसरीरेण होइ किंचूणो ।
उड्ढ गमणसहावो समएणिक्केण पावेइ ॥ ६८७ ॥

नष्टाष्टप्रकृतिबन्धश्चरमशरीरेण भवति किंचूनः ।
ऊर्ध्वं गमनस्वभावः समयेनैकेन प्राप्नोति ॥

लोयग्गसिहरखित्तं जावं तणुपवणउवरिमं भायं ।
गच्छइ ताम अथक्को धम्मत्थित्तेण आयासो ॥ ६८८ ॥

लोकशिखरक्षेत्रं यावत्तनुपवनोपरिमं भागं ।
गच्छति तावत् अस्ति धर्मास्तित्वेन आकाशः ।

तत्तो परं ण गच्छइ अच्छइ कालं तु अंतपरिहीणं ।
जह्मा अलोयखित्ते धम्मद्दव्वं ण तं अत्थि ॥ ६८९ ॥

ततः परं न गच्छति तिष्ठति कालं तु अन्तपरिहीनं ।
यस्मात् अलोकक्षेत्रे धर्मद्रव्यं न तदस्ति ॥

जो जत्थ कम्ममुक्को जलथलआयासपव्वए णयरे ।
सो रिजुगई पवण्णो माणुसखेत्ताउ उप्पयइ ॥ ६९० ॥

यो यत्र कर्ममुक्तो जलस्थलाकाशपर्वते नगरे ।
स ऋजुगतिं प्रपन्नः मनुष्यक्षेत्रत उत्पद्यते ।

पणयालसयसहस्सा माणुसखेत्तं तु होइ परिमाणं ।
सिद्धाणं आवासो तित्तियमित्तम्मि आयासे ॥ ६९१ ॥

पंचचत्वारिंशच्छतसहस्रं मानुषक्षेत्रस्य तु भवति परिमाणं ।
सिद्धानामावासः तावन्मात्रे आकाशे ॥

सव्वे उवरिं सिरसा विसमा हिट्ठम्मि णिच्चलपएसा ।
अवगाहणा य जम्हा उक्कस्स जहण्णिया दिट्ठा ॥ ६९२ ॥

सर्वे उपरि सदृशाः विषमा अधस्तने निश्चलप्रदेशाः ।
अवगाहना च यस्मात् उत्कृष्टा जघन्यादिष्टा ॥

**एगो वि अणंताणं सिद्धो सिद्धाण देइ अवगासं ।**
**जह्मा सुहमत्तगुणो अवगाहगुणो पुणो तेसिं ॥ ६९३ ॥**

एकोऽपि अनन्तानां सिद्धः सिद्धानां ददात्यवकाशं ।
यस्मात्सूक्ष्मत्वगुणः अवगाहनगुणः पुनः तेषां ॥

**सम्मत्तणाणदंसणवीरियसुहमं तहेव अवगहणं ।**
**अगुरुलहुमव्वावाहं अट्ठगुणा होंति सिद्धाणं ॥ ६९४ ॥**

सम्यक्त्वज्ञानदर्शनवीर्यसूक्ष्मं तथैवावगाहनं ।
अगुरुलघु अव्याबाधं अष्टगुणा भवन्ति सिद्धानां ॥

**जाणइ पिच्छइ सयलं लोयालोयं च एक्कहेलाए ।**
**सुक्खं सहावजायं अणोवमं अंतपरिहीणं ॥ ६९५ ॥**

जानाति पश्यति सकलं लोकालोकं च एकहेलया ।
सुखं स्वभावजातं अनुपमं अन्तपरिहीनं ॥

**रविमेरुचंदसायरगयणाईयं तु णत्थि जह लोए ।**
**उवमाणं सिद्धाणं णत्थि तहा सुक्खसंघाए ॥ ६९६ ॥**

रविमेरुचन्द्रसागरगगनादिकं तु नास्ति यथा लोके ।
उपमानं सिद्धानां नास्ति तथा सुखसघाते ॥

**चलणं वलणं[1] चिंता करणीयं किं पि णत्थि सिद्धाणं ।**
**जह्मा अइंदियत्तं कम्माभावे समुप्पण्णं ॥ ६९७ ॥**

चलनं बलनं चिन्ता करणीयं किमपि नास्ति सिद्धानां ।
यस्मादतीन्द्रियत्वं कर्माभावेन समुत्पन्नं ॥

**णट्ठट्ठकम्मबंधणजाइजरामरणविप्पमुक्काणं ।**
**अट्ठवरिट्ठगुणाणं णमो णमो सव्वसिद्धाणं ॥ ६९८ ॥**

---

१ वयणं ख. । वचनं ।

नष्टाष्टकर्मबन्धनजातिजरामरणविप्रमुक्तेभ्यः ।
अष्टवरिष्टगुणेभ्यो नमो नमः सर्वसिद्धेभ्यः ॥

**जिणवरसासणमतुलं जयउ चिरं सूरिसपरउवयारी ।**
**पाढय साहू वि तहा जयंतु भव्वा वि भुवणयले ॥६९९॥**

जिनवरशासनमतुलं जयतु चिरं सूरिः स्वपरोपकारी ।
पाठकः साधुरपि तथा जयन्तु भव्या अपि भुवनतले ॥

**जो पढइ सुणइ अक्खइ अण्णेसिं भावसंगहं सुत्तं ।**
**सो हणइ णिययकम्मं कमेण सिद्धालयं जाइ ॥ ७०० ॥**

यः पठति शृणोति कथयति अन्येषां भावसंग्रहं सूत्रं ।
स हन्ति निजकर्म क्रमेण सिद्धालयं याति ॥

**सिरिविमलसेणगणहरसिस्सो णामेण देवसेणोत्ति ।**
**अबुहजणबोहणत्थं तेणेयं विरइयं सुत्तं ॥ ॥ ७०१**

श्रीविमलसेनगणधरशिष्यो नाम्ना देवसेन इति ।
अबुधजनबोधनार्थं तेनेदं विरचितं सूत्रं ॥

इत्ययोगकेवलिगुणस्थानं चतुर्दशम् ।

इति भावसंग्रहशास्त्रं समाप्तम् ।

श्रीमद्वामदेवपण्डितविरचितो

# भावसंग्रहः ।

श्रीमद्वीरं जिनाधीशं मुक्तीशं त्रिदशार्चितम् ।
नत्वा भव्यप्रबोधाय वक्ष्येऽहं भावसंग्रहम् ॥ १ ॥
भावा जीवपरीणामा जीवा भेदद्वयाश्रिताः ।
मुक्ताः संसारिणस्तत्र मुक्ताः सिद्धा निरत्ययाः ॥ २ ॥
कर्माष्टकविनिर्मुक्ता गुणाष्टकविराजिताः ।
लोकाग्रवासिनो नित्या ध्रौव्योत्पत्तिव्ययान्विताः ॥ ३ ॥
ये च संसारिणो जीवाश्चतुर्गतिषु संततम् ।
शुभाशुभपरीणामैर्भ्रमन्ति कर्मपाकतः ॥ ४ ॥
शुभभावाश्रयात्पुण्यं पापं त्वशुभभावतः ।
ज्ञात्वैवं सुमते ! तद्धि यच्छ्रेयस्तं समाश्रय ॥ ५ ॥
भावास्ते पंचधा प्रोक्ताः शुभाशुभगतिप्रदाः ।
संसारवर्तिजीवानां जिनेन्द्रैर्ध्वस्तकल्मषैः ॥ ६ ॥
आद्यो ह्यौपशमो भावः क्षायिको मिश्रसंज्ञकः ।
भावोऽस्त्यौदयिकस्तुर्यः पंचमः पारिणामिकः ॥ ७ ॥
स्यात्कर्मोपशमे पूर्वः क्षायिकः कर्मणां क्षये ।
क्षायोपशमिको भावः क्षयोपशमसंभवः ॥ ८ ॥

कर्मोदयाद्भवो भावो जीवस्यौदयिकस्तु यः ।
स्वभावः परिणामः स्यात्तद्भवः पारिणामिकः ॥ ९ ॥
द्वौ नवाष्टादशैकाग्रविंशतिश्च त्रयस्तथा ।
इत्यौपशमिकादीनां भावानां भेदसंग्रहः ॥ १० ॥
स्यादुपशमसम्यक्त्वं चारित्रं च तथा[1]विधम् ।
इत्यौपशमिको भावो भेदद्वयमुपागतः ॥ ११ ॥
सम्यक्त्वं दर्शनं ज्ञानं वृत्तं दानादिपंचकम् ।
स्वस्वकर्मक्षयोद्भूतं नवैते क्षायिके भिदः ॥ १२ ॥

द्विकलं—

दर्शनत्रयमाद्यं च ज्ञानचतुष्कमादिमम् ।
क्षयोपशमसम्यक्त्वं त्र्यज्ञानं दानपंचकम् ॥ १३ ॥
रागोप[2]युक्तचारित्रं संयमासंयमस्त्विति ।
अष्टादश प्रभेदाः स्युः क्षायोपशमिकेऽञ्जसा ॥ १४ ॥
चतस्रो गतयो वा[3]मं त्रयो वेदास्त्वसंयमः ।
लेश्याषट्कमसिद्धत्वं चत्वारश्च कषायकाः ॥ १५ ॥
अज्ञानत्वेन संयुक्ताः प्रभेदा एकविंशतिः ।
औदयिकस्य भावस्य निर्दिष्टा भाववेदिभिः ॥ १६ ॥
अभव्यत्वं च भव्यत्वं जीवत्वं च त्रयः स्मृताः ।
पारिणामिकभावस्य भेदा गणधरैः स्फुटम् ॥ १७ ॥
मिथ्यादित्रिषु मिश्रौ[4]द्यास्त्रयो ह्यसंयतादिषु ।
चतुर्षु चोपशांतेषु चतुर्षु निखिलाः पृथक् ॥ १८ ॥

---

१ औपशमिकं । २ सरागसंयमं । ३ मिथ्यादर्शनं । ४ मिश्रौदयिकपारिणामिकाः ।

आद्यं विना चतुर्भावाः क्षपकश्रेणिसंभवाः ।
विनौपशमिकं मिश्रं त्रयः स्युर्योग्ययोगिनोः ॥ १९ ॥
सिद्धे द्वावेव जायेते क्षायिकः पारिणामिकः ।
गुणस्थानान्यतो वक्ष्ये तत्तल्लक्षणलक्षितम् ॥ २० ॥
मिथ्या सासादनं नाम मिश्रमसंयताह्वयम् ।
विरताविरताख्यं स्यात् प्रमत्तं चाप्रमत्तकम् ॥ २१ ॥
अपूर्वकरणाभिख्यं ततोऽनिवृत्तिसंज्ञकम् ।
सूक्ष्मलोभात्मकं तस्मादुपशान्तकषायकम् ॥ २२ ॥
क्षीणमोहं सयोगाख्यमयोगिस्थानमन्तिमम् ।
एतानि गुणस्थानानि प्रभवन्ति चतुर्दश ॥ २३ ॥
एतैस्त्यक्ताः प्रजायन्ते सिद्धा लोकोत्तमोत्तमाः ।
स्वशुद्धात्मसुखानन्दरसास्वादनतत्पराः ॥ २४ ॥
तत्राद्यं यद्गुणस्थानं मिथ्यात्वं नाम जायते ।
पंचानां[1] दृष्टिमोहाख्यकर्मणामुदयोद्भवम् ॥ २५ ॥
तत्रास्त्यौदयिको भावो मिथ्याकर्मोदयोद्भवः ।
मुख्यतस्तद्वशाज्जन्तोर्वैपरीत्यं प्रजायते ॥ २६ ॥
अदेवे देवताबुद्धिरतत्वे तत्वनिश्चयः ।
मिथ्यात्वाविलचित्तस्य जीवस्य जायते तथा ॥ २७ ॥
मधुरं जायते तीक्ष्णं तीक्ष्णं तु मधुरायते ।
पित्तज्वरार्त्तजीवस्य वैपरीत्यं यथाखिलम् ॥ २८ ॥

१ सप्तानां ख. । २ मिथ्यात्वमनन्तानुबन्धिचतुष्कं चेति पंचानां दृष्टिमोहसंज्ञा मिश्रसम्यक्त्वकर्मानुमेलने च सप्तानामपि । तदुक्तं--

एकधा त्रिविधा वा स्यात्कर्म मिथ्यात्वसंज्ञकम् ।
क्रोधाद्याद्यचतुष्कं च सप्तैते दृष्टिमोहनम् ॥

मद्यमोहाद्यथा जीवो न जानात्यहितं हितम् ।
धर्माधर्मौ न जानाति मिथ्यावासनया तथा ॥ २९ ॥
मिथ्यादृष्टेर्न[1] रोचेत जैनं[2] वाक्यं निवेदितम् ।
उपदिष्टानुपदिष्टमतत्वं रोचते स्वयम् ॥ ३० ॥
तन्मिथ्यात्वं जिनैः प्रोक्तं पंचधैकान्तवादतः ।
अतोऽहं क्रमशो वच्मि तत्तद्वादविकल्पनम्[3] ॥ ३१ ॥
वेदान्तं क्षणिकत्वं च शून्यत्वं विनयात्मकम् ।
अज्ञानं चेति मिथ्यात्वं पंचधा वर्तते भुवि ॥ ३२ ॥
वेदवादी वदत्येवं विपरीतं तु मूढधीः ।
जलस्नानाद्भवेच्छुद्धिः पितॄणां मांसतर्पणम् ॥ ३३ ॥
गोयोनिस्पर्शनाद्धर्मः स्वर्गाप्तिर्जीवघातनात् ।
इत्यादिदुर्घटोत्कटथं वेदवादिमते मतम् ॥ ३४ ॥
यद्यम्बुस्नानतो[4] देही कृतपापाद्वि मुच्यते ।
तदा याति दिवं सर्वे जीवास्तोयसमुद्भवाः ॥ ३५ ॥
यदर्जितं पुरा पापं जीवैर्योगत्रयाश्रयात् ।
कथं तेऽत्र विमुंचन्ति तीर्थतोयावगाहनात् ॥ ३६ ॥

उक्तं च गीतायां[5]:—

अरण्ये निर्जले क्षेत्रे अशुचिर्ब्राह्मणा मृतः ।
वेदवेदांगतत्वज्ञः कां गतिं स गमिष्यति ॥ १ ॥
यद्यसौ नरकं याति वेदाः सर्वे निरर्थकाः ।
यदि चेत्स्वर्गमाप्नोति[6] जलशौचं निरर्थकं ॥ २ ॥

---

१ अत्र हि न चतुर्थी यदा रोचेत तदा चतुर्थी यदा तु न रोचेत तदा तु षष्ठ्येव । २ जनवाक्यं. ख. । ३ नां ख. । ४ अत्र हि यमुद्देशं वेदवादी स्वीकृत्य जीवशुद्धिं मन्यते तस्याः सोद्देशायाः निषेधः क्रियते न तु संहितादौ विहितस्य लौकिकस्य गृहस्थस्नानस्य । ५ अस्याग्रे "श्लोकौ" इति. ख.—पाठः । ६ अथ स्वर्गमवाप्नोति ख ।

इन्द्रियविषयासक्ताः कषायै रंजिताशयाः ।
न तेषां स्नानतः शुद्धिर्गृहव्यापारवर्तिनाम् ॥ ३७ ॥
तीर्थाम्बुस्नानतः शुद्धिं ये मन्यन्ते जडाशयाः ।
परिभ्रमन्ति संसारे नानायोनिसमाकुले ॥ ३८ ॥
तपसा जायते शुद्धिर्जीवस्येन्द्रियनिग्रहात् ।
सम्यक्त्वज्ञानयुक्तस्य वन्हिना कनकं यथा ॥ ३९ ॥

द्विकलम्—

व्रतशीलदयाधर्मगुप्तित्रयमहीयसाम् ।
सद्ब्रह्मचर्यनिष्ठानां स्वात्मैकाग्रचेतसाम् ॥ ४० ॥
स्वभावाशुचिदेहस्य संभवेऽपि प्रजायते ।
विशुद्धत्वं यतीशानां जलस्नानं विना सदा ॥ ४१ ॥

उक्तं च गीतायां—

अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः ।
उभयोरन्तरं दृष्ट्वा कस्य शौचं विधीयते ॥ १ ॥

आत्मा नदी संयमतोयपूर्णा सत्यावहा शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पांडुपुत्र ! न वारिणा शुद्ध्यति चान्तरात्मा ॥२ ॥

तस्माच्छुद्धिं प्रपद्यन्ते जिनोद्दिष्टाध्वकोविदाः ।
भव्याः स्वात्मसुखानन्दस्यन्दतोयावगाहनात् ॥ ४२ ॥

तीर्थस्नानदूषणम् ।

---

मांसेन पितृवर्गस्य प्रीणनं यैर्विधीयते ।
भक्षितं तैर्निजं गोत्रमीदृशीश्रुतिकोविदैः ॥ ४३ ॥

---

१ अस्याग्रे ' श्लोकौ ' इति—ख—पाठः ।

स्वकर्मफलपाकेन गोत्रजाः पशुतां गताः ।
श्राद्धार्थं घातनात्तेषां किन्न स्यात्तत्पलादनम् ॥ ४४ ॥
कथंचित्पशुतां प्राप्तः पिता[1] स्वकर्मपाकतः ।
हत्वा तमेव तन्मांसं तत्तृप्त्यैर्भक्षितं भवेत् ॥ ४५ ॥
बकनामा द्विजस्तस्य पिता मृत्वा मृगोऽभवत् ।
तच्छ्राद्धे[2] तत्पलं[3] दत्त्वा द्विजेभ्यस्तेन भक्षितम् ॥ ४६ ॥
श्रुत्वाप्येवं पुराणोक्तं सुप्रसिद्धं कथानकम् ।
तथाप्यज्ञाः प्रकुर्वन्ति पि र्णां[4] मांसतर्पणम् ॥ ४७ ॥
मांसाशिनो न पात्रं स्युर्मांसदानं न चोत्तमम् ।
तत्पितृभ्यः कथं तृप्त्यै भुक्तं मांसाशिभिर्भवेत् ॥ ५८ ॥
भुक्तेऽन्यैस्तृप्तिरन्येषां भवत्यस्मिन् कथंचन ।
तत्तत्स्वर्गं[5] गता जीवास्तृप्तिं गच्छन्ति निश्चितम् ॥ ४९ ॥
पुत्रेणार्पितदानेन पितरः स्वर्गमवाप्नुयुः ।
तर्हि तत्कृतपापेन तेऽपि गच्छन्ति दुर्गतिम् ॥ ५० ॥
अन्यस्य पुण्यपापाभ्यां भुनक्त्यन्यः शुभाशुभम् ।
ईदृशं विपरीतं तन्न क्वापि श्रूयते भुवि ॥ ५१ ॥
मृत्वा जीवोऽथ गृह्णाति देहमन्यं हि तत्क्षणे ।
पितृत्वं कस्य जायेत वृथैवं जल्पनं ततः ॥ ५२ ॥
स्वकृतपुण्यपापाभ्यां प्राप्तिः स्यात्सुखदुःखयोः ।
तस्माद्भव्याः कुरुध्वं तद्यस्माच्छ्रेयो भवेत्सदा ॥ ५३ ॥
अथैके प्रवदन्त्येवं भूतोयाग्निनगादिषु ।
भूतग्रामेषु सर्वेषु विष्णुर्वसति सर्वगः ॥ ५४ ॥

१ पिताऽथ कर्मपाकतः ख. । २ पितुः । ३ पितृचरमृगस्य ४ पितॄणो क. । ५ तद्वत्स्वर्गं क. ।

उक्तं च पुराणे—

जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्तके ।
ज्वालमालाकुले विष्णुः सर्वं विष्णुमयं जगत् ॥ १ ॥

वसेत्सर्वाङ्गिदेहेषु विष्णुः सर्वगतो यदि ।
वृक्षादिघातनात्सोऽपि हन्यमानो न किं भवेत् ॥ ५५ ॥
मत्स्यकूर्मवराहाद्या विष्णोर्गर्भाश्रया दश ।
मत्स्यादिशैलबिम्बानां पूजनं क्रियते ततः ॥ ५६ ॥
तस्मान्मत्स्यादिजीवानां चैतन्यसंयुजां जनैः ।
प्राणाभिघातनं[1] तेषां श्राद्धादौ क्रियते कथम् ॥ ५७ ॥
सर्वेष्वङ्गप्रदेशेषु प्रत्येकं देहधारिणाम् ।
ब्रह्माद्या देवताः सन्ति वेदार्थोऽयं सनातनः ॥ ५८ ॥
उक्तं च पुराणे[2]—

नाभिस्थाने वसेद्ब्रह्मा विष्णुः कण्ठे समाश्रितः ।
तालुमध्यस्थितो रुद्रो ललाटे च महेश्वरः ॥ १ ॥
नासाग्रे तु शिवं विद्यात्तस्यांते च परापरं ।
परात्परतरं नास्ति शास्त्रस्यायं विनिश्चयः ॥ २ ॥

यज्ञादावामिषं तेषां भुक्तं छागादिदेहिनाम् ।
यदि स्वर्गाय जायेत नरकं केन गम्यते ॥ ५९ ॥
तदङ्गे चेन्न विद्यन्ते तच्छास्त्रं स्यान्निरर्थकम् ।
सन्ति ते चेत्कथं हन्या निघृणैर्यज्ञकर्मणि ॥ ६० ॥
[3]इति मांसेन पितृवर्गतृप्तिदूषणम् ।

---

१ दिघा. ख. । २ अस्याग्रे 'श्लोकौ.' ख-पाठः । ३ इति ख—पुस्तके नास्ति ।

अन्ये चैवं वदन्त्येके यज्ञार्थं यो निहन्यते ।
तस्य मांसाशिनः सोऽपि सर्वे यान्ति सुरालयम् ॥ ६१ ॥
तत्किं न क्रियते यज्ञः शास्त्रज्ञैस्तस्य निश्चयात् ।
पुत्रवध्वादिभिः सर्वे प्रगच्छन्ति दिवं यथा ॥ ६२ ॥
एवं विरुद्धमन्योन्यं मत्वा वास्तवमञ्जसा ।
प्रतार्यतेऽन्धवन्मांसविवेकविकलाशयैः ॥ ६३ ॥
प्राणिप्राणात्यये शक्ताः प्रशक्ता मांसभक्षणे ।
क्रिया कौतस्कुती तेषां प्राप्तये स्वर्गमोक्षयोः ॥ ६४ ॥

उक्तं च पुराणे—

तिलसर्षपमात्रं तु मांसं भक्षन्ति ये द्विजाः ।
नरकान्न निवर्तन्ते यावच्चन्द्रदिवाकरौ ॥ १ ॥
आकाशगामिनो विप्राः पतिता मांसभक्षणात् ।
विप्राणां पतनं दृष्ट्वा तस्मान्मांसं न भक्षयेत् ॥ २ ॥

कश्चिदाहेति यत्सर्वं धान्यपुष्पफलादिकं ।
मांसात्मकं न तत्किंस्याज्जीवाङ्गत्वप्रसंगतः ॥ ६५ ॥
नैवं स्यान्मांसमंग्यङ्गं जीवाङ्गं स्यान्न वामिषम् ।
यथा निम्बो भवेद्वृक्षो वृक्षो निम्बो भवेन्न वा ॥ ६६ ॥
इति हेतोर्न वक्तव्यं सादृश्यं मांसधान्ययोः ।
मांसं निन्द्यं न धान्यं स्यात्प्रसिद्धेयं श्रुतिर्जने ॥ ६७ ॥

उक्तं च—

आगोपालादि यत्सिद्धं मांसं धान्यं पृथक् पृथक् ।
धान्यमानय इत्युक्ते न कश्चिन्मांसमानयेत् ॥ १ ॥

---

१ ख–पुस्तकेऽयं तृतीयान्तः तदा पुत्रवध्वादिभिः सह योजनीयः । २ च ख. ।

इत्याद्यनेकधा शास्त्रं यत्कृतं दुष्टचेतसैः ।
तदंगीकृत्य जायंते जना दुर्गतिभाजनम् ॥ ६८ ॥
तत्तावत्प्राणिघातेन साधितं मांसभक्षणात् ।
पापं सम्पद्यते यस्माद्दुःखं श्वाभ्रं तदुच्यते ॥ ६९ ॥
खरशूकरमार्जारश्वानवानरगोमुखाः ।
वृत्तास्तिस्राश्चतुष्कोणा दुःस्पर्शा वज्रसन्निभाः ॥ ७० ॥
घंटाकारा अधोवक्त्रा दुर्गन्धास्तमसावृताः ।
श्वभ्रेषु पापजीवानामुत्पत्त्यै सन्ति योनयः ॥ ७१ ॥
तीव्रमिथ्यात्वसंयुक्ताः प्राणिघातनतत्पराः ।
क्रूरा दुश्चेष्टिता जीवा उत्पद्यन्तेऽत्र योनिषु ॥ ७२ ॥
अन्तर्मुहूर्तकालेन पर्याप्तीः समवाप्य षट् ।
ततः पतन्ति शस्त्राग्रे स्वयमेवोत्पतन्ति च ॥ ७३ ॥
असुरा आतृतीयान्तं योधयन्ति परस्परम् ।
प्रयुध्यन्ते स्वयं तेऽपि[1] ज्ञात्वा वैरं पुरातनम् ॥ ७४ ॥
यज्ञादौ निहता पूर्वं छागाद्या मुष्टिघाततः ।
स्मृत्वा तत् प्राक्तनं वैरं भवन्ति हननोद्यताः ॥ ७५ ॥
कुन्तक्रकचशूलाद्यैर्नानाशस्त्रैस्तनूद्भवैः ।
खंडं खंडं विधायैवं प्रपीडयन्त्यहर्निशम् ॥ ७६ ॥
सूतकस्येव[2] संघातस्तद्देहेषु प्रजायते ।
यावदायुःस्थितिस्तेषां न तावन्मरणं भवेत् ॥ ७७ ॥
तप्तायःपिण्डमादाय संप्रदर्श्यामिषोपमम् ।
निक्षिपन्ति मुखे तेषां विहितामिषभोजिनाम् ॥ ७८ ॥

१ च. ख. । २ पारदस्येव ।

शारीरं मानसं दुःखमन्योन्योदीरितं च यत् ।
सहन्ते नारका नित्यं पूर्वपापविपाकतः ॥ ७९ ॥
लेश्यास्तिस्रोऽशुभास्तेषां संस्थानं हुंडसंज्ञकम् ।
अतिक्लिष्टाः परीणामा लिंगं नपुंसकाव्हयम् ॥ ८० ॥
क्षारोष्णतीव्रसद्भावनदीवैतरणीजलात् ।
दुर्गन्धमृन्मयाहाराद्भुंजते दुःखमद्भुतम् ॥ ८१ ॥
अक्ष्णोर्निर्मीलनं यावन्नास्ति सौख्यं च तावता ।
नरके पच्यमानानां नारकाणामहर्निशम् ॥ ८२ ॥
तस्मान्निर्गत्य कष्टेन पशुतां यान्ति ते जनाः ।
तत्र दुःखमसह्यं च जननीगर्भगव्हरे ॥ ८३ ॥
गर्भाद्विनिसृतानां स्यात् कियत्कालावशेषतः ।
यज्ञादौ विहितं कर्म तत्तथैवोपतिष्ठति ॥ ८४ ॥
एवं भ्रमन्ति संसारे स्मृतिं लब्ध्वा पुनः पुनः ।
ज्ञात्वैवं क्रियतां भव्यैः प्राणिनां प्राणरक्षणम् ॥ ८५ ॥

यज्ञे पशुवधकृतेन स्वर्गप्राप्तिदूषणम् ।

---

गोयोनिर्वंद्यते नित्यं न चास्यं मलिनं यतः ।
पश्य लोकस्य मूर्खत्वं वर्तते हेतुवर्जितम् ॥ ८६ ॥
तिरश्ची गौस्तृणाहारी नित्यं विण्मूत्रलालसा ।
तस्या अपरभागस्य कथं देवत्वमागतम् ॥ ८७ ॥
ईदृग्विधापि वन्द्या सा रज्ज्वा किं बन्ध्यते दृढम् ।
दुग्धार्थं पीड्यते दण्डैराक्रन्दन्ती स्वभाषया ॥ ८८ ॥
तस्याङ्गे देवताः सर्वे तिष्ठन्ति सागरा नगाः ।
कथं गौर्यज्ञवेलायां वध्यते सा द्विजाधमैः ॥ ८९ ॥

---

१ तदङ्गे ख.।

यथा गौः[1] प्रभवेद्वन्द्या तथैते शूकरादयः ।
तयोः सादृश्यसद्भावे विण्मूत्राहारसेवनात् ॥ ९० ॥
एतत्स्ववाग्विरुद्धं यन्मन्यन्ते जडबुद्धयः ।
आयत्यां दुर्गतौ जन्म प्रपद्यन्ते सुनिश्चितम् ॥ ९१ ॥
न वन्द्या गौर्भवेद्वन्द्या गौर्वाणीत्यभिधानतः ।
जैनेन्द्री विमला तथ्या भव्यानां मुक्तिदायिनी ॥ ९२ ॥

इति गोयोनिवंदनादूषणम् ।

---

विरंचिर्जगतः कर्ता संहर्ता गिरिजापतिः ।
रक्षकः पुण्डरीकाक्ष[2] इत्यूचुः[3] श्रुतवेदिनैः ॥ ९३ ॥
यदि ब्रह्मा जगत्कर्ता तर्त्कि शक्रस्य संसदि ।
विलोक्याप्सरसां वृन्दं जातो भोगाभिलाषुकः ॥ ९४ ॥
ततोऽसौ[4] स्वास्पदं त्यक्त्वा कर्तुं लग्नस्तपो भुवि ।
तावद्भीत्या कृतं देवैस्तत्तपोविघ्नकारणम् ॥ ९५ ॥
दृष्ट्वा तिलोत्तमानृत्यं तत्राभूद्विषयातुरः ।
गत्वा तदन्तिकं गाढमाश्लेषं याचते हि सः ॥ ९६ ॥
अनिच्छन्तीं तिरोभूतां तां गवेषयतोऽभवत् ।
तस्मिन्मुखानि चत्वारि पंचमं च खराननम् ॥ ९७ ॥
हास्यास्पदीकृतो देवैस्ततः क्रुद्धोतिनिर्भरम् ।
खरास्येन भ्रमन्तोऽसौ भक्षणार्थं मरुद्गणान् ॥ ९८ ॥
दृष्ट्वा तान् क्षुभितान् सर्वांश्छिन्नं रुद्रेण तच्छिरः ।
अत्यजन्[5] विषयासक्तिं प्रविष्टो वनराजकम्[6] ॥ ९९ ॥
तिलोत्तमेति विभ्रान्त्या सेविता वच्छभल्लिका ।

---

१ गौरत्र भवेद्वं. ख. । २ काक्ष्यः ख. । ३ इत्युक्तं ख. । ४ ना ख. ।
५ अत्यजद्धि । ६ वनराजिका. ख. ।

तयोस्तत्राभवत्पुत्रो जाम्बुवानिति विश्रुतः ॥ १०० ॥
यस्यास्ति महती शक्तिर्विश्वकर्तृत्वसंभवी ।
स्वल्पतराय राज्याय किमसौ तप्यते वृथा ॥ १०१ ॥
न शक्नोत्यात्मनस्त्यक्तुं यो दुःखं विरहात्मकम् ।
कथं स्याद्विश्वकर्तृत्वे स्वामित्वं तस्य वेधसः ॥ १०२ ॥
यद्येवं सकलं विश्वं कुरुते कमलासनः ।
तदा संतिष्ठते कासौ सृष्टिनिर्मापणक्षणे ॥ १०३ ॥
यत्र स्थित्वा करोत्येष तदेव स्यान्महीतलम् ।
तत्रापि शेषभूतानि तत्कर्तृत्वमपार्थकम् ॥ १०४ ॥
सृष्टिनिर्मापणे कस्मादानीतो भूतसंग्रहः ।
कानि वा तत्र शस्त्राणि योग्यानि शिल्पिकर्मणि ॥ १०५ ॥
विनोपकरणैस्तेन विश्वं केभ्यो विधीयते ।
पृथिव्याद्यैस्तु कर्तृत्वं मिथ्या तेषामसंभवात् ॥ १०६ ॥
भूम्यादिपंचभूतानां यदि पूर्वमसंभवः ।
नास्त्यसंभविनां कर्ता संभविनां तु का क्रिया ॥ १०७ ॥
कर्तृत्वं द्विविधं वस्तुकर्तृत्वं वैक्रियोद्भवम् ।
आद्यं घटादिकर्तृत्वं द्वितीयं देवनिर्मितम् ॥ १०८ ॥
पर्यायानां घटादीनां कौतस्कुतीह कर्तृता ।
विना भूतैः पृथिव्याद्यैर्घटनाया असंभवात् ॥ १०९ ॥
नं यान्ति मनसा कर्तुं विवर्णाः पार्थिवा अपि ।
कथं कस्मात्समानीता तद्योग्या जीवसंहतिः ॥ ११० ॥

---

१ जाम्बुवंतोऽति ख. । २ पर्यायाणि ख. । ३ नायान्ति. ख. । ४ पर्याया: ख. ।

समुत्पादोऽखिलार्थानां मानसो हि प्रजायते ।
न ह्यदृष्टपदार्थानां घटना कापि दृश्यते ॥ १११ ॥
यदि वैक्रियिकं विश्वं विद्याशक्त्या विनिर्मितम् ।
अवस्तुभूतसम्बन्धान्न भवेत्तच्चिरन्तनम् ॥ ११२ ॥
एवं सुवर्णगर्भस्य कर्तृत्वं नोपजायते ।
अनाद्यकृत्रिमस्यास्य विश्वस्येति विनिश्चयः ॥ ११३ ॥
चराचरमिदं विश्वं सशैलवनसागरम् ।
कृत्वा स्वोदरमध्यस्थं संरक्षति जनार्दनः ॥ ११४ ॥
असौ सन्तिष्ठते कस्मिन् स किं लोकाद्बहिर्भवः ।
तस्याङ्गनाश्च सैन्यानि क तिष्ठन्ति सहोदराः ॥ ११५ ॥
जानकीहरणासक्तः कृतदोषो दशाननः ।
हतो रामेण तौ स्यातां लोकान्तर्वर्तिनौ न किम् ॥ ११६ ॥
सारथ्यं पांडुपुत्रस्य कृत्वा कृष्णो निपातयेत् ।
कौरवान् निखिलांस्तेपि विश्वान्तर्वर्तिनो न किम् ॥ ११७ ॥
मायेयं तस्य तद्रूपमनन्तं निर्विकारकम् ।
तस्मात्तस्योदरे माति विश्वं तु मानगोचरम् ॥ ११८ ॥
विश्वगर्भमनन्तं स्याद्व्योमैकं तदचेतनम् ।
असावप्यनया युक्त्या विष्णुर्भवत्यचेतनः ॥ ११९ ॥
दशगर्भाश्रितं जन्म निर्विकारस्य जायते ।
असंभाव्यं भवत्येतद्वंध्या पुत्रानुकारिणाम् ॥ १२० ॥
अनेन हेतुनाऽकिंचित्करः स्यान्मधुसूदनः ।
तस्मान्न संभवत्यस्य विश्वरक्षाधिकारिता ॥ १२१ ॥

१ म. ख. । २ ण. क. ।

भस्मसात्कुरुते रुद्रस्त्रैलोक्यं स्वल्पचिन्तया ।
तदा संवसति काशौ गंगागौरीसमन्वितः ॥ १२२ ॥
दहत्येकतरं ग्रामं स पापी भण्यते जनैः ।
यो विश्वं निर्दहेत् सर्वं स कथं याति पूज्यताम् ॥ १२३ ॥
अनन्यसंभवीशक्तियुक्तस्य पृथिवीपतेः ।
पापं न विद्यते यस्मात्पापहन्ता स एव हि ॥ १२४ ॥
शम्भोर्न विद्यते पापं चेत्कथं भ्रमते भुवि ।
प्रतितीर्थं करालग्नब्रह्मशीर्षस्य हानये ॥ १२५ ॥
भ्रमन्प्राप्तः पलाशाख्यं ग्रामं यावत्कपालभृत् ।
वत्सेन तत्र[1] शृंगाभ्यां विदार्य मारितो द्विजः ॥ १२६ ॥
तत्पापात् स्वतनुं कृष्णं दृष्ट्वा सोऽथ विनिर्ययौ ।
निजमातरमापृच्छ्य तत्पापोच्छेदनेच्छया ॥ १२७ ॥
गतोऽनुमार्गतस्तस्य वृषभस्य महेश्वरः ।
गांगं ह्रदं प्रविष्टौ द्वौ[2] त्यक्तपापौ बभूवतुः ॥ १२८ ॥
वृषभस्योपदेशेन गंगातोयावगाहनात् ।
जातस्त्यक्तकपालोऽपि कपालीत्युच्यते जनैः ॥ १२९ ॥
यदि[3] यः स्वकृतं पापं निर्नाशयितुमक्षमः ।
सोऽन्येषां कल्मषापाये स्वामी स्यादिति कौतुकम् ॥१३०॥
ईदृक्पुराणसंदोहं श्रुत्वा युक्तिविवर्जितम् ।
वि[4]भ्रमन्ति जनाः स्वैरं संसारगहने वने ॥ १३१ ॥
महास्कन्धस्य लोकस्य कर्ता हर्ता च रक्षकः ।
न कोऽपि विद्यते तस्माद्विपरीतमिदं वचः ॥ १३२ ॥

१ तावत् ख. । २ तौ. ख. । ३ यदि स्वयं कृतं ख. । ४ बंभ्रमन्ति ख ।

इत्येतद्विपरीतात्ममिथ्यात्वं कथितं मया[1] ।
अतश्च क्षणिकैकान्तं मिथ्यात्वं तन्निगद्यते ॥ १३३ ॥

इति वेदान्तोक्तं विपरीतं मिथ्यात्वम् ।

---

क्षणिकैकान्तमिथ्यात्ववादी बौद्धो वदत्यतः[2] ।
उत्पन्नश्च प्रतिध्वंसी भवत्यात्मा प्रतिक्षणम् ॥ १३४ ॥
क्षणिके स्वीकृते जीवे क्षणादूर्ध्वमभावतः ।
पुण्यं पापं च तत्रापि कः प्राप्नोति पुरातनम् ॥ १३५ ॥
संयमो नियमो दानं कारुण्यं व्रतभावना ।
सर्वथा घटते नैषां नित्यक्षणिकवादिनाम् ॥ १३६ ॥
तेषां[3] बन्धो विना बन्धं देहो देहं विना तथा[4] ।
नास्ति मोक्षस्ततो नूनं नास्तिकत्वं प्रसज्यते ॥ १३७ ॥
ज्ञानं यदि क्षणध्वंसि बालत्वे चेष्टितं च यत् ।
इदं पुत्रकलत्राद्यं ममेति स्मर्यते कथम् ॥ १३८ ॥
स्मर्यते दृष्टिमात्रेण मैत्री वैरं पुरातनम् ।
निर्गतेन निजावासं पुनरागम्यते कथम् ॥ १३९ ॥
अन्यच्च क्षणिकैकान्ते वर्तन्ते स्वेच्छया जनाः ।
सुरामांसाशनेनैते मन्यन्ते मोक्षसाधनम् ॥ १४० ॥
पात्रे यत्पतितं सर्वं भक्ष्याभक्ष्यं च सेव्यते ।
अस्मच्छास्त्रे प्रयुक्तत्वान्नास्मिन् विचारणा मता ॥ १४१ ॥
सुरामांसाशनात्स्वर्गं मोक्षं च गम्यते यदि ।
दुःसहं नारकं भीमं प्राप्यते केन हेतुना ॥ १४२ ॥

---

१ मया. ख. । २ त्यदः ख. । ३ नैषां. ख. । ४ न हि ख. ।

अन्ये धीवरशौण्डाद्याः सूनकारादयो जनाः ।
मुक्तिभाजो भवन्त्येते यदि तथ्येदृशी श्रुतिः ॥ १४३ ॥
जीवो नित्यस्तु पर्याया अनित्यास्तु तदाश्रयात् ।
अनित्यत्वं हि जीवस्य कथंचिद्दृष्टमर्हता ॥ १४४ ॥
अतस्तत्क्षणिकैकान्तमिथ्यात्वस्यापसारणम्[1] ।
कृत्वा सम्यक्त्वहेतूनां प्रयत्नं क्रियतामिति ॥ १४५ ॥

[2]इति नित्यक्षणिकैकान्तमिथ्यात्वम् ।

---

सत्तावबोधचैतन्यलक्षणो यः सनातनः ।
तस्याभावं वदत्येवं चार्वाको मानवर्जितः ॥ १४६ ॥
अचेतनानि भूतानि जीवः स्याच्चेतनात्मकः ।
कथं भवेद्विजातिभ्यः सचेतनस्य संभवः[3] ॥ १४७ ॥
भूतयोगात्मिका शक्तिश्चैतन्यमभिधीयते ।
पिष्टोदकगुडादिभ्यो मदशक्तिर्यथा भवेत् ॥ १४८ ॥
गर्भादिर्मरण[4]पर्यन्तं तस्यावस्थानसंभवः ।
ततो नास्त्यन्यजीवत्वं विना तेनान्यलोकता ॥ १४९ ॥
मुक्त्वेह लौकिकं सौख्यं व्रतैः क्लिश्यन्त्यहर्निशम् ।
हा[5]! वंचितास्त एवास्मिन्नाशापाशवशीकृताः ॥ १५० ॥
अक्षसौख्याय संसेव्या भग्नी माता गुरुस्त्रियः ।
मद्याद्यं च न दोषोऽत्र जीवस्याभावतः स्फुटम् ॥ १५१ ॥
इत्येवं निगदन् दुष्टश्चार्वाकः किन्न विन्दति ।
सद्यः खण्डीकृतां जिन्हां प्रत्यक्षं चासिधारया ॥ १५२ ॥

---

१ मतस्य ह्यपसाररणं. ख. २ इति. ख—पुस्तके नास्ति । ३ अस्मादग्रे परः इति ख—पाठः, तस्यार्थः पर आहेति । ४ मृत्यु. ख. । ५ हि. ख. ।

[1]अचेतनानि भूतानि नोपादानानि चेतने ।
मिथ्येति गोमयादिभ्यो वृश्चिकाद्युपदर्शनात् ॥ १५३ ॥
स्वसंवेदनवेद्यत्वात् सुखदुःखादिवद्ध्रुवम् ।
जीवसिद्धिं कथं नैते मन्यन्ते दुष्टवादिनः ॥ १५४ ॥
तावत्संवर्धते देहो यावज्जीवोपतिष्ठते ।
तस्याभावे न सा वृद्धिर्देहो विलयमाप्नुयात् ॥ १५५ ॥
पंचभूतात्मिके देहे देहिना वर्जिते न हि ।
संभूतिर्गमनादीनां प्रत्यक्षे भूतसंचये ॥ १५६ ॥
मृत्वायमभवद्रक्षो बन्धुर्वा जनको परः ।
नासत्यं जातु संभूयात् प्रसिद्धमिति सर्वतः ॥ १५७ ॥
जात्यनुस्मरणाज्जीवो[2] गतागतविनिश्चयात् ।
पृथक्[3]करणसादृश्याज्जीवोस्तीति विनिश्चयः ॥ १५८ ॥
नास्ति जीव इति व्यक्तं यद्वदन्तीह दुर्धियः ।
तन्मिथ्यात्वं परित्याज्यं सम्यक्त्वभावनाबलात् ॥ १५९ ॥

इति नास्तिक[4]वादनिराकरणम् ।

---

तापसाः प्रवदंत्येवं सर्वे जीवाः शिवात्मकाः ।
ततस्तेषां प्रकुर्वीत विनयो मोक्षसाधकः ॥ १६० ॥
यद्यंगिनः शिवात्मानो वन्दकः किन्न तद्विधः ।
तस्मात्कः केन वन्द्यः स्याद्द्वयोः साम्यं शिवत्वयोः॥१६१॥
कर्मोपाधिविनिर्मुक्तं तद्रूपं शैवमुच्यते ।
यत्कर्मस्तोमसंयुक्तमशुद्धात्मकमित्यतः ॥ १६२ ॥

---

१ अस्मात्पूर्वं पर इति पाठः । २ जीवगतागत॰ ख. । ३ पृथक् पृथक् ग्राहस्यात् । ४ नास्तिकवादनिवारणं. ख. ।

यो न वेत्ति परं स्वं च शुद्धाशुद्धस्वभावकम् ।
कथं तेनाप्यते मोक्षः सर्वेषां विनयादिह ॥ १६३ ॥
विनयो यदि सर्वेषां योग्यायोग्यक्रमाद्दते ।
किं न वन्द्याः खराद्याश्च मातङ्गाद्याः शिवाप्तये ॥ १६४ ॥
वन्दना क्रियते मूढैः पुत्रभार्याभिवाञ्छया ।
यक्षाद्यखिलदेवानां तुच्छानां कुत्सितात्मनाम् ॥ १६५ ॥
भुक्तिमात्रप्रदानेन स्वस्मै तृप्त्यभिलाषिणाम् ।
तेषां कौतस्कुती[1] शक्तिर्वाञ्छितार्थप्रदायिनी ॥ १६६ ॥
पूर्वभावार्जिता[2] वाप्तिर्जायते सुखदुःखयोः ।
देहिनां किं प्रकुर्वन्ति यक्षाद्याः देवताधमाः ॥ १६७ ॥
शैवाचार्या वदन्त्येके काले कल्पशते गते ।
मुक्तिं गतेषु जीवेषु लोकः शून्यो भवेदिति ॥ १६८ ॥
मुक्तिं गता पुनर्जीवाः पतन्तीश्वरचिन्तया ।
चतुर्गत्यात्मके भीमे संसारे दुःखसंकुले ॥ १६९ ॥
वन्हिः काष्ठसमुद्भुतः पुनः काष्ठं भवेद्यदि ।
तदा मुक्तिं गता जीवाः पुनः प्रयान्ति संसृतिम् ॥ १७० ॥
यस्य प्रयत्नमन्येषां पातनाय शिवात्मनाम् ।
परस्परविरुद्धत्वात् स शिवो वंद्यते कथम् ॥ १७१ ॥
कल्याणं परमं सौख्यं निर्वाणपदमच्युतम्[3] ।
साधितं येन देवेन स शिवः स्तूयते[4] बुधैः ॥ १७२ ॥
एवं वैनयिकं नाम मिथ्यात्वं दुर्गतेः पदम् ।
तमुत्सृज्य समाराध्यं शिवं रत्नत्रयात्मकम् ॥ १७३ ॥

इति विनयमिथ्यात्वम् ।

---

१ कौतस्तनी. ख. । २ पूर्वभवार्जिता. ख. । ३ निर्वाणं परमं पदं । ४ श्रूयते ।

ज्ञाता दृष्टा पदार्थानां त्रैलोक्योदरवर्तिनाम् ।
तस्याज्ञानस्वभावत्वं ब्रूते सांख्यो निरीश्वरः ॥ १७४ ॥
तस्य मतानुसारित्वमङ्गीकृत्य प्रकल्पितम् ।
मस्करीपूरणेनेह वीरनाथस्य संसदि ॥ १७५ ॥
जिनेन्द्रस्य ध्वनिग्राहिभाजनाभावतस्ततः ।
शक्रेणात्र समानीतो ब्राह्मणो गौतमाभिधः ॥ १७६ ॥
सद्यः सदीक्षितस्तत्र स ध्वनेः पात्रतां ययौ ।
ततो देवसभां त्यक्त्वा निर्ययौ मस्करी मुनिः ॥ १७७ ॥
सन्त्यस्मदादयोऽप्यत्र मुनयः श्रुतधारिणः ।
तांस्त्यक्त्वा स ध्वनेः पात्रमज्ञानी गौतमोऽभवत् ॥ १७८ ॥
संचिंत्यैवं क्रुधा तेन दुर्विदग्धेन जल्पितम् ।
मिथ्यात्वकर्मणः पाकादज्ञानत्वं हि देहिनाम् ॥ १७९ ॥
हेयोपादेयविज्ञानं देहिनां नास्ति जातुचित् ।
तस्मादज्ञानतो मोक्ष इति शास्त्रस्य निश्चयः ॥ १८० ॥
यत्कालान्तरितं वस्तु दृष्टपूर्वमनेकधा ।
यद्यज्ञानी कथं तस्य चेतृत्वं दृश्यतेऽङ्गिनः ॥ १८१ ॥
अयं बन्धुः पिता सुनुर्मातेयं भगिनी प्रिया ।
एषां पृथक्क्रिया तस्य ज्ञानहीनस्य दुर्घटा ॥ १८२ ॥
पंचाक्षविषयाः सर्वैः सेव्यन्ते स्वेच्छया कथम् ।
पाषणस्तंभवत्तस्य न काचित् कर्तृता मता ॥ १८३ ॥
ज्ञानं विना न चारित्रं तद्विना ध्यानसाधनम् ।
ध्यानं विना कथं मोक्षस्तस्माज्ज्ञानं सतां मतम् ॥ १८४ ॥

ततो भव्यैः समाराध्यं सम्यग्ज्ञानं जिनोदितम् ।
असाधारणसामग्र्यं निःशेषकर्मणां क्षये ॥ १८५ ॥
इत्येवं पंचधा प्रोक्तं मिथ्यात्वं तद्वशाज्जनाः ।
संसाराब्धौ निमज्जन्ति दुःखकल्लोलसंकुले ॥ १८६ ॥

इत्यज्ञानमिथ्यात्वम् ।

अथोर्ध्वं स्वमतोद्भूतं मिथ्यात्वं तन्निगद्यते ।
विहितं जिनचन्द्रेण श्वेताम्बरमताभिधम् ॥ १८७ ॥
सषट्त्रिंशे शतेऽब्दानां मृते विक्रमराजनि ।
सौराष्ट्रे वल्लभीपुर्यामभूत्तत्कथ्यते मया ॥ १८८ ॥
उज्जयिन्या पुरी ख्याता देशेऽस्त्यवन्तिकाभिधे ।
तत्राष्टाङ्गनिमित्तज्ञो भद्रबाहुर्मुनीश्वरः ॥ १८९ ॥
निमित्तज्ञानतस्तेन कथितं मुनिजनान् प्रति ।
प्रभवत्यत्र दुर्भिक्षं वर्षद्वादशकावधि ॥ १९० ॥
निशम्येति वचस्तस्य नान्यथा स्यात्कदाचन ।
सर्वे स्वस्वगणोपेताः प्रतिदेशं विनिर्ययुः ॥ १९१ ॥
शान्तिनामा गणी चैकः संप्राप्तो विहरन् पुरीम् ।
सौराष्ट्रां वल्लभीं यावत्तत्र संतिष्ठते स्म सः ॥ १९२ ॥
तत्राप्यभून्महाभीमं दुर्भिक्षमतिदुःसहम् ।
विदार्योदरमन्येषामन्नं रंकैर्विभुज्यते ॥ १९३ ॥
ततः सोढुमशक्तैस्तैः स्वकीयोदरपूर्तये ।
सच्चारित्रं परित्यज्य स्वीकृता कुत्सिता क्रिया ॥ १९४ ॥

---

१ उज्जयिन्यां पुरा ख्यातो देशोऽस्त्यवन्तिकाभिधः इति क–पुस्तके पाठः स च असंगतत्वात् बहिर्निष्कास्य [illegible]-पुस्तकस्थः संयोजितः । २ मंतं ख. ।

गृहीत्वा चीवरं दण्डं भिक्षापात्रं च कंबलम् ।
भिक्षाशनं समानीय स्वावासे[1] भुज्यते सदा ॥ १९५ ॥
कियत्काले गतेऽप्येवं जाता सुभिक्षता ततः ।
भणितं संघमाहूय शान्तिना गणधारिणा ॥ १९६ ॥
त्यजध्वं कुत्सिताचारं भजध्वं शुद्धसद्दशम् ।
कुरुध्वं गर्हणं निन्दां गृह्णीध्वं सद्व्रतं पुनः ॥ १९७ ॥
आकर्ण्येत्यग्रजः शिष्यो जिनचन्द्रो ब्रवीदिदम् ।
नो शक्यतेऽधुना धर्तुं जिनैराचारितं[2] व्रतम् ॥ १९८ ॥
ब्रह्मचर्यमचेलत्वं नग्नत्वं स्थितिभोजनम् ।
भूतले शयनं मौनं द्विमासं केशलुञ्चनम् ॥ १९९ ॥
एकस्थानमलाभत्वं सर्वाङ्गमलधारणम् ।
असह्यान्यन्तरायाणि भिक्षानियतकालिकी ॥ २०० ॥
न शक्या मनसा सोढुं द्वाविंशतिपरीषहाः ।
इत्याद्यनेकधा दुःखमधुना केन सह्यते ॥ २०१ ॥
इदानींतनमाचारं सुखसाध्यं न शक्यते ।
तत्परित्यक्तुमस्माभिस्तस्मान्मौनं भजस्व हि ॥ २०२ ॥
ततोऽभाणि गणी नैवं सुन्दरं यत्त्वयोदितम् ।
स्वोदरपूर्तये हेतुर्नो हेतुर्मोक्षसाधने ॥ २०३ ॥
तद्रोषात्पापिना मूर्ध्नि हत्वा दण्डेन मारितः ।
मृत्वा चैत्यगृहे तस्मिन्नाचार्यो व्यंतरोऽभवत् ॥ २०४ ॥
ततः शिष्यमुख्यं यावत्स्वयं भूत्वा गणाग्रणीः ।
तावत्शिक्षां पुनर्दातुं प्रारेभे व्यन्तरामरः ॥ २०५ ॥

---

१ स्वावासं ख. । २ राचरितं ख. ।

भीतेन तस्य शान्त्यर्थं काष्ठमष्टांगुलायतम् ।
चतुरस्रं च स एवायमिति संकल्प्य पूजितः ॥ २०६ ॥
श्वेताम्बरैः परिस्थाप्य समर्चितो यथाविधि ।
ततस्तेन परित्यक्तं चेष्टितं विक्रियात्मकम् ॥ २०७ ॥
समभूत् कुलदेवोऽसौ पर्युपासनसंज्ञकः ।
अद्यापि जलगन्धाद्यैः प्रपूज्यतेऽतिभक्तितः ॥ २०८ ॥
अन्तरे श्वेतसद्वस्त्रं धृत्वा तस्यार्चनं कृतम् ।
तस्मादभूदिदं लोके श्वेताम्बरमताभिधम् ॥ २०९ ॥
समुत्पन्नेऽपि कैवल्ये भुनक्ति केवली जिनः ।
नारीणां तद्भवे मोक्षः साधूनां ग्रन्थसंयुजाम् ॥ २१० ॥
ईदृशं शास्त्रसंदोहं विपरीतं जिनोक्तितः ।
संविधाय वदत्येष गुरुद्रोही निरंकुशः ॥ २११ ॥
यस्यानन्तसुखं तस्य नास्त्याहारप्रसंगता ।
यद्यस्त्यनन्तसौख्यानां व्याघातो जायते ध्रुवम् ॥ २१२ ॥
नास्ति क्षुधां विनाहारः क्षुन्मुख्या दोषसंहतिः ।
इति हेतोर्जिनेन्द्रस्य सदोषत्वं प्रसज्यते ॥ २१३ ॥
वेदनीयस्य सद्भावे बुभुक्षाद्यं प्रजायते ।
तस्मात्केवलिनां भुक्तिर्न भवेद्दोषकारिणी ॥ २१४ ॥
दग्धरज्जुसमं वेद्यं स्वशक्तिपरिवर्जितम् ।
असमर्थं स्वकार्यस्य कर्तृत्वे क्षीणमोहिनि ॥ २१५ ॥
मोहमूलं भवेद्वेद्यं मोहविच्छेदमीयुषि ।
तद्धेतोर्निष्फलं वेद्यं छिन्नमूलतरुर्यथा ॥ २१६ ॥

बुभुक्षा भोक्तुमिच्छा स्यादिच्छापि मोहजा स्मृता ।
तत्क्षये वीतरागस्य भोजनात्[1] स्यात्सदोषता ॥ २१७ ॥

तद्यथा—

अक्षार्थेषु विरक्तस्य गुप्तित्रयोपसंयुजः[2] ।
साधोः सम्पद्यते ध्यानं निश्चलं कर्मणां रिपुः ॥ २१८ ॥
ध्यानात्समरसीभावस्तस्मात्स्वात्मन्यवस्थितिः ।
ततस्तु कुरुते नूनं निःशेषं मोहसंक्षयम् ॥ २१९ ॥
भूत्वाथ क्षीणमोहात्मा शुक्लध्याने द्वितीयके[3] ।
स्थित्वा घातिक्षयं[4] कृत्वा केवली प्रभवत्यसौ ॥ २२० ॥
दशाष्टदोषनिर्मुक्तो लोकालोकप्रकाशकः ।
अनन्तसुखसंतृप्तः कथं भुनक्ति केवली ॥ २२१ ॥
सन्ति क्षुधादयो दोषाः कियन्तश्चेज्जिनेशिनः ।
निर्दोषो वीतरागोऽसौ परमात्मा कथं भवेत् ॥ २२२ ॥
अथौदासीन्ययुक्तानां साधूनां भोजनादिकम् ।
कुर्वतां वीतरागत्वं सर्वेषां सम्मतं सताम् ॥ २२३ ॥
मिथ्यात्वज्वरसम्पन्नतीव्रदाववतामयम् ।
प्रलापस्तूपचारेण वीतरागा ह्यमी यतः ॥ २२४ ॥
विनाहारं न च क्वापि दृश्यतेऽत्र तनुस्थितिः ।
तस्मात्केवलिभिर्नूनमाहारो गृह्यते सदा ॥ २२५ ॥
नोकर्मकर्मनामा च लेपाहारोऽथ मानसः ।
ओजश्च कवलाहारश्चेत्याहारो हि षड्विधः ॥ २२६ ॥

१ भोजनं ख. । २ संयुतः ख. । ३ तृतीयके ख. । ४ घातित्रयं हत्वा ख. ।

एवमनेकधाहारो देहस्य स्थितिकारणम् ।
तन्मध्ये कवलाहारो वान्यो देहस्थितौ भवेत् ॥ २२७ ॥
नोकर्मकर्मनामानमाहारं गृह्णतोऽर्हतः ।
देहस्थितिर्भवत्येतदस्माकमपि सम्मतम् ॥ २२८ ॥
आहोस्वित्कवलाहारपूर्विका स्यात्तनुस्थितिः ।
त्वयैवं भण्यते तत्र प्रसिद्धा व्यभिचारिता ॥ २२९ ॥
एकेन्द्रियेषु जीवेषु लेपाहारः प्रजायते ।
आहारो मानसो देवसमूहेष्वखिलेष्[1]वपि ॥ २३० ॥
इति हेतोर्जिनेन्द्रस्य कवलाहारपूर्विका ।
देहस्थितिर्न वक्तव्या त्वया स्वप्नेऽपि दुर्मते ! ॥ २३१ ॥
एकादश जिने सन्ति बुभुक्षाद्याः परीषहाः ।
तस्मात्केवलिनां भुक्तिरनिवार्या भवादृशैः ॥ २३२ ॥
किमेवं क्रियते मूढ ! पुनश्चर्वितचर्वणम् ।
क्षुत्पिपासादयो दोषा यस्मात्पूर्वं निराकृताः ॥ २३३ ॥
क्षुत्पिपासादयो य[2]स्मान्न समर्था मोहसंक्षये ।
द्रव्यकर्माश्रयात्तेषामस्तित्वमुपचारतः ॥ २३४ ॥
अस्तु वा तस्य वेद्योत्थबुभुक्षाया विचारणा ।
अनेकजीवहिंसाद्यं पश्यन् भुंक्ते कथं जिनः ॥ २३५ ॥
यस्माच्छुद्धमशुद्धं वा स्वल्पज्ञानयुता जनाः ।
कुर्वन्ति भोजनं तद्वत् केवली कुरुते कथम् ॥ २३६ ॥

१ अस्याग्रेऽयं पाठः ख–पुस्तके । उक्तं चान्यत्र—

णोकम्मं तित्थयरे कम्मं णारेय माणसो अमरे ।
णरपसुकवलाहारो पक्खी ओजो णगे लेओ ॥ १ ॥

२ क्षेते ख. ।

अन्तरायान् विना तस्य प्रवृत्तिर्भोजने यदि ।
श्रावकेभ्योऽतिनीचत्वं निन्दास्पदं प्रजायते ॥ २३७ ॥
करोति चान्तरायांश्च दृष्टे चायोग्यवस्तुनि ।
तदा सर्वज्ञभावस्य दत्तस्तेन जलाञ्जलिः ॥ २३८ ॥
तथापि कवलाहारं ये वदन्ति जिनेशिनः ।
सुरास्वादमदोन्मत्ता जल्पन्ति घूर्णिता इव ॥ २३९ ॥

इति[1] केवलिभुक्तिनिराकरणम् ।

अथ स्त्रीणां भवे तस्मिन् मोक्षोऽस्तीति वदन्ति ये ।
ते भवन्ति महामोहग्रहग्रस्ता जना इव ॥ २४० ॥
यद्यपि कुरुते नारी तपोऽप्यत्यन्तदुःसहम् ।
तथापि तद्भवे तस्या मोक्षो दूरतरो हि सः ॥ २४१ ॥
तस्या जीवो न किं जीवो जीवमात्रोऽथवा स्मृतः ।
मोक्षावाप्तिर्न जायेत नारीणां केन हेतुना ॥ २४२ ॥
जीवसामान्यतो मुक्तिर्यद्यस्ति चेत्प्रजायताम् ।
मातंगिन्याद्यशेषाणां नारीणामविशेषतः ॥ २४३ ॥
सदैवाशुद्धता योनौ गलन्मलाश्रयत्वतः ।
रजःस्खलनमेतासां मासं प्रति प्रजायते ॥ २४४ ॥
उत्पद्यन्ते सदा स्त्रीणां योनौ कक्षादिसन्धिषु ।
सूक्ष्मापर्याप्तका मर्त्यास्तद्देहस्य स्वभावतः ॥ २४५ ॥
स्वभावः कुत्सितस्तासां लिंग चात्यन्तकुत्सितम् ।
तस्मान्न प्राप्यते साक्षाद्द्वेधा संयमभावना ॥ २४६ ॥

---

1 इति ख–पुस्तके नास्ति ।

उत्कृष्टसंयमं मुक्त्वा शुक्लध्याने न योग्यता ।
नो मुक्तिस्तद्विना तस्मात्तासां मोक्षोऽस्ति दूरगः ॥ २४७ ॥
सप्तमं नरकं गन्तुं शक्तिर्यासां न विद्यते[1] ।
आद्यसंहननाभावान्मुक्तिस्तासां कुतस्तनी ॥ २४८ ॥
योषित्स्वरूपतीर्थेशां तल्लिंगस्तनभूषिताः ।
अर्चाः प्रतिष्ठिताः क्वापि विद्यन्ते चेत्प्रकथ्यताम् ॥ २४९ ॥
न सन्ति चेन्मताभावः सन्ति चेद्भण्डिमास्पदम् ।
एवं दोषद्वयासंगान्मोक्षो न घटते स्त्रियः ॥ २५० ॥
कुलीनः संयमी धीरो निःसंगो विजितेन्द्रियः ।
संप्राप्नोति पुमानेव मुक्तिकान्तासमागमम् ॥ २५१ ॥

इति स्त्रीमोक्षनिराकरणम् ।

---

मुक्त्वा निर्ग्रन्थसन्मार्गं[2] मोक्षैकसाधनं नृणाम् ।
सग्रन्थत्वेन मोक्षोऽस्ति प्रवदन्तीति दुर्धियः ॥ २५२ ॥
सग्रन्थत्वेन मोक्षस्य यद्यस्ति साधनं परम् ।
आदीश्वरेण साम्राज्यं राज्यं त्यक्तं कथं वद ॥ २५३ ॥
आद्यसंहननोपेतः कुलजोऽपि न सिद्ध्यति ।
विना निर्ग्रन्थलिंगेन नरः सर्वांगसुन्दरः ॥ २५४ ॥
न ह्येवं चीवरं दण्डं भिक्षापात्रादिसंयुतम् ।
इत्युपकरणं साधु गृह्यते मोक्षकाम्यया ॥ २५५ ॥

---

१–२४७ तमश्लोकस्योत्तरार्द्धं २४८ तम श्लोकस्य पूर्वार्धं ख–पुस्तकाद्धृतं ।
२ मुक्त्वा निर्ग्रन्थसन्मार्गं इत्यादि श्लोकादुत्तरं 'स्त्रीनिर्वाणनिराकरणं ।' इति पाठः क–पुस्तके ।

लिक्षायूकाश्रयस्थानं वस्त्रादीनां परिग्रहः ।
तस्यादानविनिक्षेपात् क्षालनादङ्गिनां वधः ॥ २५६ ॥
वस्त्रयाचनया दैन्यं प्राप्तौ व्यामोहता भवेत् ।
तस्मात्संयमहानिः स्यान्निर्मलत्वं च दूरगम् ॥ २५७ ॥
ततोऽन्तर्बाह्यभेदाभ्यां ग्रन्थाभ्यां परिवर्जितम् ।
जिनेन्द्रकथितं लिंगं सम्यक्त्वं तस्य भावना ॥ २५८ ॥
ससम्यक्त्वस्य जीवस्य चारित्रं मोक्षसाधकम् ।
तस्मान्नैर्ग्रन्थ्यतायुक्तं जिनलिंगं प्रशस्यते ॥ २५९ ॥
संयमोऽयं हि दुःसाध्यो जिनकल्पात्मिकोऽधुना ।
ततः स्थविरकल्पस्य वृत्तमस्माभिराश्रितम् ॥ २६० ॥
जिनकल्पोऽस्ति दुःसाध्यः सर्वसंगपरिच्युतः ।
तस्मात्त्वयैव नैर्ग्रन्थ्यं प्रमाणीकृतमञ्जसा ॥ २६१ ॥
नैवं परिग्रहाः सन्ति कल्पे स्थविरसंज्ञके ।
तस्याश्रयेऽपि तद्वाक्यं त्वयैव विफलीकृतम् ॥ २६२ ॥
अथैतत्कथ्यते वृत्तं जिनकल्पाभिधानकम् ।
यस्मान्मुक्तिवधूसंगो भव्यानां जायते ध्रुवम् ॥ २६३ ॥
शुद्धसम्यक्त्वसंयुक्ता विजिताक्षकषायकाः ।
श्रुतमेकादशाङ्गं ये जानन्त्येकाक्षरं यथा ॥ २६४ ॥
पादयोः कण्टकं लग्नं नेत्रयो रजसंगमे ।
स्वयं नापनयन्त्यन्यैः स्फेटिते मौनधारणम् ॥ २६५ ॥
आद्यसंहननोपेताः संततं मौनधारिणः ।
गुहायां पर्वतेऽरण्ये वसन्ति निम्नगातटे ॥ २६६ ॥

१ वस्त्रादिपरिग्रहस्य । २ भग्नं. ख. ।

वर्षासु मासषट्कं हि मार्गे जातेऽङ्गिसंकुले ।
निराहारा वितिष्ठन्ते[1] कायोत्सर्गेण निस्पृहाः ॥ २६७ ॥
सन्मोक्षसाधने निष्ठा रत्नत्रयविभूषिताः ।
निःसंगा निरता बाढं ध्यानयोर्धर्मशुक्लयोः ॥ २६८ ॥
मुनयोऽनियतावासा विहरन्ति जिना यथा ।
ततस्ते गणिभिः प्रोक्ता जिनकल्पाभिधानकाः ॥ २६९ ॥
अन्ये स्थविरकल्पस्था यतयो जिनलिङ्गिनः ।
सम्यक्त्वामलदुग्धाम्बुनिमग्नीकृतचेतसः ॥ २७० ॥
अष्टाविंशतिसंख्याकैः पंचमहाव्रतादिभिः[2] ।
मूलगुणैः समायुक्ता ध्यानाध्ययनतत्पराः ॥ २७१ ॥
शीलव्रतेषु संसक्ता दशधाधर्मतत्पराः ।
अन्तर्बाह्यतपोनिष्ठाः पंचाचारसमन्विताः ॥ २७२ ॥
जीर्णे तृणे[3] सुवर्णादौ मित्रे शत्रुसमागमे ।
दुःखोत्पत्तौ च सौख्ये च यतयः समबुद्धयः ॥ २७३ ॥
वदन्ति धर्मशास्त्रार्थमन्यथा मौनधारिणः ।
निःस्पृहा निरहंकाराः सर्वसत्त्वदयापराः ॥ २७४ ॥
केचिच्छ्रुतार्णवोत्तीर्णा मनःपर्ययबोधनाः ।
अवधिज्ञानिनः केचिदनागारा यतीश्वराः ॥ २७५ ॥
अवधेः प्राक् प्रगृह्णन्ति मृदुपिच्छं यथागतम् ।
यत्स्वयं पतितं भूमिप्रतिलेखनशुद्धये[5] ॥ २७६ ॥

१ च तिष्ठन्ति ख—पाठः । २ पंचभिश्च महाव्रतैः ख. । ३ जीर्णतृणे ख. ।
४ शास्त्रोपदेशादन्यसमये । ५ योः क. ।

स्थविरादिगणत्राणपोषणाहितमानसाः ।
ततः स्थविरकल्पस्था भण्यन्ते गणनायकैः ॥ २७७ ॥
संप्रति दुःषमे काले नीचसंहननाश्रयात् ।
संजाता[1] नगरग्रामजिनावासनिवासिनः ॥ २७८ ॥
नीचसंहननं कालो दुसहश्चपलं मनः ।
तथापि संयमोद्युक्ता महाव्रतधुरंधराः ॥ २७९ ॥
पुस्तकं च यथायोग्यं गृह्णन्ति संयमार्थिनः ।
अनवद्यं विशुद्धं यद्विना याचनयागतम् ॥ २८० ॥
गृह्णन्ति यतयो वस्तु दर्शनाद्यविघातकम् ।
न तद्विरोधि वस्त्रादि यत्र सावद्यसंभवः ॥ २८१ ॥
ईदृक्स्थविरकल्पः स्यात्सर्वसंगपरिच्युतः ।
अन्यो गृहस्थकल्पोऽयं यत्र वस्त्रादिसंग्रहः ॥ २८२ ॥
अयं गृहस्थकल्पस्तु निर्दिष्टः श्वेतवाससां[2] ।
इन्द्रियार्तिहरस्तेषां मुक्तये नैव जायते ॥ २८३ ॥
इत्येतन्मतमालम्ब्य ये वर्तन्ते यदृच्छया ।
मिथ्यात्वान्धतमस्तोमपटलावृतलोचनाः ॥ २८४ ॥
ये[3] चान्ये काष्ठसंघाद्या मिथ्यात्वस्य प्रवर्तनात् ।
आयत्यां प्राप्नुयुर्दुःखं चतुर्गतिषु सन्ततम् ॥ २८५ ॥

इति सग्रन्थमोक्षमार्ग-श्वेताम्बरमतनिराकरणम् ।

---

१ संवाह- ख. । ग्रामविशेषः । २ वाससा ख. । ३ ख—पुस्तकेऽयंश्लोको नास्ति ।

मिथ्यात्वालंबनापाकात् प्रयान्ति नारकीं गतिम् ।
यत्रास्ति दुःखमत्युग्रमन्योन्योदीरितं महत् ॥ २८६ ॥
तस्मान्निर्गत्य तैरश्चीं गतिं प्राप्यानुभूयते ।
भारातिवाहनाद्यं यद्भीमं दुःखमनेकधा ॥ २८७ ॥
कथंचिन्मानुषं जन्म प्राप्तं तत्रापि सह्यते ।
अर्थार्जनविहीनत्वाद्दुःखं स्वोदरपूर्तये ॥ २८८ ॥
काकतालीयकन्यायाद्गतिर्दैवी समाप्यते ।
तत्रास्ति मानसं दुःखं हीनाधिकविभूतितः ॥ २८९ ॥
एवमनेकधा दुःखं दुःखं दुःखं[1] पुनः पुनः ।
ततो मिथ्यात्वमुत्सृज्य सम्यक्त्वे भावनां कुरु ॥ २९० ॥
इत्येवं पंचधा प्रोक्तं मिथ्यादृष्ट्यभिधानकम् ।
नोपादेयमिदं सर्वं मिथ्यात्वविषदोषतः ॥ २९१ ॥

इति[2] प्रथमं मिथ्यात्वं गुणस्थानम् ।

---

अतः सासादनं नाम गुणस्थानद्वितीयकम् ।
निगद्यतेऽत्र मुख्यो हि भावः स्यात्पारिणामिकः ॥ २९२ ॥
सम्यक्त्वासादने नाम वर्तनं यस्य विद्यते ।
सासादन इति[3] प्राहुर्मुनयो भाववेदिनः ॥ २९३ ॥
अनादिकालसंभूतमिथ्याकर्मोपशान्तितः ।
स्यादौपशमिकं नाम सम्यक्त्वमादिमं हि तत् ॥ २९४ ॥
संत्यज्य वेदकं याति प्रशान्तात्मिकयां[4] दृशम् ।
गत्वा वा सादिमिथ्यात्वं द्वितीया सा दृगुच्यते ॥ २९५ ॥

---

१ सुखं. ख. । २ अयं पाठःख–पुस्तके २९२ श्लोकादुत्तरं । स च 'इत्याद्यऽमिथ्यात्वं गुणस्थानं प्रथमं' इत्येवं रूपः । ३ मिति. ख. । ४ प्रशान्तात्मिकयोर्दृशं क.।

आद्योपशमसम्यक्त्वात् प्रच्युतो याति वामताम् ।
च्युतोऽथवा द्वितीयं[1] स्यान्मिथ्यात्वं याति वा न वा ॥२९६॥

द्विकलम्—

आद्योपशमसम्यक्त्वरत्नाद्रेर्वा परिच्युतः ।
एकतरोदये जाते मध्येऽनन्तानुबन्धिनाम् ॥ २९७ ॥
समयादावलीषट्कं कालं यावन्न गच्छति ।
मिथ्यात्वभूतलं जीवस्तावत्सासादनो भवेत् ॥ २९८ ॥
अपूर्णश्वभ्रजीवेषु लब्ध्यपर्याप्तजन्तुषु ।
सर्वेष्वपि न जायेत सासादनो विनिश्चितम् ॥ २९९ ॥
आहारकद्वयं तीर्थकर्तृत्वनामकर्म च ।
सासादनो न बध्नाति सम्यक्त्वस्य विराधनात् ॥ ३०० ॥
भव्यत्वोदयता तस्य सम्यक्त्वग्रहणाद्विदुः ।
तद्ग्रहणस्य सामर्थ्यात्कियत्कालेन सिद्ध्यति ॥ ३०१ ॥
पश्य सम्यक्त्वमाहात्म्यं कियत्कालाप्तिसंभवम् ।
ततोऽत्र भावना भव्य ! कर्तव्याहर्निशं त्वया ॥ ३०२ ॥
सा[2]सादनगुणस्थानं व्यवहारात्प्रकथ्यते ।
क्षायोपशमिको भावो मुख्यत्वेनेह जायते ॥ ३०३ ॥

इति[3] द्वितीयं सासादनं गुणस्थानम् ।

---

१ द्वितीयस्मात् क. । २ श्लोकोऽयं ख-पुस्तके नास्ति । ३ 'सासादनगुण-स्थानं द्वितीयं' इति ख-पाठः ।

अथ मिश्रगुणस्थानं प्रकथ्यते यथागमम् ।
क्षायोपशमिको भावो मुख्यत्वेनेह जायते ॥ ३०४ ॥
मिश्रकर्मोदयाज्जीवे पर्यायः सर्वघातिजः ।
न सम्यक्त्वं न मिथ्यात्वं भावोऽसौ मिश्र उच्यते ॥३०५॥
अहिंसालक्षणो धर्मो यज्ञादिलक्षणोऽथवा ।
मन्यते समभावेन मिश्रकर्मविपाकतः ॥ ३०६ ॥
जिनोक्तिं मन्यते यद्वदन्योक्तिं मन्यते तथा ।
देवे दोषोज्झिते भक्तिस्[1]तथैव दोषसंयुते ॥ ३०७ ॥
निग्रन्था यतयो वन्द्यास्तथैव द्विजतापसाः ।
यत्रैषा जायते बुद्धिर्मिश्रं स्यात्तद्गुणास्पदम् ॥ ३०८ ॥
गोदुग्धे चार्कदुग्धे वा समताविलबुद्धयः ।
हेयोपादेयतत्वेषु यथैते विकलाशयाः ॥ ३०९ ॥
जैनभावा[2] वदन्त्येवं ममैताः कुलदेवताः ।
चंडिकाराममाताद्या महालक्ष्मीर्महालयाः ॥ ३१० ॥
अर्चन्ति परया भक्त्या प्रनृत्यन्ति तदग्रतः ।
ऐहिकाशामहामोहा[3]द्याकुलीकृतचेतसः ॥ ३११ ॥
मोहार्त्तः कुरुते श्राद्धं पितॄणां तृप्तिहेतवे ।
अजानन् जीवसद्भावगतिस्थित्यादिवर्तनम् ॥ ३१२ ॥
इत्येतद्वर्तनं सर्वं मिश्रभावसमाश्रितम् ।
येषां ते मिश्रभावाढ्या भ्रमन्ति भवपद्धतौ ॥ ३१३ ॥
सम्यग्मिथ्यात्वयोर्मध्ये यदेकतरभावना ।
तया स्यात्तस्य तन्नाम मिश्रं स्थानं ततो न हि ॥३१४ ॥

१ भक्ति. ख । २ जैनभावो वदत्येवं. ख. । ३ महामोहव्या. ख. ।

न ह्येवं सुप्रसिद्धोऽस्ति भावान्तरसमुद्भवः ।
सर्वशास्त्रेषु सर्वत्र बालगोपालसम्मतः ॥ ३१५ ॥
जात्यन्तरसमुद्भूतिर्वडवाखरयोर्यथा ।
गुडदध्नोः समायोगे रसान्तरं यथा भवेत् ॥ ३१६ ॥
तथा धर्मद्वये श्रद्धा जायते समबुद्धितः ।
मिश्रोऽसौ भण्यते तस्माद्भावो जात्यन्तरात्मकः ॥ ३१७ ॥
सकलाणुव्रते न स्तो नायुर्बन्धो भवेत्कचित् ।
मारणान्तं समुद्घातं न कुर्यान्मिश्रभावतः ॥ ३१८ ॥
मृत्युं न लभते जीवो मिश्रभावं समाश्रितः ।
सद्दृष्टिर्वामदृष्टिर्वा भूत्वा मरणमश्नुते ॥ ३१९ ॥
सम्यग्मिथ्यात्वयोर्मध्ये येनायुरर्जितं पुरा ।
म्रियते तेन भावेन गतिं यान्ति तदाश्रिताम् ॥ ३२० ॥
मिश्रभावमिमं त्यक्त्वा सम्यक्त्वं भज सन्मते ! ।
मुक्तिकान्तासुखावाप्त्यै यद्यस्ति विपुला मतिः ॥ ३२१ ॥

इति तृतीयं मिश्रगुणस्थानम् ।

---

असंयतगुणस्थानमतो वक्ष्ये चतुर्थकम् ।
सोपानमादिमं मोक्षप्रासादमधिरोहताम् ॥ ३२२ ॥
तत्रौपशमिको भावः क्षायोपशमिकाह्वयः ।
क्षायिकश्चेति विद्यन्ते त्रयो भावा जिनोदिताः ॥ ३२३ ॥

---

१ याति । २ अयं पाठः क–पुस्तके ३२२ श्लोकादुत्तरं । 'मिश्रगुणस्थानं तृतीयं' इत्येवं रूपः ख–पुस्तके पाठः ।

अक्षेषु विरतो नैव न स्थावरे वराङ्गिषु ।
द्वितीयानां कषायाणां विपाकादव्रतो यतः ॥ ३२४ ॥
श्रद्धानं कुरुते भव्यो ह्याज्ञयाधिगमेन वा ।
द्रव्यादीनां यथाम्नायं सम्यग्दृष्टिरसंयतः ॥ ३२५ ॥
परिच्छित्तौ पदार्थानां हर्षोल्लसितचेतसि ।
या रुचिर्जायते साध्वी तच्छ्रद्धानमिति स्मृतम् ॥ ३२६ ॥
आप्तागमयतीशानां तत्वानामल्पबुद्धितः ।
जिनाज्ञयैव विश्वासो भवत्याज्ञा हि सा परा ॥ ३२७ ॥
घातिकर्मक्षयोद्भूतकेवलज्ञानरश्मिभिः ।
प्रकाशकः पदार्थानां त्रैलोक्योदरवर्तिनाम् ॥ ३२८ ॥
सर्वज्ञः सर्वतो व्यापी त्यक्तदोषो ह्यवंचकः ।
देवदेवेन्द्रवन्द्यांह्रिराप्तोऽसौ परिकीर्तितः ॥ ३२९ ॥
पूर्वापरविरुद्धात्मदोषसंघातवर्जितः ।
यथावद्वस्तुनिर्णीतिर्यत्र स्यादागमो हि सः ॥ ३३० ॥
विराजतेऽष्टविंशत्या शुद्धैर्मूलगुणैः सदा ।
भेदाभेदनयाक्रान्तो रत्नत्रयविभूषणैः ॥ ३३१ ॥
ऐहिकाशापरित्यक्तो धर्मशास्त्रार्थतत्परः ।
रागद्वेषविनिर्मुक्तो दशधर्मसमन्वितः ॥ ३३२ ॥
निःशल्यो निरहंकारः परिग्रहपरिच्युतः ।
पक्षपातोज्झितः शान्तः स मुनिर्वन्द्यते मया ॥ ३३३ ॥
सूक्ष्मे जिनोदिते तत्वे नास्ति चेन्महती मतिः ।
आप्तोदितं यथाम्नायं श्रद्धानं क्रियते तथा ॥ ३३४ ॥

१ विरोधो नैव विद्यते ख. । २ श्रद्धातव्यं मनीषिभिः ख. ।

एवमाज्ञाभवो भावः प्ररूपितः समासतः[1] ।
अतोऽधिगमभावस्य लक्षणं कथ्यते यथा ॥ ३३५ ॥
निश्चीयते पदार्थानां लक्षणं नयभेदतः[2] ।
सोऽधिगमोऽभिमन्तव्यः सम्यग्ज्ञानविलोचनैः ॥ ३३६ ॥
द्रव्याणि षट्प्रकाराणि जीवोऽथ पुद्गलस्तथा ।
धर्माधर्मनभःकाला अतस्तेषां प्ररूपणम् ॥ ३३७ ॥
जीवो हि सोपयोगात्मा कर्ता भोक्ता तनुप्रमः ।
स्वभावेनोर्ध्वगोऽमूर्तः संसारी सिद्धिनायकः ॥ ३३८ ॥
जीवितो दशभिः प्राणैर्जीविष्यति च जीवति ।
स जीवः कथ्यते सद्भिर्जीवतत्त्वविदां वरैः ॥ ३३९ ॥
जन्तोर्भावो हि वस्त्वर्थ उपयोगः स च द्विधा ।
साकारोऽनिराकारो ज्ञानदर्शनभेदतः[3] ॥ ३४० ॥
उपयोगो हि साकारो ज्ञानलक्षणलक्षितः ।
स चाष्टधा भवेन्मिथ्यासम्यग्ज्ञानप्रभेदतः ॥ ३४१ ॥
कुमतिः कुश्रुतज्ञानं विभङ्गाख्योऽवधिस्तथा ।
अज्ञानत्रितयं चेति मिथ्याकर्मफलोद्भवम् ॥ ३४२ ॥
मतिः श्रुतावधी स्वान्तः केवलं चेति पंचधाः ।
सम्यग्ज्ञानं भवेत्तस्य वर्तनं स्वार्थगोचरम् ॥ ३४३ ॥
स्याद्दर्शनोपयोगस्तु चतुर्भेदमुपागतः ।
निराकारो हि तस्यास्ति स्थितिरान्तर्मुहूर्तिकी ॥ ३४४ ॥

१ समाहितः ख.। २ नव. ख.। ३ अस्मादग्रे ज्ञानोपयोगः साकारः, दर्शनोपयोगोऽनाकारः स चोपयोगलक्षणः पुस्तकद्वयेऽप्य पाठः ।

चक्षुर्दर्शनमाद्यं स्यादचक्षुर्दर्शनं ततः ।
अवध्याख्यं च कैवल्यं चतुर्धेति प्रचक्ष्यते ॥ ३४५ ॥
अक्षैर्मनोवधिभ्यां वा विशिष्टवस्तुदर्शनम् ।
तद्दर्शनं भवेत्स्वात्मसंवित्तिः केवलं परम् ॥ ३४६ ॥
स्वयं कर्म करोत्युच्चैः शुभाशुभविकल्पतः ।
कर्ताऽसौ कथ्यते सद्भिर्व्यवहारनयाश्रयात् ॥ ३४७ ॥
तत्फलं च स्वयं भुंक्ते तस्माद्भोक्तेति भण्यते ।
प्रविस्तारोपसंहाराद्भवत्यङ्गी तनुप्रमः ॥ ३४८ ॥
स्वभावेनोर्ध्वगा शक्तिस्तस्माद्भवेत्तदात्मकः ।
वर्णादिभिर्विहीनत्वादमूर्तो जायते हि सः ॥ ३४९ ॥
पंचविधेऽत्र संसारे जीवः संसरति स्वयम् ।
तस्माद्भवति संसारी कृतकर्मप्रचोदितः ॥ ३५० ॥
प्राप्य द्रव्यादिसामग्रीं भस्मसात्कुरुते स्वयम् ।
कर्मेन्धनानि सर्वाणि तस्मात्सिद्ध इति स्मृतः ॥ ३५१ ॥
अवस्थाभेदतो जीवः पुनस्त्रेधा प्रचक्ष्यते ।
बहिरात्मान्तरात्मा च परमात्मेति तत्वतः ॥ ३५२ ॥
हेयोपादेयवैकल्यान्न च वेत्त्यहितं हितम् ।
निमग्नो विषयाक्षेषु बहिरात्मा विमूढधीः ॥ ३५३ ॥
अन्तरात्मा त्रिधा क्लिष्टमध्यमोत्कृष्टभेदतः ।
असंयतो जघन्यः स्यान्मध्यमौ द्वौ तदुत्तरौ ॥ ३५४ ॥
अप्रमत्तादयः सर्वे यावत्क्षीणकषायकाः ।
उत्तमा यतयः शान्ताः प्रभवन्त्युत्तरोत्तरम् ॥ ३५५ ॥

परमात्मा द्विधा सूत्रे सकलो निकलः स्मृतः ।
सकलो भण्यते सद्भिः केवली जिनसत्तमः ॥ ३५६ ॥
निष्कलो मुक्तिकान्तेशश्चिदानन्दैकलक्षणः ।
अनंतसुखसंतृप्तः कर्माष्टकविवर्जितः ॥ ३५७ ॥

जीवः[1] ।

---

वर्णमेकं रसं गन्धं स्पर्शयुग्मं च गाहते ।
पुद्गलाणुः परः प्रोक्तो गलनपूरणात्मकः ॥ ३५८ ॥
द्व्यणुकादिविभेदेन स्निग्धरूक्षत्वसंश्रयात् ।
बन्धोऽन्योन्यं भवेत्तेषां वृद्धिरूपादनेकधा ॥ ३५९ ॥
शब्दो बन्धस्तमश्छाया सूक्ष्मस्थौल्यातपद्युति ।
भेदसंस्थानमित्येते पर्यायास्तस्य कीर्तिताः ॥ ३६० ॥
पृथ्वी तोयं तथा च्छाया चाक्षुषो नाक्षगोचरः ।
कर्माणि परमाण्वन्तं तेषां सौक्ष्म्यं[2] यथोत्तरम् ॥ ३६१ ॥
स्थूलस्थूलं तथा स्थूलं स्थूलसूक्ष्मास्ततः परम् ।
सूक्ष्मस्थूलाश्च सूक्ष्माणि सूक्ष्मसूक्ष्मा इति क्रमात् ॥ ३६२ ॥

पुद्गलः ।

---

गतिहेतुर्भवेद्धर्मो जीवपुद्गलयोर्द्वयोः ।
यथोदकं हि मत्स्यानां सन्तिष्ठतोस्तथा न सः ॥ ३६३ ॥

धर्मः ।

---

अधर्मः स्थितिदानाय हेतुर्भवति तद्द्वयोः ।
पथिकानां यथा च्छाया गच्छतोः स न धारकः ॥६६४॥

---

१ अयं पाठः क–पुस्तके नास्ति । २ सूक्ष्मो. ख. ।

अधर्म[1]: ।

द्रव्याणामवगाहस्य योग्यं यत्तन्नभो भवेत् ।
लोकाकाशमलोकाख्यमाकाशमिति तद्द्विधा ॥ ३६५ ॥

आकाश[2]: ।

वर्णगन्धादिभिर्मुक्ता असंख्याताः सुनिश्चलाः ।
वर्तनालक्षणोपेता जीवपुद्गलयोः परम् ॥ ३६६ ॥
तिष्ठन्त्येकैकरूपेण लोकाकाशप्रदेशकान् ।
व्याप्य कालाणवो मुख्याः प्रत्येकं रत्नराशिवत् ॥ ३६७ ॥
परिणामः पदार्थानां कालास्तित्वप्रसादकः ।
अन्यथा नवजीर्णादिपर्यायज्ञानता कथम् ॥ ३६८ ॥
नोपचारो विना मुख्यं नरसिंहोपचारवत् ।
तथोपचारमाश्रित्य कालोऽस्ति व्यावहारिकः ॥ ३६९ ॥
मुख्यकालस्य पर्यायः समयादिस्वरूपवान् ।
व्यवहारो मतः कालः कालज्ञानप्रवेदिनाम् ॥ ३७० ॥
तं कालाणुं समुल्लंघ्य मंदं गच्छति पुद्गलः ।
यावता कालमात्रेण स कालः समयात्मकः ॥ ३७१ ॥
तस्मादावलिपूर्वा ये मुहूर्ताद्याश्च पर्ययाः ।
मर्त्यक्षेत्रे प्रवर्न्तन्ते भानोर्गतिवशाद्भुवि ॥ ३७२ ॥

काल[3]: ।

१-२-३ इमे शब्दाः क-पुस्तके न सन्ति ।

गुणपर्ययवद्द्रव्यसन्दोहो वर्ण्यते बुधैः ।
सप्तभंगीं समालिंग्य स्वान्यद्रव्यस्वभावतः ॥ ३७३ ॥
सहभूता गुणा ज्ञेयाः सुवर्णे पीतता यथा ।
क्रमभूतास्तु पर्यायाः जीवे गत्यादयो यथा ॥ ३७४ ॥
पर्यायाः प्रभवन्त्येते भेदद्वयसमाश्रिताः ।
अर्थव्यञ्जनभेदाभ्यां वदन्तीति महर्षयः ॥ ३७५ ॥
सूक्ष्मोऽवाग्गोचरो वेद्यः केवलज्ञानिनां स्वयम् ।
प्रतिक्षणं विनाशी स्यात् पर्यायो ह्यर्थसंज्ञिकः ॥ ३७६ ॥
स्थूलः कालान्तरस्थायी सामान्यज्ञानगोचरः ।
दृष्टिग्राह्यस्तु पर्यायो भवेद्व्यञ्जनसंज्ञकः ॥ ३७७ ॥
द्रव्याण्यनाद्यनन्तानि द्रव्यत्वेन भवन्त्यपि ।
ध्रौव्यव्ययसमुत्पत्तिस्वभावान्यखिलान्यपि ३७८ ॥
कालत्रयानुयायित्वं यद्रूपं वस्तुनो भवेत् ।
तद्ध्रौव्यत्वमिति प्राहुर्वृषभाद्या गणाधिपाः ॥ ३७९ ॥
पूर्वाकारान्यथाभावो विनाशो वस्तुनः पुनः ।
अपूर्वाकारसंप्राप्तिरुत्पत्तिरिति कीर्त्यते ॥ ३८० ॥
स्वभावेतरपर्याया जीवपुद्गलयोर्द्वयोः ।
विभावपर्यया न स्युः शेषद्रव्यचतुष्टये ॥ ३८१ ॥
कायत्वमस्ति पंचानां प्रदेशततिसंभवात् ।
नास्ति कालस्य कायत्वं प्रदेशतत्यसंभवात् ॥ ३८२ ॥
धर्माधर्मैकजीवानामसंख्येयप्रदेशता ।
पुद्गलानां त्रिधा देशा नभोऽनन्तप्रदेशकम् ॥ ३८३ ॥
जीवाजीवास्रवा बन्धसंवरौ निर्जरा तथा ।
मोक्षश्चेति सुतत्वानि सप्त स्युर्जैनशासने ॥ ३८४ ॥

चेतनालक्षणो जीवोऽमूर्तोऽनाद्यविनाशकः ।
अजीवः पंचधा ज्ञेयः पुद्गलादिप्रभेदतः ॥ ३८५ ॥

भावास्रवो भवेज्जीवो मिथ्यात्वादिचतुष्टयात् ।
ततो द्रव्यास्रवो योऽसौ कर्माष्टकसमाश्रयः ॥ ३८६ ॥

बध्यते कर्म भावेन येन तद्भावबन्धनम् ।
जीवकर्मप्रदेशानामाश्लेषो द्रव्यबन्धनम् ॥ ३८७ ॥

स प्रकृतिप्रदेशाख्यस्थित्यनुभागभेदभाक् ।
योगैर्द्वावादिमौ स्यातां कषायैर्द्वौ तदुत्तरौ ॥ ३८८ ॥

कर्मास्रवनिरोधात्मा चिद्भावो भावसंवरः ।
व्रताद्यैः कर्मसंरोधः स भवेद्द्रव्यसंवरः ॥ ३८९ ॥

हठात्कारस्वभावाभ्यां जायते कर्मनिर्जरा ।
अविपाका स्वपाकेति द्विविधा सा यथाक्रमम् ॥ ३९० ॥

कर्मक्षयाय यो भावो भावमोक्षो भवत्यसौ ।
जायते द्रव्यमोक्षस्तु जीवकर्मपृथक्क्रिया ॥ ३९१ ॥

इत्येवं सप्ततत्त्वानि तान्येव प्रभवन्त्यपि ।
युक्तानि पुण्यपापाभ्यां पदार्था नव संस्मृताः ॥ ३९२ ॥

पुरोक्तलक्षणः जीवः सम्यक्त्वव्रतभूषितः ।
पुण्यं तद्विपरीतो यः स पापमिति कीर्त्यते ॥ ३९३ ॥

एवं द्रव्यादिसन्दोहे श्रद्धानं यथार्थतः ।
अनादिकर्मसम्बन्धविच्छित्तौ जायतेऽङ्गिनाम् ॥ ३९४ ॥

चतुर्गतिभवो भव्यः संज्ञी पूर्णः सुलेश्यकः ।
जागरी लब्धिमान् शुद्धो ज्ञानी सम्यक्त्वमर्हति ॥ ३९५ ॥

वारणं तस्य चत्वारो ये चानन्तानुबन्धिनः ।
मिथ्यात्वमिश्रसम्यक्त्वं चेति दृङ्मोहसप्तकम् ॥ ३९६ ॥
इत्यासां प्रकृतीनां तु सप्तानामुपशान्तितः ।
प्रोक्तौपशमिका दृष्टिः प्रशान्तपंकतोयवत् ॥ ३९७ ॥
सर्वघ्नस्पर्धकानां यः पाकाभावात्मकः क्षयः ।
सत्तात्मोपशमो यत्र क्षायोपशमिकं हि तत् ॥ ३९८ ॥
उदितास्ते क्षयं याताः स्पर्धकाः सर्वघातकाः ।
शेषाः प्रशमिताः सन्ति क्षायोपशमिकं ततः ॥ ३९९ ॥
यद्वेद्यते चलागाढमालिन्येन पृथक् पृथक् ।
सम्यक्त्वप्रकृतेः पाकात् तस्मात्तद्वेदकाह्वयम् ॥ ४०० ॥
एतत्संसारविच्छित्त्यै जायते देहिनां खलु ।
मौढ्यादिदोषनिर्मुक्तं निःशंकाद्यङ्गसंयुतम् ॥ ४०१ ॥
सूर्यार्घो वन्हिसत्कारो गोमूत्रस्य निषेवणम् ।
तत्पृष्ठान्तनमस्कारो भृगुपातादिसाधनम् ॥ ४०२ ॥
देहलीगेहरत्नाश्वगजशस्त्रादिपूजनम् ।
नदीह्रदसमुद्रेषु मज्जनं पुण्यहेतवे ॥ ४०३ ॥
संक्रान्तौ च तिलस्नानं दानं च ग्रहणादिषु ।
सन्ध्यायां मौनमित्यादि त्यज्यतां लोकमूढताम् ॥ ४०४ ॥
ऐहिकाशावशित्वेन कुत्सितो देवतागणः ।
पूज्यते भक्तितो बाढं सा देवमूढता मता ॥ ४०५ ॥
दृष्ट्वा मंत्रादिसामर्थ्यं पापिपाषण्डिचारिणाम् ।
उपास्तिः क्रियते तेषां सा स्यात्पाषण्डिमूढता ॥ ४०६ ॥

ज्ञानं पूजा तपो वित्तं कुलं जातिर्बलं वपुः ।
एतानाश्रित्य गर्वित्वं तन्मदाष्टकमिष्यते ॥ ४०७ ॥
कुदेवः कुमतालम्बी कुशास्त्रं कुत्सितं तपः ।
कुशास्त्रज्ञः कुलिंगीति स्युरनायतनानि षट् ॥ ४०८ ॥
समीचीनमिदं रूपं कुदेवस्येति जल्पनम् ।
इत्यादिभावना भव्यैस्त्याज्यानायतनात्मिका ॥ ४०९ ॥
इदमेवेदृशं तत्वं जिनोक्तं तन्न चान्यथा ।
इत्यकम्पा[1] रुचिर्यासौ निःशंकाङ्गं[2] तदुच्यते ॥ ४१० ॥
संसारेन्द्रियभोगेषु सर्वेषु भंगुरात्मसु ।
निरीहभावना यत्र सा निष्कांक्षा स्मृता बुधैः ॥ ४११ ॥
स्वभावमलिने देहे रत्नत्रयपवित्रिते ।
जुगुप्सारहितो भावो सा स्यान्निर्विचिकित्सिता ॥४१२॥
दोषदृष्टेषु[3] शास्त्रेषु तपस्विदेवतादिषु ।
चित्तं न मुह्यते क्वापि तदमूढत्वं निगद्यते ॥ ४१३ ॥
रत्नत्रयोपयुक्तस्य जनस्य कस्यचित्कचित् ।
गोपनं प्राप्तदोषस्य तद्भवत्युपगूहनम् ॥ ४१४ ॥
दर्शनाज्ज्ञानतो[4] वृत्ताचलतां गृहमेधिनाम् ।
यतीनां स्थापनं तद्धि स्थितीकरणमुच्यते ॥ ४१५ ॥
रोगार्दितश्रमार्तानां साधूनां गृहिणामपि ।
यथायोग्योपचारस्तद्वात्सल्यं धर्मकाम्यया ॥ ४१६ ॥
मिथ्यातमस्त्वपाकृत्य सद्धर्मोद्योतनं परम् ।
क्रियते शक्तितो बाढं सैषा प्रभावना मता ॥ ४१७ ॥

---

१ इत्यशंका. ख. २ निःशंकत्वं. । ३ दुष्टेषु. ख. । ४ दर्शनज्ञानतो ख. ।

एवमष्टांगसंयुक्तं सम्यक्त्वं स्याद्भवापहम् ।
साधकः सर्वकार्येषु मंत्रः पूर्णाक्षरो यथा ॥ ४१८ ॥
दृग्मोहक्षयसंभूतौ यच्छ्रद्धानमनुत्तरं ।
भवेत्तत्क्षायिकं नित्यं कर्मसंघातघातकम् ॥ ४१९ ॥
नानावाग्भिर्बहूपायैर्भीष्मरूपैश्च दुर्धरैः ।
त्रिदशाद्यैर्न चाल्येत तत्सम्यक्त्वं कदाचन ॥ ४२० ॥
क्षायिकीदृक्क्रियारम्भी केवलिक्रमसन्निधौ ।
कर्मक्ष्माजो[1] नरस्तत्र कश्चिन्निष्ठापको[2] भवेत् ॥ ४२१ ॥
लब्धमृत्युर्नरः कश्चिद्बद्धायुष्कः प्रगच्छति ।
यस्यां गतौ हि तत्रैव पूर्णतां कुरुते ध्रुवम् ॥ ४२२ ॥
इत्येकेनैव संयुक्तः स्याद्भव्योऽसंयमाह्वयः ।
द्वितीयानां कषायाणामुदयादव्रतो हि सः ॥ ४२३ ॥
प्रशमास्तिक्यसंवेगाः सहानुकम्पया गुणाः ।
विद्यन्ते हृदये यस्य स स्यात्सम्यक्त्वभूषितः ॥ ४२४ ॥
ततस्तु व्रतहीनोऽपि प्राणिघाताय नोद्यमी ।
प्राणिघातनशीलः स्यात्सम्यक्त्वस्यातिदूरगः ॥ ४२५ ॥
काकतालीयकन्यायात् सम्यक्त्वं जातमात्रकम्[3] ।
जीवस्यानन्तसंसारं संख्यात्मिकां स्थितिं नयेत् ॥ ४२६ ॥
भावनादित्रिषु स्त्रीषु षट्स्वधःश्वभ्रभूमिषु ।
अवस्थायामपूर्णायां न हि सम्यक्त्वसंभवः ॥ ४२७ ॥
यस्य सम्यक्त्वसम्भूतिरायुर्बन्धेऽथ दुर्गतौ ।
गतिच्छेदो न तस्यास्ति तथाप्यल्पतरा स्थितिः ॥ ४२८ ॥

१ कर्मक्ष्माण्यो इति पृथग्विभक्त्यन्तपदं ख-पुस्तके । २ अस्य स्थाने कश्चि-देति संभाव्यते । ३ याति. क. ।

आयुर्बन्धे चतुर्गत्यां यदि सम्यक्त्वसंभवः ।
देवायुर्बन्धनं मुक्त्वा नाप्येतेऽणुमहाव्रते ॥ ४२९ ॥
क्षयोपशममद्दृष्टिः पदं प्राप्नोति दुर्लभम् ।
सुदेवं स्वर्गलोकेषु मानुषं कर्मभूमिषु ॥ ४३० ॥
लब्ध्वा क्षायिकसम्यक्त्वमेकतृतीयतुर्यके ।
भवे मुक्तिं प्रयात्यङ्गी नास्त्यतोऽन्यभवाश्रयः ॥ ४३१ ॥
आर्त्तरौद्रं भवेद्ध्यानं तत्र मन्दत्वमागतम् ।
आर्त्तं चतुर्विधं प्रोक्तं रौद्रध्यानं च तद्विधम् ॥ ४३२ ॥
अनिष्टयोगसम्भूतिरिष्टार्थस्य वियोगता ।
अप्राप्तिरिच्छितार्थस्य चतुर्थं स्यान्निदानकम् ॥ ४३३ ॥
आर्त्तध्यानवशाज्जीवः करोत्यशुभबन्धनम् ।
बद्धायुष्को मृतिं लब्ध्वा तैरश्चीं गतिमश्नुते ॥ ४३४ ॥
हिंसानन्दो मृषानन्दः स्तेयानन्दस्तृतीयकः ।
तुर्यः संरक्षणानन्दो रौद्रध्यानस्य पर्ययाः ॥ ४३५ ॥
रौद्रध्यानेऽथ जीवेन कषायविषमोहिना ।
आद्यश्वभ्रावनौ जन्म बद्धायुष्केण लभ्यते ॥ ४३६ ॥
गौणवृत्त्या भवेत्तस्य धर्मध्यानं कथंचन ।
आप्तोपज्ञस्य शास्त्रस्य चिन्तनश्रवणात्मकम् ॥ ४३७ ॥

उक्तं च—

मनः सदर्थाधिगमे प्रवृत्तं वाक्पाठयोगे नयने च वर्णे ।
श्रुतौ श्रुतौ निश्चलविग्रहश्च ध्यानेऽपि चैकाग्र्यमिहापि सौम्यं ॥१॥

१ रीप्सितार्थस्य. ख. । २ ध्यानेन जीवेन. ख. । ३ आद्यः ख. । ४ धर्मध्यानस्य पर्ययः ख. । ५ शाम्यं ख. ।

असंयतो निजात्मानमेकवारं दिनं प्रति ।
ध्यायत्यनियतं कालं नो चेत्सम्यक्त्वदूरगः ॥ ४३८ ॥

उक्तं च प्रवचनतिलके—

अविरियसम्माइट्ठी णियमियवेलादियं ण कुव्वंतो ।
पडि पडि दिणमिगिवारं सो झायदि अप्पगं सुद्धं[1] ॥ १ ॥

ईदृशं भेदसम्यक्त्वं साधकं निश्चयात्मनः ।
निश्चयात्म्यं निजात्मैव तत्साध्यं स्यान्मनीषिभिः ॥ ४३९ ॥
असंयतगुणस्थानं चतुर्थं प्रतिपादितम् ।
देशसंयमिनो धाम पंचमं कथ्यतेऽधुना ॥ ४४० ॥

इति चतुर्थमसंयतगुणस्थानम् ।

---

अतो देशव्रताभिख्ये गुणस्थाने हि पंचमे ।
भावास्त्रयोऽपि विद्यन्ते पूर्वोक्तलक्षणा इह ॥ ४४१ ॥
प्रत्याख्यानोदयाज्जीवो नो धत्तेऽखिलसंयमम् ।
तथापि देशसंत्यागात्संयतासंयतो मतः ॥ ४४२ ॥
विरतिस्त्रसघातस्य मनोवाक्काययोगतः ।
स्थावराङ्गिविघातस्य प्रवृत्तिस्तस्य कुत्रचित् ॥ ४४३ ॥

---

१ सुक्खं ख,. अस्या अग्रे इमे अस्पष्टे गाथे ख–पुस्तके । तथा चोक्तं दशवैकालिकग्रन्थे—

जो पुव्वरत्तवरत्तकाले संपिक्खई अप्पगमप्पगेणं ।
किमेकदं किच्चमकिच्चसेसं किं सक्कणिज्जं गुसयाणरामि ॥ १ ॥

किं मेसरो पस्सइ किं च अप्पा दोसागयं किं ण विवज्जयामि ।
इच्चेव सम्मं अणुपस्समाणो अण(णा)गयं णो पडिबंधं कुज्जा ॥ २ ॥

विरताविरतस्तस्माद्भण्यते देशसंयमी ।
प्रतिमालक्षणास्तस्य भेदा एकादश स्मृताः ॥ ४४४ ॥
आद्यो दर्शनिकस्तत्र व्रतिकः स्यात्ततः परम् ।
सामायिकव्रती चाथ सप्रोपधोपवासकृत् ॥ ४४५ ॥
सचित्ताहारसंत्यागी दिवास्त्रीभजनोज्झितः ।
ब्रह्मचारी निरारम्भः परिग्रहपरिच्युतः ॥ ४४६ ॥
तस्मादनुमतोद्दिष्टविरतौ द्वाविति क्रमात् ।
एकादशविकल्पाः स्युः श्रावकाणां क्रमादमी ॥ ४४७ ॥
गृही दर्शनिकस्तत्र सम्यक्त्वगुणभूषितः ।
संसारभोगनिर्विण्णो ज्ञानी जीवदयापरः ॥ ४४८ ॥
माक्षिकामिषमद्यं च सहोदुम्बरपंचकैः ।
वेश्या पराङ्गना चौर्यं द्यूतं नो भजते हि सः ॥ ४४९ ॥
दर्शनिकः प्रकुर्वीत निशि भोजनवर्जनम् ।
यतो नास्ति दयाधर्मो रात्रौ भुक्तिं प्रकुर्वतः ॥ ४५० ॥

दर्शनप्रतिमा ।

---

स्थूलहिंसानृतस्तेयपरस्त्री चाभिकांक्षता ।
अणुव्रतानि पंचैव तत्त्यागात्स्यादणुव्रती ॥ ४५१ ॥
योगत्रयस्य सम्बन्धात्कृतानुमतकारितैः ।
न हिनस्ति त्रसान् स्थूलमहिंसाव्रतमादिमम् ॥ ४५२ ॥
न वदत्यनृतं स्थूलं न परान् वादयत्यपि ।
जीवपीडाकरं सत्यं द्वितीयं तदणुव्रतम् ॥ ४५३ ॥
अदत्तपरवित्तस्य निक्षिप्तविस्मृतादितः ।
तत्परित्यजनं स्थूलमचौर्यं व्रतमूचिरे ॥ ४५४ ॥

---

१ वर. ख. । २ ति. ख. ।

मातृवत्परनारीणां परित्यागस्त्रिशुद्धितः ।
स स्यात्पराङ्गनात्यागो गृहिणां शुद्धचेतसाम् ॥ ४५५ ॥
धनधान्यादिवस्तूनां संख्यानं मुह्यतां विना ।
तदणुव्रतमित्याहुः पंचमं गृहमेधिनाम् ॥ ४५६ ॥
शीलव्रतानि तस्येह गुणव्रतत्रयं यथा ।
शिक्षाव्रतं चतुष्कं च सप्तैतानि विदुर्बुधाः ॥ ४५७ ॥
दिग्देशानर्थदण्डानां विरतिः क्रियते तथा[1] ।
दिग्व्रतत्रयमित्याहुर्मुनयो व्रतधारिणः ॥ ४५८ ॥
कृत्वा संख्यानमाशायां ततो बहिर्न गम्यते ।
यावज्जीवं भवत्येतद्दिग्व्रतमादिमं व्रतम् ॥ ४५९ ॥
कृत्वा कालावधिं शक्त्या कियत्प्रदेशवर्जनम् ।
तद्देशविरतिर्नाम व्रतं द्वितीयकं विदुः ॥ ४६० ॥
खनित्रविषशस्त्रादेर्दानं स्याद्वधहेतुकम् ।
तत्त्यागोऽनर्थदण्डानां वर्जनं तत्तृतीयकम् ॥ ४६१ ॥
सामायिकं च प्रोषधविधिं च भोगोपभोगसंख्यानम् ।
अतिथीनां सत्कारो वा शिक्षाव्रतचतुष्कं स्यात् ॥ ४६२ ॥
सामायिकं प्रकुर्वीत कालत्रये दिनं प्रति ।
श्रावको[2] हि[3] जिनेन्द्रस्य[4] जिनपूजापुरःसरम् ॥ ४६३ ॥
कः पूज्यः पूजकस्तत्र पूजा च कीदृशी मता ।
पूज्यः शतेन्द्रवन्द्यांह्रिर्निर्दोषः केवली जिनः ॥ ४६४ ॥
भव्यात्मा पूजकः शान्तो वेश्यादिव्यसनोज्झितः ।
ब्राह्मणः क्षत्रियो वैश्यः स शूद्रो[5] वा सुशीलवान् ॥४६५॥

---

१ यथा ख. । २ श्रावकेण क. । ३ हीति नास्ति. क–पुस्तके । ४ 'सच्छू-
ो वा' इति सुभाति । ५ दृढव्रती ख. ।

उक्तं[1] च जिनसंहितायां—

ब्राह्मणः क्षत्रियो वैश्यः स शूद्रो[2] वा सुशीलवान् ॥ ॥

अन्येषां नाधिकारित्वं ततस्तैः प्रविधीयताम् ।
जिनपूजां विना सर्वा दूरा सामायिकी क्रिया ॥ ४६६ ॥
जिनपूजा प्रकर्तव्या पूजाशास्त्रोदितक्रमात् ।
यया संप्राप्यते भव्यैर्मोक्षसौख्यं निरन्तरम् ॥ ४६७ ॥
तावत्प्रातः समुत्थाय जिनं स्मृत्वा विधीयताम् ।
प्राभातिको विधिः सर्वः शौचाचमनपूर्वकम् ॥ ४६८ ॥
ततः पौर्वाह्णिकीं सन्ध्याक्रियां समाचरेत्सुधीः ।
शुद्धक्षेत्रं समाश्रित्य मंत्रवच्छुद्धवारिणा ॥ ४६९ ॥
पश्चात् स्नानविधिं कृत्वा धौतवस्त्रपरिग्रहः ।
मंत्रस्नानं व्रतस्नानं कर्तव्यं मंत्रवत्तंतः[3] ॥ ४७० ॥
एवं स्नानत्रयं कृत्वा शुद्धित्रयसमन्वितः ।
जिनावासं विशेन्मंत्री समुच्चार्य निषेधिकाम् ॥ ४७१ ॥
कृत्वेर्यापथसंशुद्धिं जिनं स्तुत्वातिभक्तितः ।
उपविश्य जिनस्याग्रे कुर्याद्विधिमिमां पुरा ॥ ४७२ ॥
तत्रादौ शोषणं स्वांगे दहनं प्लावनं ततः ।
इत्येवं मंत्रविन्मंत्री स्वकीयाङ्गं पवित्रयेत् ॥ ४७३ ॥
हस्तशुद्धिं विधायाथ प्रकुर्यात्सकलीक्रियाम् ।
कूटबीजाक्षरैर्मंत्रैर्दशदिग्बंधनं ततः ॥ ४७४ ॥

---

१ उक्तं चार्धश्लोकेन जिनसंहितायां ख–पाठः । २ सच्छूद्रो वा इत्यनेन पाठेन भाव्यं । ३ वि. ख. ।

पूजापात्राणि सर्वाणि समीपीकृत्य सादरम् ।
भूमिशुद्धिं विधायोच्चैर्दर्भाग्निज्वलनादिभिः ॥ ४७५ ॥
भूमिपूजां च निर्वृत्य ततस्तु नागतर्पणम् ।
आग्नेयदिशि संस्थाप्य क्षेत्रपालं प्रतृप्य च ॥ ४७६ ॥
स्नानपीठं दृढं स्थाप्य प्रक्षाल्य शुद्धवारिणा ।
श्रीबीजं च विलिख्यात्र गन्धाद्यैस्तत्प्रपूजयेत् ॥ ४७७ ॥
परितः स्नानपीठस्य मुखार्पितसपल्लवान् ।
पूरितांस्तीर्थसत्तोयैः कलशांश्चतुरो न्यसेत् ॥ ४७८ ॥
जिनेश्वरं समभ्यर्च्य मूलपीठोपरिस्थितम् ।
कृत्वाह्वानविधिं सम्यक् प्रापयेत्स्नानपीठिकाम्[1] ॥ ४७९ ॥
कुर्यात्संस्थापनं तत्र सन्निधानविधानकम् ।
नीराजनैश्च निर्वृत्य जलगन्धादिभिर्यजेत् ॥ ४८० ॥
इन्द्राद्यष्टदिशापालान् दिशाष्टसु निशापतिम् ।
रक्षोवरुणयोर्मध्ये शेषमीशानशक्रयोः ॥ ४८१ ॥
न्यस्याह्वानादिकं कृत्वा क्रमेणैतान् मुदं नयेत् ।
बलिप्रदानतः सर्वान् स्वस्वमंत्रैर्यथादिशम् ॥ ४८२ ॥
ततः कुम्भं समुद्धार्य तोयचोचेक्षुसद्रसैः ।
सद्घृतैश्च ततो दुग्धैर्दधिभिः स्नापयेज्जिनम् ॥ ४८३ ॥
तोयैः प्रक्षाल्य सच्चूर्णैः कुर्यादुद्वर्त्तनक्रियाम् ।
पुनर्नीराजनं कृत्वा स्नानं कषायवारिभिः ॥ ४८४ ॥
चतुष्कोणस्थितैः कुम्भैस्ततो गन्धाम्बुपूरितैः ।
अभिषेकं प्रकुर्वीरन् जिनेशस्य सुखार्थिनः ॥ ४८५ ॥

---

१ कं. क. ।

स्वोत्तमाङ्गं प्रसिंच्याथ जिनाभिषेकवारिणा ।
जलगन्धादिभिः पश्चादर्चयेद्बिम्बमर्हतः ॥ ४८६ ॥
स्तुत्वा जिनं विसर्ज्यापि दिगीशादिमरुद्गणान् ।
आर्चिते मूलपीठेऽथ स्थापयेज्जिननायकम् ॥ ४८७ ॥
तोयैः कर्मरजःशान्त्यै गन्धैः सौगन्धसिद्धये ।
अक्षतैरक्षयावाप्त्यै पुष्पैः पुष्पशरच्छिदे ॥ ४८८ ॥
चरुभिः सुखसंवृद्ध्यै देहदीप्त्यै प्रदीपकैः ।
सौभाग्यावाप्तये धूपैः फलैर्मोक्षफलाप्तये ॥ ४८९ ॥
घण्टाद्यैर्मंगलद्रव्यैर्मंगलावाप्तिहेतवे ।
पुष्पाञ्जलिप्रदानेन पुष्पदन्ताभिदीप्तये ॥ ४९० ॥
तिसृभिः शान्तिधाराभिः शान्तये सर्वकर्मणाम् ।
आराधयेज्जिनाधीशं मुक्तिश्रीवनितापतिम् ॥ ४९१ ॥
इत्येकादशधा पूजां ये कुर्वन्ति जिनेशिनाम् ।
अष्टौ कर्माणि सन्दह्य प्रयान्ति परमं पदम् ॥ ४९२ ॥
अष्टोत्तरशतैः पुष्पैः जापं कुर्याज्जिनाग्रतः ।
पूज्यैः पंचनमस्कारैर्यथावकाशमञ्जसा ॥ ४९३ ॥
अथवा सिद्धचक्राख्यं यंत्रमुद्धार्य तत्त्वतः ।
सत्पचपरमेष्ठ्याख्यं गणभृद्वलयक्रमम् ॥ ४९४ ॥
यंत्रं चिन्तामणिर्नाम सम्यग्शास्त्रोपदेशतः ।
संपूज्यात्र जपं कुर्यात् तत्तन्मंत्रैर्यथाक्रमम् ॥ ४९५ ॥
तद्यंत्रगन्धतो भाले विरचय्य विशेषकम् ।
सिद्धशेषां प्रसंगृह्य न्यसेन्मूर्ध्नि समाहितः ॥ ४९६ ॥
चैत्यभक्त्यादिभिः स्तूयाज्जिनेन्द्रं भक्तिनिर्भरः ।
कृत्कृत्यं स्वमात्मानं मन्यमानोऽद्य जन्मनि ॥४ ९७ ॥

संक्षेपस्नानशास्त्रोक्तविधिना चा[1]भिषि[2]च्य तम् ।
कुर्यादष्टविधां पूजां तोयगन्धाक्षतादिभिः[3] ॥ ४९८ ॥
अन्तर्मुहूर्तमात्रं तु ध्यायेत् स्वस्थेन चेतसा ।
स्वदेहस्थं निजात्मानं चिदानन्दैकलक्षणम्[4] ॥ ४९९ ॥
विधायैवं जिनेशस्य यथावकाशतोऽर्चनम् ।
समुत्थाय पुनः स्तुत्वा जिनचैत्यालयं व्रजेत् ॥ ५०० ॥
कृत्वा पूजां नमस्कृत्य देवदेवं जिनेश्वरम् ।
श्रुतं संपूज्य सद्भक्त्या तोयगन्धाक्षतादिभिः ॥ ५०१ ॥
संपूज्य[6] चरणौ साधोर्नमस्कृत्य यथाविधिम् ।
आर्याणामार्यिकाणां च कृत्वा विनयमंजसा ॥ ५०२ ॥
इच्छाकारवचः कृत्वा मिथः साधर्मिकैः समम् ।
उपविश्य गुरोरन्ते सद्धर्मं[5] शृणुयाद्बुधः ॥ ५०३ ॥
देयं दानं यथाशक्त्या जैनदर्शनवर्तिनाम् ।
कृपादानं च कर्तव्यं दयागुणविवृद्धये ॥ ५०४ ॥
एवं सामायिकं सम्यग्यः करोति गृहाश्रमी ।
दिनैः कतिपयैरेव स स्यान्मुक्तिश्रियः पतिः ॥ ५०५ ॥
मासं प्रति चतुर्ष्वेव पर्वस्वाहारवर्जनम् ।
सकृद्भोजनसेवा वा कांजिकाहारसेवनम् ॥ ५०६ ॥
एवं शक्त्यनुसारेण क्रियते समभावतः ।
स प्रोषधो विधिः प्रोक्तो मुनिभिर्धर्मवत्सलैः ॥ ५०७ ॥

---

१ वा ख. । २ च ख. । ३ श्लोकोऽयं. ४९९ श्लोकादुत्तर। ४ श्लोकोयं ४९८ श्लोकात्पूर्वं ख-पुस्तके । ५ सद्भव्यः ख. । ६ श्लोकोऽयं. ख. पुस्तके नास्ति ।

भुक्त्वा संत्यज्यते वस्तु स भोगः परिकीर्त्यते ।
उपभोगोऽसकृद्वारं भुज्यते च तयोर्मिति[1]ः ॥ ५०८ ॥
संविभागोऽतिथीनां यः किंचिद्विशिष्यते हि सः ।
न विद्यते तिथिर्यस्य सोऽतिथिः पात्रतां गतः ॥ ५०९ ॥
अधिकाराः स्युश्चत्वारः संविभागे:यतीशिनाम् ।
कथ्यमाना भवन्त्येते दाता पात्रं विधिः फलम् ॥ ५१० ॥
दाता शान्तो विशुद्धात्मा मनोवाक्कायकर्मसु ।
दक्षस्त्यागी विनीतश्च प्रभुः षड्गुणभूषितः ॥ ५११ ॥
ज्ञा[2]नं भक्तिः क्षमा तुष्टिः सत्वं च लोभवर्जनम् ।
गुणा दातुः प्रजायन्ते षडेते पुण्यसाधने ॥ ५१२ ॥
पात्रं त्रिविधं प्रोक्तं सत्पात्रं च कुपात्रकम् ।
अपात्रं चेति तन्मध्ये तावत्पात्रं प्रकथ्यते ॥ ५१३ ॥
उत्कृष्टमध्यमक्लिष्टभेदात् पात्रं त्रिधा स्मृतम् ।
तत्रोत्तमं भवेत्पात्रं [3]सर्वसंगोज्झितो यतिः ॥ ५१४ ॥
मध्यमं पात्रमुद्दिष्टं मुनिभिर्देशसंयमी ।
जघन्यं प्रभवेत्पात्रं सम्यग्दृष्टिरसंयतः ॥ ५१५ ॥
रत्नत्रयोज्झितो देही करोति कुत्सितं तपः ।
ज्ञेयं तत्कुत्सितं पात्रं मिथ्याभावसमाश्रयात् ॥ ५१६ ॥
न व्रतं दर्शनं शुद्धं न चास्ति नियतं:मनः ।
यस्य चास्ति क्रिया दुष्टा तदपात्रं बुधैः स्मृतम् ॥ ५१७ ॥

---

१ परिमाणं । २ विज्ञः. ख. । ३ सम्यग्दृष्टिमहामुनिः ख. ।

मुक्त्वात्र कुत्सितं पात्रमपात्रं च विशेषतः ।
पात्रदानविधिस्तत्र[1] प्रकथ्यते यथाक्रमम् ॥ ५१८ ॥
स्थापनमासनं योग्यं चरणक्षालनार्चने ।
नतिस्त्रियोगशुद्धिश्च नवम्याहारशुद्धिता ॥ ५१९ ॥
नवविधं विधिः प्रोक्तः पात्रदाने मुनीश्वरैः ।
तथा षोडशभिर्दोषैरुद्गमाद्यैर्विवर्जितः ॥ ५२० ॥
उद्दिष्टं विक्रयानीतमुद्धारस्वीकृतं तथा ।
परिवर्त्य समानीतं देशान्तरात्समागतम् ॥ ५२१ ॥
अप्रासुकेन सम्मिश्रं भुक्तिभाजनमिश्रता ।
अधिकापाकसंवृद्धिर्मुनिवृन्दे समागते ॥ ५२२ ॥
समीपीकरणं पंक्तौ संयतासंयतात्मनाम् ।
पाकभाजनतोऽन्यत्र निक्षिप्यानयनं तथा ॥ ५२३ ॥
निर्वापितं समुत्क्षिप्य दुग्धमण्डादिकं च यत् ।
नीचजात्यार्पितार्थं च प्रतिहस्तात्समर्पितम् ॥ ५२४ ॥
यक्षादिबलिशेषं च आनीय चोर्ध्वसद्मनि ।
ग्रन्थिमुद्भिद्य यद्दत्तं कालातिक्रमतोऽर्पितम् ॥ ५२५ ॥
राजादीनां भयाद्दत्तमित्येषा दोषसंहतिः ।
वर्जनीया प्रयत्नेन पुण्यसाधनसिद्धये ॥ ५२६ ॥
आहारं भक्तितो दत्तं दात्रा योग्यं यथाविधि ।
स्वीकर्तव्यं विशोध्यैतद्वीतरागयतीशिना ॥ ५२७ ॥
योग्यकालागतं पात्रं मध्यमं वा जघन्यकम् ।
यथावत्प्रतिपत्त्या च दानं तस्मै प्रदीयताम् ॥ ५२८ ॥

१ सूत्रे क. ।

यदि पात्रमलब्धं चेदेवं निन्दां करोत्यसौ ।
वासरोऽयं वृथा यातः पात्रदानं विना मम ॥ ५२९ ॥
इत्येवं पात्रदानं यो विदधाति गृहाश्रमी ।
देवेन्द्राणां नरेद्राणां पदं संप्राप्य सिद्ध्यति ॥ ५३० ॥
अणुव्रतानि पंचैव सप्तशीलगुणैः सह ।
प्रपालयति निःशल्यः भवेद्व्रतिको गृही ॥ ५३१ ॥

व्रतप्रतिमा ।

---

चतुस्त्यावर्तसंयुक्तश्चतुर्नमस्क्रिया सह । ?
द्विनिषद्यो यथाजातो मनोवाक्कायशुद्धिमान् ॥ ५३२ ॥
चैत्यभक्त्यादिभिः स्तूयाज्जिनं सन्ध्यात्रये[1]ऽपि च ।
कालातिक्रमणं मुक्त्वा स स्यात्सामायिकव्रती ॥ ५३३ ॥

सामायिकप्रतिमा ।

---

मासं प्रत्यष्टमीमुख्यचतुष्पर्वदिनेष्वपि ।
चतुरभ्यवहार्याणां विदधाति विसर्जनम् ॥ ५३४ ॥
पूर्वापरदिने चैकाभुक्तिस्तदुत्तमं विदुः ।
मध्यमं तद्विना क्लिष्टं यत्राम्बु सेव्यते क्वचित् ॥ ५३५ ॥
इत्येकमुपवासं यो विदधाति स्वशक्तितः ।
श्रावकेषु भवेत्तुर्यः प्रोषधोऽनशनव्रती ॥ ५३६ ॥

प्रोषधप्रतिमा ।

---

१ सन्ध्यात्रयेष्वपि. ख. ।

फलमूलाम्बुपत्राद्यं नाश्नात्यप्रासुकं सदा ।
सचित्तविरतो गेही[1] दयामूर्तिर्भवत्यसौ ॥ ५३७ ॥

सचित्तप्रतिमा ।

---

मनो[2]वाक्कायसंशुद्ध्या दिवा नो भजतेऽङ्गनाम् ।
भण्यतेऽसौ दिवाब्रह्मचारीति ब्रह्मवेदिभिः ॥ ५३८ ॥

रात्रौ भुक्तिप्रतिमा ।

---

स्त्रीयोनिस्थानसंभूतजीवघातभयादसौ ।
स्त्रियं नो रमते त्रेधा ब्रह्मचारी भवत्यतः ॥ ५३९ ॥

ब्रह्मचर्यप्रतिमा ।

---

य[3]ः सेवाकृषिवाणिज्यव्यापारत्यजनं भजेत् ।
प्रा[4]ण्यभिघातसंत्यागादारम्भविरतो भवेत् ॥ ५४० ॥

आरंभरहितप्रतिमा ।

---

दशधा ग्रन्थमुत्सृज्य निर्ममत्वं भजन्[5] सदा ।
सन्तोषामृतसंतृप्तः स स्यात्परिग्रहोज्झितः ॥ ५४१ ॥

अपरिग्रहप्रतिमा ।

---

ददात्यनुमतिं नैव सर्वेष्वैहिककर्मसु ।
भवत्यनुमतत्यागी देशसंयमिनां वरः ॥ ५४२ ॥

---

१ योगी । २ ततो वाक्का. ख. । ३ यत्. ख. । ४ प्रणाभिघात. ख. ।
५ भजेत्. ख. ।

अनुमतत्यागप्रतिमा ।

---

नोद्दिष्टां सेवते भिक्षामुद्दिष्टविरतो गृही ।
द्वेधैको[1] ग्रन्थसंयुक्तस्त्वन्यः कौपीनधारकः ॥ ५४३ ॥
आद्यो विदधते (ति) क्षौरं प्रावृणोत्येकवाससम् ।
पंचभिक्षासनं भुंक्ते पठते गुरुसन्निधौ ॥ ५४४ ॥
अन्यः कौपीनसंयुक्तः कुरुते केशलुञ्चनम् ।
शौचोपकरणं पिच्छं मुक्त्वान्यग्रन्थवर्जितः ५४५ ॥
मुनीनामनुमार्गेण चर्यायै सुप्रगच्छति[2] ।
उपविश्य चरेद्भिक्षां करपात्रेऽङ्गसंवृतः ॥ ५४६ ॥
नास्ति त्रिकालयोगोऽस्य प्रतिमा चार्कसम्मुखा ।
रहस्यग्रन्थसिद्धान्तश्रवणे नाधिकारिता ॥ ५४७ ॥
वीरचर्या न तस्यास्ति वस्त्रखण्डपरिग्रहात् ।
एवमेकादशो गेही सोत्कृष्टः प्रभवत्यसौ ॥ ५४८ ॥

उद्दिष्टत्यागप्रतिमा ।

---

स्थानेष्वेकादशस्वेवं स्वगुणाः पूर्वसद्गुणैः ।
संयुक्ताः प्रभवन्त्येते श्रावकाणां यथाक्रमम् ॥ ५४९ ॥
आर्त्तरौद्रं भवेद्ध्यानं मन्दभावसमाश्रितम् ।
मुख्यं धर्म्यं न तस्यास्ति गृहव्यापरसंश्रयात् ॥ ५५० ॥
गौणं हि धर्मसद्ध्यानमुत्कृष्टं गृहमेधिनः ।
भद्रध्यानात्मकं धर्म्यं शेषाणां गृहचारिणाम् ॥ ५५१ ॥

---

१ द्वावेको. ख. । २ सोऽवगच्छति ।

जिनेज्यापात्रदानादिस्तत्र कालोचितो विधिः ।
भद्रध्यानं स्मृतं तद्धि गृहधर्माश्रयाद्बुधैः ॥ ५५२ ॥
पूजा दानं गुरूपास्तिः स्वाध्यायः संयमस्तपः ।
आवश्यकानि कर्माणि षडेतानि गृहाश्रमे ॥ ५५३ ॥
नित्या चतुर्मुखाख्या च कल्पद्रुमाभिधानका ।
भवत्याष्टान्हिकी पूजा दिव्यध्वजेति पंचधा ॥ ५५४ ॥ ॥
स्वगेहे चैत्यगेहे वा जिनेन्द्रस्य महामहः ।
निर्माप्यते यथाम्नायं नित्यपूजा भवत्यसौ ॥ ५५५ ॥

नित्या ।

---

नृपैर्मुकुटबद्धाद्यैः सन्मंडपे चतुर्मुखे ।
विधीयते महापूजा स स्याच्चतुर्मुखो महः ॥ ५५६ ॥

चतुर्मुखा ।

---

कल्पद्रुमैरिवाशेषजगदाशा प्रपूर्यते ।
चक्रिभिर्यत्र पूजायां सा स्यात्कल्पद्रुमाभिधा ॥ ५५७ ॥

कल्पद्रुमा ।

---

नन्दीश्वरेषु देवेन्द्रैर्द्वीपे नन्दीश्वरे महः ।
दिनाष्टकं विधीयेत सा पूजाष्टान्हिकी मता ॥ ५५८ ॥

अष्टान्हिकी ।

---

अकृत्रिमेषु चैत्येषु कल्याणेषु च पंचसु ।
सुरैर्विनिर्मिता पूजा भवेत्सेन्द्रध्वजात्मिका ॥ ५५९ ॥

इन्द्रध्वजा ।

---

महोत्सवमिति प्रीत्या प्रपंचयति पंचधा ।
स स्यान्मुक्तिवधूनेत्रप्रेमपात्रं पुमानिह ॥ ५६० ॥

पूजा ।

---

दानमाहारभैषज्यशास्त्राभयविकल्पतः ।
चतुर्धा तत्पृथक् त्रेधा त्रिधापात्रसमाश्रयात् ॥ ५६१ ॥
एषणाशुद्धितो दानं त्रिधा पात्रे प्रदीयते ।
भवत्याहारदानं तत्सर्वदानेषु चोत्तमम् ॥ ५६२ ॥
आहारदानमेकं हि दीयते येन देहिना ।
सर्वाणि तेन दानानि भवन्ति विहितानि वै ॥ ५६३ ॥
नास्ति क्षुधासमो व्याधिर्भेषजं वास्य शान्तये ।
अन्नमेवेति मन्तव्यं तस्मात्तदेव भेषजम् ॥ ५६४ ॥
विनाहारैर्बलं नास्ति जायते नो बलं विना ।
सच्छास्त्राध्ययनं तस्मात्तद्दानं स्यात्तदात्मकम् ॥ ५६५ ॥
अभयं प्राणसंरक्षा बुभुक्षा प्राणहारिणी ।
क्षुन्निवारणमन्नं स्यादन्नमेवाभयं ततः ॥ ५६६ ॥

---

१ सुरेन्द्रैर्निर्मिता. ख. । २ तस्य. ख. ।

अन्नस्याहारदानस्य तृप्तिभोजां शरीरिणाम् ।
रत्नभूस्वर्णदानानि कलां नार्हन्ति षोडशीम् ॥ ५६७ ॥
सद्दृष्टिः पात्रदानेन लभते नाकिनां पदम् ।
ततो नरेन्द्रतां प्राप्य लभते पदमक्षयम् ॥ ५६८ ॥
संसाराब्धौ महाभीमे दुःखकल्लोलसंकुले ।
तारकं पात्रमुत्कृष्टमनायासेन देहिनाम् ॥ ५६९ ॥
सत्पात्रं तारयत्युच्चैः स्वदातारं भवार्णवे ।
यानपात्रं समीचीनं तारयत्यम्बुधौ यथा ॥ ५७० ॥
भद्रमिथ्यादृशो जीवा उत्कृष्टपात्रदानतः ।
उत्पद्य भुंजते भोगानुत्कृष्टभोगभूतले ॥ ५७१ ॥
ते चार्पितप्रदानेन मध्यमाधमपात्रयोः ।
मध्यमाधमभोगेभ्यो लभन्ते जीवितं महत् ॥ ५७२ ॥
मधुवाद्याङ्गदीपाङ्गा वस्त्रभाजनमाल्यदाः ।
ज्योतिर्भूषागृहाङ्गाश्च दशधा कल्पपादपाः ॥ ५७३ ॥
पुण्योपचितमाहारं मनोज्ञं कल्पितं यथा ।
लभन्ते कल्पवृक्षेभ्यस्तत्रत्या देहधारिणः ॥ ५७४ ॥
दानं हि वामदृग्वीक्ष्य कुपात्राय प्रयच्छति ।
उत्पद्यते कुदेवेषु तिर्यक्षु कुनरेष्वपि ॥ ५७५ ॥
मानुषोत्तरबाह्ये ह्यसंख्यद्वीपवार्धिषु ।
तिर्यक्त्वं लभते नूनं देही कुपात्रदानतः ॥ ५७६ ॥
निन्द्यासु भोगभूमीषु पल्यप्रमितजीविनः ।
नग्नाश्च विकृताकारा भवन्ति वामदृष्टयः ॥ ५७७ ॥

---

१ अस्यान्नाहारदानस्य. ख. । २ भाज खः । ३ दानादि कलां नार्हति । ४ सद्दा। ५७२–५७३ श्लोकौ पूर्वापरीभूतौ. ख–पुस्तके । ५ निन्द्याः कुभोगभूमीषु. ख. ।

लवणाब्धेस्तटं त्यक्त्वा शतघ्नीं पंचयोजनीम् ।
दिग्विदिक्षु चतसृषु पृथक्कुभोगभूमयः ॥ ५७८ ॥
एकोरुकाः सभृङ्गाश्च लांगुलिनश्च मूकिनः ।
चतुर्दिक्षु वसन्त्येते पूर्वादिक्रमतो यथा ॥ ५७९ ॥
विदिक्षु शशकर्णाख्याः सन्ति सष्कुलिकार्णिनः ।
कर्णप्रावरणाश्चैव लम्बकर्णाः कुमानुषाः ॥ ५८० ॥
शतानि पंच सार्धानि सन्त्यज्य वारिधेस्तटम् ।
अन्तरस्थदिशास्त्वष्टौ कुत्सिता भोगभूमयः ॥ ५८१ ॥
सिंहाश्च महिषोलूकव्याघ्रशूकरगोमुखाः ।
कपिवक्त्रा भवन्त्यष्टौ दिशानामन्तरे स्थिताः ॥ ५८२ ॥
वेधायाः षट्छतीं त्यक्त्वा द्वौ द्वावुभयोर्दिशोः ।
हिमाद्रिविजयार्धाद्रितारादिशिखर्येद्रिषु ५८३ ॥
हिमवद्विजयार्धस्य पूर्वापरविभागयोः ।
मत्स्यकालमुखा मेघविद्युन्मुखाश्च मानवाः ॥ ५८४ ॥
विजयार्धशिखर्येद्रिपार्श्वयोरुभयोरपि ।
हस्त्यादर्शमुखामेघमण्डलाननसन्निभाः ॥ ५८५ ॥
चतुर्विंशतिसंख्याका भवन्ति मिलिता इमाः ।
तावन्त्यो धातकीखण्डनिकटे लवणार्णवे ॥ ५८६ ॥
एवं स्युद्व्यूनपंचाशल्लवणाब्धितटद्वयोः ।
कालोदजलधौ तद्वद्द्वीपाः षण्णवतिः स्मृताः ॥ ५८७ ॥
एकोरुका गुहावासाः स्वादुमृन्मयभोजनाः ।
शेषास्तरुतलावासाः पत्रपुष्पफलाशिनः ॥ ५८८ ॥

न जातु विद्यते येषां कृतदोषनिकृंतनम् ।
उत्पादोऽत्र भवेत्तेषां कषायवशगात्मनाम् ॥ ५८९ ॥

त्रिकलं[1]——

सूतकाशुचिदुर्भावव्याकुलादिम( त्व )संयुताः[2] ।
पात्रे दानं प्रकुर्वन्ति मूढा वा गर्विताशयाः ॥ ५९० ॥
पंचाग्निना तपोनिष्ठा मौनहीनं च भोजनम् ।
प्रीतिश्चान्यविवादेषु व्यसनेष्वतितीव्रता ॥ ५९१ ॥
दानं च कुत्सिते पात्रे येषां प्रवर्तते सदा ।
तेषां प्रजायते जन्म क्षेत्रेष्वेतेषु निश्चितम् ॥ ५९२ ॥
उत्पद्यन्ते ततो मृत्वा भावनादिसुरत्रये ।
मन्दकषायमद्भावात् स्वभावार्जवभावतः ॥ ५९३ ॥
मिथ्यात्वभावनायोगात्ततश्च्युत्वा भवार्णवे ।
वराकाः सम्पतन्त्येव जन्मनक्रकुलाकुले ॥ ५९४ ॥
अपात्रे विहितं दानं यत्नेनापि चतुर्विधम् ।
व्यर्थीभवति तत्सर्वं भस्मन्याज्याहुतिर्यथा ॥ ५९५ ॥
अब्धौ निमज्जयत्याशु स्वमन्याश्चोदृपन्मयी ।
संसाराब्धावपात्रं तु तादृशं विद्धि सन्मते ! ॥ ५९६ ॥
पात्रे दानं प्रकर्तव्यं ज्ञात्वैवं शुद्धदृष्टिभिः ।
यस्मात्सम्पद्यते सौख्यं दुर्लभं त्रिदशेशिनाम् ॥ ५९७ ॥

दानम् ।

---

१ क-पुस्तके अस्मात् ५८९ श्लोकात्पूर्वं त्रिकलमिति पाठः । ख-पुस्तके ५९० श्लोकात्पूर्वं त्रिकलमिति । २ वक्रतादिमसंयुताः ख-पाठः ।

क्रियते गन्धपुष्पाद्यैर्गुरुपादाब्जपूजनम् ।
पादसंवाहनाद्यं च गुरूपास्तिर्भवत्यसौ ५९८ ॥

गुरूपास्तिः ।

---

चतुर्णामनुयोगानां जिनोक्तानां यथार्थतः ।
अध्यापनमधीतिर्वा स्वाध्यायः कथ्यते हि सः ॥ ५९९ ॥

स्वाध्यायः ।

---

प्राणिनां रक्षणं त्रेधा तथाक्षप्रसराहतिः ।
एकोद्देशमिति प्राहुः संयमं गृहमेधिनाम् ॥ ६०० ॥

संयमम् ।

---

उपवासः सकृद्भुक्तिः सौवीराहारसेवनम् ।
इत्येवमाद्यमुद्दिष्टं साधुभिर्गृहिणां तपः ॥ ६०१ ॥

तपः ।

---

कर्माण्यावश्यकान्याहुः षडेवं गृहचारिणाम् ।
अधःकर्मादिसम्पात[1]दोषविच्छित्तिहेतवे ॥ ६०२ ॥
षट्कर्मभिः किमस्माकं पुण्यसाधनकारणैः ।
पुण्यात्प्रजायते बन्धो बंधात्संसारता यतः ॥ ६०३ ॥
निजात्मानं निरालम्ब[2]ध्यानयोगेन चिंत्यते ।
येनेह बन्धविच्छेदं कृत्वा मुक्तिं प्रगम्यते ॥ ६०४ ॥
ये वदन्ति गृहस्थानामस्ति ध्यानं निराश्रयम् ।
जैनागमं न जानन्ति दुर्धियस्ते स्ववंचकाः ॥ ६०५ ॥

---

१ आधाकर्मादिसंजात. ख. । २ निरालम्बं क. ।

निरालंबं तु यद्ध्यानमप्रमत्तयतीशिनाम् ।
बहिर्व्यापारमुक्तानां निर्ग्रन्थजिनलिंगिनाम् ॥ ६०६ ॥
गृहव्यापारयुक्तस्य मुख्यत्वेनेह दुर्घटम् ।
निर्विकल्पचिदानन्दं निजात्मचिन्तनं परम् ॥ ६०७ ॥
गृहव्यापारयुक्तेन शुद्धात्मा चिन्त्यते यदा ।
प्रस्फुरन्ति तदा सर्वे व्यापारा नित्यभाविताः ॥ ६०८ ॥
अथ चेन्निश्चलं ध्यानं विधातुं यः समीहते ।
ढिंकुलीसन्निभं तद्धि जायते तस्य देहिनः ॥ ६०९ ॥
पुण्यहेतुं परित्यज्य शुद्धध्याने प्रवर्तते ।
तत्र नास्त्यधिकारित्वं ततोऽसावुभयोज्झितः ॥ ६१० ॥
त्यक्तपुण्यस्य जीवस्य पापास्रवो भवेद्ध्रुवम् ।
पापबन्धो भवेत्तस्मात् पापबन्धाच्च दुर्गतिः ॥ ६११ ॥
पुण्यहेतुस्ततो भव्यैः प्रकर्तव्यो मनीषिभिः ।
यस्मात्प्रगम्यते स्वर्गमायुर्बन्धोज्झितैर्जनैः ॥ ६१२ ॥
तत्रानुभूय संत्सौख्यं सर्वाक्षार्थप्रसाधकम् ।
ततश्च्युत्वा कर्मभूमौ नरेन्द्रत्वं प्रपद्यते ॥ ६१३ ॥
लक्षाश्चतुरशीतिः स्युरष्टादश च कोटयः ।
लक्षं चतुःसहस्रोनं गजाश्वान्तःपुराणि च ॥ ६१४ ॥
निधयो नव रत्नानि प्रभवन्ति चतुर्दश ।
षट्खण्डभरतेशित्वं चक्रिणां स्युर्विभूतयः ॥ ६१५ ॥
जरत्तृणमिवाशेषां संत्यज्य राज्यसम्पदम् ।
अत्युत्कृष्टतपोलक्ष्मीमेवं प्राप्नोति शुद्धदृक् ॥ ६१६ ॥

१ ल्पं. ख. । २ तत् ख. । ३ दां. क. । ४ लक्ष्म्या एवं ख. ।

भस्मसात्कुरुते तस्माद्घातिकर्मेन्धनोत्करम् ।
संप्राप्यार्हन्त्यसल्लक्ष्मीं मोक्षलक्ष्मीपतिर्भवेत् ॥ ६१७ ॥
ईदृग्विधं पदं भव्यः सर्वं पुण्यादवाप्यते ।
तस्मात्पुण्यं प्रकर्तव्यं यत्नतो मोक्षकांक्षिणा ॥ ६१८ ॥
एवं संक्षेपतः प्रोक्तं यथोक्तं पूर्वसूरिभिः ।
देशसंयमसम्बन्धिगुणस्थानं हि पंचमम् ॥ ६१९ ॥

इति पंचमं विरताविरतसंज्ञं गुणस्थानम् ।

---

अतो वक्ष्ये गुणस्थानं प्रमत्तसंयताह्वयम् ।
तत्रौपशमिकाद्याः स्युस्त्रयो भावा यथोदिताः ॥ ६२० ॥
कषायाणां चतुर्थानां तीव्रपाके महाव्रती ।
भवेत्प्रमादयुक्तत्वात्प्रमत्तसंयताभिधः ॥ ६२१ ॥
मूलशीलगुणैर्युक्तो यदप्यखिलसंयमी ।
व्यक्ताव्यक्तप्रमादत्वाच्चित्रिताचरणो भवेत् ॥ ६२२ ॥
निद्रा स्नेहो हृषीकाणि कषाया विकथाः क्रमात् ।
एकैकं पंच चत्वारश्चतस्रश्च प्रमादकाः ॥ ६२३ ॥
बाह्यैर्दशविधैर्ग्रन्थैश्चेतनाचेतनात्मकैः ।
तथैवाभ्यन्तरोद्भूतैश्चतुर्दशविधैश्च्युताः ॥ ६२४ ॥
क्षेत्रं गृहं धनं धान्यं सुवर्णं रजतं तथा ।
दास्यो दासाश्च भांडं च कुप्यं बाह्यपरिग्रहाः ॥ ६२५ ॥
ग्रन्था हास्यादयो दोषा वामं वेदाः कषायकाः ।
षडेकत्रिचतुर्भेदैरन्तरङ्गाश्चतुर्दश ॥ ६२६ ॥

त्यक्तग्रन्थेषु बाह्येषु पुनर्मुह्यन्ति दुर्धियः ।
समानास्ते भवन्त्युच्चैरुद्दीर्णाहारभोजिनाम् ॥ ६२७ ॥
हास्यादिषट्सु दोषेषु प्रसक्ता जिनलिंगिनः ।
मूढास्ते पुष्पनाराचैर्विभिद्यन्ते यथेप्सितम् ॥ ६२८ ॥
धृत्वा जैनेश्वरं लिंगं वैपरीत्येन वर्तनम् ।
मिथ्यात्वं तद्भवेत्तेषां दुर्गतौ गमने सखा ॥ ६२९ ॥
घूर्ण्यन्ते विषयव्यालैर्भिद्यन्ते मारमार्गणैः ।
वेदरागवशीभूता दह्यन्ते दुःखवन्हिना ॥ ६३० ॥
न शक्नुवन्ति ये जेतुं कषायराक्षसां गणम् ।
वराकाः कार्मणं मैन्यं न ते जेष्यन्ति जातुचित् ॥ ६३१ ॥
रसे रसायने स्तम्भे शाकिनीग्रहनिग्रहे ।
वश्योच्चाटनविद्वेषे भोगीन्द्रविषविष्णवे ॥ ६३२ ॥
इत्यादिषु[1] प्रवर्तन्ते निष्टृपा ऐहिकाशयाः ।
यतित्वं जीवनोपायं भवेत्तेषां विनिश्चितम् ॥ ६३३ ॥
निःशल्या निरहंकारा निर्मोहा मदविच्युताः ।
पक्षपातारिसंत्यक्ता निष्कषाया जितेन्द्रियाः ॥ ६३४ ॥
अन्तर्बाह्यतपोनिष्ठाश्चारित्रव्रतभाजिनः[2] ।
दशधर्मरताः शान्ता ध्यानाध्ययनतत्पराः ॥ ६३५ ॥
भेदाभेदनयाक्रान्तरत्नत्रयविभूषिताः ।
इत्यादिगुणभूषाढ्या जगद्वन्द्या यतीश्वराः ॥ ६३६ ॥
ध्यायन्ति गौणभावाढ्यं धर्म्यमालम्बनान्वितम् ।
मुख्यं धर्म्यं निरालम्बमप्रमत्तमुनीश्वराः ॥ ६३७ ॥

---

१ ष्वेषु. ख. । २ भाजनाः ख. ।

धर्मध्यानं तु सालम्बं चतुर्भेदैर्निगद्यते ।
आज्ञापायविपाकाख्यसंस्थानविचयात्मभिः ॥ ६३८ ॥
स्वसिद्धान्तोक्तमार्गेण तत्वानां चिन्तनं यथा ।
आज्ञया जिननाथस्य तदाज्ञाविचयं मतम् ॥ ६३९ ॥
अपायश्चिन्त्यते बाढं यः शुभाशुभकर्मणाम् ।
अपायविचयं प्रोक्तं तद्ध्यानं ध्यानवेदिभिः ॥ ६४० ॥
संसारवर्तिजीवानां विपाकः कर्मणामयम् ।
दुर्लक्षश्चिन्त्यते यत्र विपाकविचयं हि तत् ॥ ६४१ ॥
विचित्रं लोकसंस्थानं पदार्थैर्निचितं महत् ।
चिन्त्यते यत्र तद्ध्यानं संस्थानविचयं स्मृतम् ॥ ६४२ ॥
अथवा जिनमुख्यानां पंचानां परमेष्ठिनाम् ।
पृथक् पृथक् तु यद्ध्यानं सालंबं तदपि स्मृतम् ॥ ६४३ ॥
सालम्बध्यानमित्येवं ज्ञात्वा ध्यायन्ति योगिनः ।
कर्मनिर्जरणं तेषां प्रभवत्यविलम्बितम् ॥ ६४४ ॥
अस्तित्वान्नोकषायाणामार्तध्यानं प्रजायते ।
निराकरोति तद्ध्यानं स्वाध्यायभावनाबलात् ॥ ६४५ ॥
यावत्प्रमादसंयुक्तस्तावत्तस्य न तिष्ठति ।
धर्मध्यानं निरालम्बमित्यूचुर्जिनभास्कराः ॥ ६४६ ॥
तस्मादार्[1]येषणाद्यैस्तु पा[2]पदोषान्निकृन्तति ।
वि[3]शुद्ध्यावश्यकैः षड्भिः मुमुक्षुः स्वात्मशुद्धये ॥ ६४७ ॥
समता वन्दना स्तोत्रं प्रत्याख्यानं प्रतिक्रिया ।
व्युत्सर्गश्चेति कर्माणि भवन्त्यावश्यकानि षट् ॥ ६४८ ॥

१ दार्यैः ख. । २ प्राप्त. ख. । ३ त्रिशुद्ध्या. ख. ।

आवश्यकान् परित्यज्य निश्चलं ध्यानमाश्रयेत् ।
नासौ वेत्त्यागमं जैनं मिथ्यादृष्टिर्भवत्यतः ॥ ६४९ ॥
तस्मादावश्यकैः कुर्यात्प्राप्तदोषनिकृन्तनम् ।
यावन्नाप्नोति सद्ध्यानं निरालम्बं सुनिश्चलम् ॥ ६५० ॥
सम्यग्जिनागमं ज्ञात्वा प्रोक्ततद्ध्यानसाधनात् ।
क्षपकश्रेणिमारुह्य मुक्तेः सद्म प्रपद्यते ॥ ६५१ ॥

इति[1] षष्ठं[2] प्रमत्तगुणस्थानम् ।

---

अप्रमत्तगुणस्थानमतो वक्ष्ये समासतः ।
भवन्त्यत्र त्रयो भावाः षट्स्थानोदिता यथा ॥ ६५२ ॥
संज्वलनकषायाणां जाते मन्दोदये सति ।
भवेत् प्रमादहीनत्वादप्रमत्तो महाव्रती ॥ ६५३ ॥
नष्टशेषप्रमादात्मा व्रतशीलगुणान्वितः ।
ज्ञानध्यानपरो मौनी शमनक्षपणोन्मुखः ॥ ६५४ ॥
एकविंशतिभेदात्ममोहस्योपशमाय च ।
क्षपणाय करोत्येष सद्ध्यानसाधनं यमी ॥ ६५५ ॥
मुख्यवृत्त्या भवत्यत्र धर्मध्यानं जिनोदितम् ।
तत्र तावद्भवेद् ध्याता ध्येयं ध्यानं फलं क्रमात् ॥ ६५६ ॥
आहारासननिद्राणां विजयो यस्य जायते ।
पंचानामिन्द्रियाणां च परीषहसहिष्णुता ॥ ६५७ ॥
गिरीन्द्र इव निष्कम्पो गम्भीरस्तोयराशिवत् ।
अशेषशास्त्रविद्धीरो ध्याताऽसौ कथ्यते बुधैः ॥ ६५८ ॥

---

१ इति ख-पुस्तके नास्ति । २ षष्ठं क-पुस्तके नास्ति ।

यथावद्वस्तुनो रूपं ध्येयं स्यात् संयमसतां ( मेशिनां ) ।
एकाग्रचिन्तनं ध्यानं चतुर्भेदविराजितम् ॥ ६५९ ॥
पिण्डस्थं च पदस्थं च रूपस्थं रूपवर्जितम् ।
आद्यत्रयं तु सालम्बमन्त्यमालम्बनोज्झितम् ॥ ६६० ॥
पिण्डो देह इति तंत्र[1] तत्रास्त्यात्मा चिदात्मकः ।
तस्य चिन्तामयं सद्भिः पिण्डस्थं ध्यानमीरितम् ॥ ६६१ ॥
पंचानां सद्गुरूणां यत् पदान्यालंब्य चिन्तनम् ।
पदस्थध्यानमाम्नातं ध्यानाग्निध्वस्तकल्मषैः ॥ ६६२ ॥
आत्मा देहस्थितो यद्वच्चिन्त्यते देहतो बहिः ।
तद् रूपस्थं स्मृतं ध्यानं भव्यराजीव भास्करैः ॥ ६६३ ॥
ध्यानत्रयेऽत्र सालंबे कृताभ्यासः पुनः पुनः ।
रूपातीतं निरालम्बं ध्यातुं प्रक्रमते यतिः ॥ ६६४ ॥
इन्द्रियाणि विलीयन्ते मनो यत्र लयं व्रजेत् ।
ध्यातृध्येयविकल्पे न तद्ध्यानं रूपवर्जितम् ॥ ६६५ ॥
अमूर्तमजमव्यक्तं निर्विकल्पं चिदात्मकम् ।
स्मरेद्यत्रात्मनात्मानं रूपातीतं च तद्विदुः ॥ ६६६ ॥
रूपातीतमिदं ध्यानं ध्यायन् योगी समाहितः ।
चराचरमिदं विश्वं क्षोभयत्यखिलं क्षणात् ॥ ६६७ ॥
सिद्धयोऽप्यणिमाद्याश्च सिद्ध्यन्ति स्वयमेव हि ।
मुक्तिस्त्रीवश्यतां याति योगिनस्तस्य निश्चितम् ॥ ६६८ ॥
इत्येतस्मिन् गुणस्थाने नो सन्त्यावश्यकानि षट् ।
संततध्यानसद्योगाद् बुद्धिः स्वाभाविकी यतः ॥ ६६९ ॥

---

१ 'इतिस्तत्रस्तत्रा' इति क–पुस्तके । ख–पुस्तके तु 'इतिस्तोत्रस्तत्रा' इति पाठः ।–

अप्रमत्तं गुणस्थानं संक्षेपेणेह वर्णितम्।
अतो वक्ष्येऽष्टमं स्थानं श्रेणिद्वयसमाश्रितम्॥ ६७०॥

इति सप्तममप्रमत्तगुणस्थानम्।

---

अतोऽपूर्वादिनामानि गुणस्थानान्युदीरयेत्।
भवत्युपशमश्रेणी येभ्यश्च क्षपकावलिः॥ ६७१॥
तत्रापूर्वगुणस्थानमपूर्वगुणसंभवात्।
भावानामनिवृत्तित्वादनिवृत्तिगुणास्पदम्॥ ६७२॥
अस्तित्वात्सूक्ष्मलोभस्य भवेत्सूक्ष्मकषायकम्।
प्रशान्तरागयुक्तत्वादुपशान्तकषायकम्॥ ६७३॥
तत्रापूर्वगुणस्थाने प्रथमांशे[1] प्रजायते।
बन्धविच्छेदनं सम्यङ्निद्राप्रचलयोर्द्वयोः॥ ६७४॥
आरोहति ततः श्रेणिमादिमामुपशामकः[2]।
सत्यायुष्युपशान्त्याप्तिं प्रापयेद्वृत्तमोहनम्॥ ६७५॥
क्षपकः क्षपयत्युच्चैश्चारित्रमोहपर्वतम्।
आरुह्य क्षपकश्रेणिमुपर्युपरि शुद्धितः॥ ६७६॥
प्रभवत्युपशमश्रेण्यां भावो ह्युपशमात्मकः।
चारित्रं तद्विधं ज्ञेयं वृत्तमोहोपशान्तितः॥ ६७७॥
स्यादुपशमसम्यक्त्वं प्रशमाद् दृष्टिमोहतः।
केषांचित् क्षायिकं प्रोक्तं दृष्टिघ्नकर्मणः क्षयात्॥ ६७८॥
तत्राद्यं शुक्लसद्ध्यानं स ध्यायत्युपशामकः[3]।
पूर्वज्ञः शुद्धिमान् युक्तो ह्याद्यैः संहननैस्त्रिभिः॥ ६७९॥

---

१ प्रथमभागे। २ गः ख.। ३ गः ख.।

तद्ध्यानयोगतो योगी परां शुद्धिं प्रगच्छति ।
प्रापयन्नुपशान्ताख्यं वृत्तमोहं महारिपुम् ॥ ६८० ॥
वृत्तमोहोदयं प्राप्य पुनः प्रच्यवते यतिः ।
अधःकृतमलं तोयं पुनर्म्लानं भवेद्यथा ॥ ६८१ ॥
ऊर्ध्वमेकं च्युतौ वामं सप्तमं यान्ति देहिनः ।
इति त्रयमपूर्वाद्यास्त्रयो[1] यान्त्युपशामकाः ॥ ६८२ ॥
उपशान्तकषायस्य न ह्यस्त्यूर्ध्वगुणाश्रयः ।
ततोऽसौ वामतां याति सप्तमं वा गुणास्पदम् ॥ ६८३ ॥
उपशान्तगुणश्रेण्यां येषां मृत्युः प्रजायते ।
अहमिन्द्रा भवन्त्येते सर्वार्थसिद्धिसद्मनि ॥ ६८४ ॥
चतुर्वारं शमश्रेणिं रोहत्याश्रयते यमम् ।
द्वात्रिंशद्वारमाक्षीणकर्मांशा[2] यान्ति निर्वृतिम् ॥ ६८५ ॥
[3]आसंसारं चतुर्वारमेव स्याच्छमनोवला ? ।
जीवस्यैकभवे वारद्वयं सा यदि जायते ॥ ६८६ ॥

उक्तं चान्यत्र ग्रन्थान्तरे—

चत्तारि वारमुवसमसेढिं समरुहदि खविदकंमंसो ।
वत्तीसं वाराइं संजम गहदि पुणो लहदि णिव्वाणं ॥ १ ॥

[4]इत्युपशमश्रेणिगुणस्थानचतुष्टयम् ।

---

अतो वक्ष्ये समासेन क्षपकश्रेणिलक्षणम् ।
योगी कर्मक्षयं कर्तुं यामारुह्य प्रवर्तते ॥ ६८७ ॥

---

१ गाः ख. । २ श्लोकोऽयं नास्ति ख–पुस्तके । ३ प्राकृतपंचसंग्रहे तु "संजममुवलहिय णिव्वादि" इति पाठः । ४ इति ख–पुस्तके नास्ति ।

आयुर्बन्धविहीनस्य क्षीणकर्मांशदेहिनः ।
असंयतगुणस्थाने नरकायुः क्षयं व्रजेत् ॥ ६८८ ॥
तिर्यगायुः क्षयं याति गुणस्थाने तु पंचमे ।
सप्तमे त्रिदशायुश्च दृष्टिमोहस्य सप्तकम् ॥ ६८९ ॥
एतानि दश कर्माणि क्षयं नीत्वाथ शुद्धधीः ।
धर्मध्याने कृताभ्यासः समारोहति तत्पदम् ॥ ६९० ॥
मुख्यत्वेनेह साधूनां भावो हि क्षायिको मतः ।
सम्यक्त्वं क्षायिकं शुद्धं दृष्टिमोहारिसंक्षयात् ॥ ६९१ ॥
तत्रापूर्वगुणस्थाने शुक्लसद्ध्यानमादिमम् ।
ध्यातुं प्रक्रमते साधुराद्यसंहननान्वितः ॥ ६९२ ॥
ध्यानस्य विघ्नकारीणि त्यक्त्वा स्थानान्यशेषतः ।
विशुद्धानि मनोज्ञानि ध्यानसिद्ध्यर्थमाश्रयेत् ॥ ६९३ ॥

द्विकलं—

निष्प्रकम्पं विधायाथ दृढपर्यंकमासनम् ।
नासाग्रे दत्तसन्नेत्रः किंचिन्निमीलितेक्षणः ॥ ६९४ ॥
विकल्पवागुराजालाद्दूरोत्सारितमानसः ।
संसारच्छेदनोत्साहः स योगी ध्यातुमर्हति ॥ ६९५ ॥
अपानद्वारमार्गेण निःसरन्तं यथेच्छया ।
निरुद्ध्योर्ध्वप्रचाराप्तिं प्रापयत्यनिलं मुनिः ॥ ६९६ ॥
द्वादशाङ्गुलपर्यन्तं समाकृष्य समीरणम् ।
पूरयत्यतियत्नेन पूरकध्यानयोगतः ॥ ६९७ ॥

१ बन्धाभावादयत्नसाध्य एतदायुःक्षयोऽत्र । २ यद्द. ख. ।

कुम्भवत्कुम्भकं योगी श्वसनं नाभिपंकजे ।
कुम्भकध्यानयोगेन सुस्थिरं कुरुते क्षणम् ॥ ६९८ ॥
निःसार्यते ततो यत्नान्नाभिपद्मोदराच्छनैः ।
योगिना योगसामर्थ्याद्रेचकाख्यः प्रभंजनः ॥ ६९९ ॥
इत्येवं गन्धवाहानामाकुंचनविनिर्गमौ ।
संसाध्य निश्चलं धत्ते चित्तमेकाग्रचिन्तने ॥ ७०० ॥
सवितर्कं सवीचारं सपृथक्त्वमुदाहृतम् ।
त्रियोगयोगिनः साधोः शुक्लमाद्यं सुनिर्मलम् ॥ ७०१ ॥
श्रुतं चिंता वितर्कः स्याद्वीचारः संक्रमो मतः ।
पृथक्त्वं स्यादनेकत्वं भवत्येतत्त्रयात्मकम् ॥ ७०२ ॥

तद्यथा—

स्वशुद्धात्मानुभूत्यात्मभावानामवलंबनात्[1] ।
अन्तर्जल्पो वितर्कः स्याद्यस्मिंस्तत्सवितर्कजम्[2] ॥ ७०३ ॥
अर्थादर्थान्तरे शब्दाच्छब्दान्तरे च संक्रमः ।
योगाद्योगान्तरे यत्र सवीचारं तदुच्यते ॥ ७०४ ॥
द्रव्याद् द्रव्यान्तरं याति गुणाद्गुणान्तरं व्रजेत् ।
पर्यायादन्यपर्यायं सपृथक्त्वं भवत्यतः ॥ ७०५ ॥
इति त्रयात्मकं ध्यानं ध्यायन् योगी समाहितः ।
संप्राप्नोति परां शुद्धिं मुक्तिश्रीवनितासखीम् ॥ ७०६ ॥
यद्यपि प्रतिपात्येतच्छुक्लध्यानं प्रजायते ॥
तथाप्यतिविशुद्धत्वादूर्ध्वास्पदं समीहते ॥ ७०७ ॥

---

१ भावश्रुतावलम्बनात् ख. । २ जः क. ।

इत्यष्टमं क्षपकापूर्वकरणगुणस्थानम् ।

अनिवृत्तिगुणस्थानं ततः समधिगच्छति ।
भावं क्षायिकमाश्रित्य सम्यक्त्वं च तथाविधम् ॥ ७०८ ॥
गुणस्थानस्य तस्यैव भागेषु नवसु क्रमात् ।
नश्यन्ति तानि कर्माणि तेनैव ध्यानयोगतः ॥ ७०९ ॥
गतिः श्वाभ्री च तैरश्री तच्चानुपूर्विकाद्वयम् ।
साधारणत्वमुद्योतः सूक्ष्मत्वं विकलत्रयम् ॥ ७१० ॥
एकेन्द्रियत्वमातापस्त्यानगृद्ध्यादिकत्रयम् ।
आद्यांशे स्थावरत्वेन सहितान्येतानि षोडश ॥ ७११ ॥
अष्टौ मध्यकषायाश्च द्वितीयेऽथ तृतीयके ।
षंढत्वं तुर्यके स्त्रीत्वं नोकषाया षट्पंचमे ॥ ७१२ ॥
पुंवेदश्च ततः क्रोधो मानो माया विनश्यति ।
चतुर्ष्वंशेषु शेषेषु यथाक्रमेण निश्चितम् ॥ ७१३ ॥
कर्माण्येतानि षट्त्रिंशत्क्षयं नीत्वा तदन्तिमे ।
समये स्थूललोभस्य सूक्ष्मत्वं प्रापयेन्मुनिः ॥ ७१४ ॥

इति नवमं क्षपकानिवृत्तिगुणस्थानम् ।

आरोहति ततः सूक्ष्मसांपरायगुणास्पदम् ।
सूक्ष्मलोभं निगृह्णाति तत्रामावाद्यशुक्लतः ॥ ७१५ ॥

इति दशमं क्षपकसूक्ष्मकषायगुणस्थानम् ।

भूत्वाथ क्षीणमोहात्मा वीतरागो महाद्युतिः ।
पूर्ववद्भावसंयुक्तो द्वितीयं ध्यानमाश्रयेत् ॥ ७१६ ॥

अपृथक्त्वमवीचारं सवितर्कगुणान्वितम् ।
संध्यायत्येकयोगेन शुक्लध्यानं द्वितीयकम् ॥ ७१७ ॥

तद्यथा—

यद्द्रव्यगुणपर्यायपरावर्तविवर्जितम् ।
चिन्तनं तदवीचारं स्मृतं सद्ध्यानकोविदैः ॥ ७१८ ॥

निजशुद्धात्मनिष्ठत्वाद् भावश्रुतावलम्बनात् ।
चिन्तनं क्रियते यत्र सवितर्कस्तदुच्यते ॥ ७१९ ॥

[1]निजात्मद्रव्यमेकं वा पर्यायमथवा गुणम् ।
निश्चलं चिन्त्यते यत्र तदेकत्वं विदुर्बुधाः ॥ ७२० ॥

इत्येकत्वमवीचारं सवितर्कमुदाहृतम् ।
तस्मिन् समरसीभावं धत्ते स्वात्मानुभूतितः ॥ ७२१ ॥

इत्येतद्ध्यानयोगेन [2]प्रोष्यत्कर्मेन्धनोत्करम् ।
निद्राप्रचलयोर्नाशं करोत्युपान्तिमक्षणे ॥ ७२२ ॥

अन्त्ये दृष्टिचतुष्कं च दशकं ज्ञानविघ्नयोः ।
एवं षोडशकर्माणि क्षयं गच्छत्यशेषतः ॥ ७२३ ॥

एतत्कर्मरिपून् हत्वा क्षीणमोहो मुनीश्वरः ।
उत्पाद्य केवलज्ञानं सयोगी समभूत्तदा ॥ ७२४ ॥

इति द्वादशं क्षीणकषायगुणस्थानम् ।

---

ततस्त्रयोदशे स्थाने देवदेवः सनातनः ।
राजते ध्यानयोगस्य फलादेवाप्तवैभवः ॥ ७२५ ॥

---

१ श्लोकोऽयं ७१८ श्लोकात्पूर्वं ख-पुस्तके । २ प्लुष्यत्कर्मे० ख. ।

भावोऽत्र क्षायिकः शुद्धः सम्यक्त्वं क्षायिकं परम् ।
यथाख्यातं हि चारित्रं निर्ममत्वस्य जायते ॥ ७२६ ॥
यदौदारिकमङ्गं तु सप्तधातुसमन्वितम् ।
अन्यथा तदभूत्तस्मात्परमौदारिकं स्मृतम् ॥ ७२७ ॥
तेजोमूर्तिमयं दिव्यं सहस्रार्कसमप्रभम् ।
विनष्टाङ्गप्रतिच्छायं नष्टकेशादिवर्धनम् ॥ ७२८ ॥
यदार्हन्त्यं पदं प्राप्य देवेशो देवपूजितः ।
जन्ममृत्युजरातङ्कविच्युतः प्रभवत्यसौ ॥ ७२९ ॥
ज्ञानदृष्ट्यावृतेस्त्यागात्केवलज्ञानदर्शने ।
उदयं प्राप्नुतस्तस्य जिनेन्द्रस्यातिनिर्मले ॥ ७३० ॥
अनन्तसुखसम्भूतिर्जाता मोहारिसंक्षयात् ।
विप्लवादन्तरायस्य कर्मणोऽनन्तवीर्यता ॥ ७३१ ॥
चराचरमिदं विश्वं हस्तस्थामलकोपमम् ।
प्रत्यक्षं भासते तस्य केवलज्ञानभास्वतः ॥ ७३२ ॥
विशुद्धं दर्शनं ज्ञानं चारित्रं भेदवर्जितम् ।
प्रव्यक्तं समभूत्तस्य जिनेन्द्रस्यामितद्युतेः ॥ ७३३ ॥
द्विकलं—

प्रातिहार्याष्टकोपेतः सर्वातिशयभूषितः ।
मुनिवृन्दैः समाराध्यो देवदेवार्चितक्रमः ॥ ७३४ ॥
विहरन् सकलां पृथ्वीं भव्यवृन्दान् विबोधयन् ।
कुर्वन् धर्मामृतासारं राजते देवसंसदि ॥ ७३५ ॥
कतिचिद्दिनशेषायुर्निष्ठाप्य योगवैभवम् ।
अन्तर्मुहूर्तशेषायुस्तृतीयं ध्यानमर्हति ॥ ७३६ ॥

---

१ वर्षा ।

षण्मासायुस्थितेरन्ते यस्य स्यात्केवलोद्गमः ।
करोत्यसौ समुद्घातमन्ये कुर्वन्ति वा न वा ॥ ७३७ ॥
यस्यास्त्यघातिनां मध्ये किंचिन्न्यूनायुषः स्थितिः ।
तत्समीकरणावाप्त्यै समुद्घाताय चेष्टते ॥ ७३८ ॥
दण्डाकारं कपाटात्म्यं प्रतरात्म्यं ततो जगत्—
पूरणं कुरुते साक्षाच्चतुर्भिः समयैर्द्रुतं ॥ ७३९ ॥
युगलं—

एवमात्मप्रदेशानां प्रसारणविधानतः ।
आयुःसमानि कर्माणि कृत्वा शेषाणि तत्क्षणे ॥ ७४० ॥
ततो निवर्तते तद्वल्लोकपूरणतः क्रमात् ।
चतुर्भिः समयैरेव निर्विकल्पस्वभावतः ॥ ७४१ ॥
[2]समुद्घातस्य तस्याद्येऽष्टमे वा समये मुनिः ।
औदारिकाङ्गयोगः स्याद्द्विषट्सप्तकेषु तु ॥ ७४२ ॥
मिश्रौदारिकयोगी च तृतीया[3]द्येषु तु त्रिषु ।
समयेष्वेककर्माङ्गधरोऽनाहारकश्च सः ॥ ७४३ ॥
समुद्घातान्निवृत्तोऽथ शुक्लध्यानं तृतीयकम् ।
सूक्ष्मक्रियं प्रपातित्ववर्जितं ध्यायति क्षणं ॥ ७४४ ॥
ध्यातुं विचेष्टते तस्माच्छुक्लध्यानं तृतीयकम् ।
सूक्ष्मक्रियाभिधं शुद्धं प्रतिपातित्ववर्जितम् ॥ ७४५ ॥

---

१ षण्मासायुषि शेषे संवृता ये जिनाः प्रकर्षेण ।
ते यान्ति समुद्घातं शेषा भाज्याः समुद्घाते ॥ १ ॥
२–७४२–४३–४४ एतच्छ्लोकत्रयं. ख–पुस्तके नास्ति ।
३ तृतीयचतुर्थपंचमेषु त्रिषु समयेषु कार्मणकाययोगी ।

आत्मस्पन्दात्मयोगानां क्रिया सूक्ष्माऽनिवर्तिका ।
यस्मिन् प्रजायते साक्षात्सूक्ष्मक्रियानिवर्तकम् ॥ ७४६ ॥
बादरकाययोगेऽस्मिन् स्थितिं कृत्वा स्वभावतः ।
सूक्ष्मीकरोति वाक्चित्तयोगयुग्मं स बादरम् ॥ ७४७ ॥
[1]त्यक्त्वा स्थूलं वपुर्योगं सूक्ष्मवाक्चित्तयोः स्थितिम् ।
कृत्वा नयति सूक्ष्मत्वं काययोगं च बादरम् ॥ ७४८ ॥
स सूक्ष्मे काययोगेऽथ स्थितिं कृत्वा पुनः क्षणम् ।
निग्रहं कुरुते सद्यः सूक्ष्मवाक्चित्तयोगयोः ॥ ७४९ ॥
ततः सूक्ष्मे वपुर्योगे स्थितिं कृत्वा क्षणं हि सः ।
सूक्ष्मक्रियं निजा[2]त्मानं चिद्रूपं चिन्तयेज्जिनः ॥ ७५० ॥
ध्यानध्येयादिसंकल्पैर्विहीनस्यापि योगिनः ।
विकल्पातीतभावेन प्रस्फुरत्यात्मभावना ॥ ७५१ ॥
अन्ते तद्ध्यानसामर्थ्याद्वपुर्योगे स सूक्ष्मके ।
तिष्ठन्नूर्ध्वास्पदं शीघ्रं योगातीतं समाश्रयेत् ॥ ७५२ ॥

इति त्रयोदशं सयोगिगुणस्थानम् ।

---

अथायोगिगुणस्थाने तिष्ठतोऽस्य जिनेशिनः ।
लघुपंचाक्षरोच्चारप्रमितावस्थितिर्भवेत् ॥ ७५३ ॥
तत्रानिवृत्तिशब्दान्तं समुच्छिन्नक्रियात्मकम् ।
चतुर्थं वर्तते ध्यानमयोगिपरमेष्ठिनः ॥ ७५४ ॥
समुच्छिन्नक्रिया यत्र सूक्ष्मयोगात्मिका यतः ।
समुच्छिन्नक्रियं प्रोक्तं तद्द्वारं मुक्तिसद्मनः ॥ ७५५ ॥

---

१ श्लोकोऽयं ख–पुस्तकादुद्धृतः । २ जिनात्मानं ख. ।

देहास्तित्वेऽस्त्ययोगित्वं कथं तद्घटते प्रभोः ।
देहाभावे कथं ध्यानं दुर्घटं घटते कथम् ॥ ७५६ ॥

द्विकलं——

अतिसूक्ष्मशरीरस्य ह्युपान्त्यसमयावधेः ।
कायकार्यस्य सूक्ष्मस्य स्वशक्तिविगतात्मनः ॥ ७५७ ॥
अत्यन्तस्वल्पकालेन भाविप्रक्षयसंस्थितेः[1] ।
अकिंचित्करसामर्थ्यात्तस्मादयोगिता मता ॥ ७५८ ॥
तच्छरीराश्रयाद्ध्यानमस्तीति न विरुद्ध्यते ।
निजशुद्धात्मचिद्रूपनिर्भरानन्दशालिनः ॥ ७५९ ॥
आत्मानमात्मनात्मैव ध्याता ध्यायति तत्वतः ।
उपचारस्तदा[2]न्यो हि व्यवहारनयाश्रयः ॥ ७६० ॥
उपान्त्यसमये तत्र तच्छुद्धात्मप्रचिन्तनात् ।
द्वासप्ततिर्विलीयन्ते कर्माण्येतान्ययोगिनः ॥ ७६१ ॥
देहबन्धनसंघाताः प्रत्येकं पंच पंच च ।
आङ्गोपाङ्गत्रयं चैव षट्कं संस्थानसंज्ञकम् ॥ ७६२ ॥
वर्णाः पंच रसाः पंच षट्कं संहननात्मकम् ।
स्पर्शाष्टकं च गन्धौ द्वौ नीचानादेयदुर्भगम् ॥ ७६३ ॥
तथागुरुलघुत्वाख्यमुपघा[3]तोऽन्यथा[4] ततः ।
निर्मापणमपर्याप्तमुच्छ्वासस्त्वयशस्तथा ॥ ७६४ ॥
विहायगमनद्वन्द्वं शुभस्थैर्यद्वयं पृथक् ।
गतिर्दैव्यानुपूर्वी च प्रत्येकं च स्वरद्वयम् ॥ ७६५ ॥

१ संस्थितं । २ द. ख. । ३ घातता ख. । ४ परघातनामकर्मेत्यर्थः ।

वेद्यमेकतरं चेति कर्मप्रकृतयः स्मृताः।
स्वामिनो विघ्नकारिण्यो मुक्तिकान्तासमागमे ॥ ७६६ ॥
अन्ते ह्येकतरं वेद्यमादेयत्वं च पूर्णता।
त्रसत्वं बादरत्वं च मनुष्यायुश्च सद्यशः ॥ ७६७ ॥
नृगतिश्चानुपूर्वी च सौभाग्यमुच्चगोत्रता।
पंचाक्षं च तथा तीर्थकृन्नामेति त्रयोदश ॥ ७६८ ॥
क्षयं नीत्वाथ लोकान्तं यावत्प्रयाति तत्क्षणे।
ऊर्ध्वगतिस्वभावत्वाद्धर्मद्रव्यसहायतः ॥ ७६९ ॥
इत्येवं लब्धसिद्धत्वपर्यायाः परमेष्ठिनः।
मुक्तिकान्ताघनाश्लेषसुखास्वादनलालसाः ॥ ७७० ॥
गतिसिक्थकमूषाया[1] आकारेणोपलक्षिताः।
किंचित्पूर्वांगतो न्यूनाः सर्वांगेषु घनत्वतः ॥ ७७१ ॥
ऊर्ध्वीभूता वसन्त्येते तनुवातान्तमस्तकाः।
अभावाद्धर्मद्रव्यस्य परतो गतिवर्जिताः ॥ ७७२ ॥
ज्ञातारोऽखिलतत्त्वानां द्रष्टारश्चैकहेलया।
गुणपर्याययुक्तानां त्रैलोक्योदरवर्तिनाम् ॥ ७७३ ॥
विशुद्धा निश्चला नित्याः सम्यक्त्वाद्यष्टभिर्गुणैः।
लोकमूर्ध्नि विराजन्ते सिद्धास्तेभ्यो नमो नमः ॥ ७७४ ॥
चक्रिणामहमिन्द्राणां त्रैकाल्यं यत्सुखं परम्।
तदनन्तगुणं तेषां सिद्धानां समतात्मकम् ॥ ७७५ ॥
यद्ध्येयं यच्च कर्तव्यं यच्च साध्यं सुदुर्लभम्।
चिदानन्दमयज्योतिर्जातास्ते तत्पदं स्वयम् ॥ ७७६ ॥

---

१ गतसिक्थकमूषाय. ख.।

किमत्र बहुनोक्तेन दुःसाध्यं ध्यानसाधनात् ।
नास्ति जगत्त्रये तद्धि तस्माद्ध्यानं प्रशस्यते ॥ ७७७ ॥
ध्यानस्य फलमीदृक्षं सम्यग्ज्ञात्वा मुमुक्षुभिः ।
ध्यानाभ्यासस्ततः श्रेयान् यस्मान्मुक्तिं प्रगम्यते ॥ ७७८ ॥
भूयाद्भव्यजनस्य विश्वमहितः श्रीमूलसंघः श्रिये
यत्राभूद्विनयेन्दुरद्भुतगुणः सच्छीलदुग्धार्णवः ॥
तच्छिष्योऽजनि भद्रमूर्तिरमलस्त्रैलोक्यकीर्तिः शशी ।
येनैकान्तमहातमः प्रमथितं स्याद्वादविद्याकरैः ॥७७९॥
दृष्टिस्वस्तटिनीमहीधरपतिर्ज्ञानाब्धिचन्द्रोदयो
वृत्तश्रीकलिकेलिहेमनलिनं शान्तिक्षमामन्दिरम् ॥
कामं स्वात्मरसप्रसन्नहृदयः संगक्षपाभास्कर-
स्तच्छिष्यः क्षितिमण्डले विजयते लक्ष्मीन्दुनामा मुनिः ॥
श्रीमत्सर्वज्ञपूजाकरणपरिणतस्तत्त्वचिन्तारसालो
लक्ष्मीचन्द्रांह्रिपद्ममधुकरः श्रीवामदेवः सुधीः ।
उत्पत्तिर्यस्य जाता शशिविशदकुले नैगमश्रीविशाले
सोऽयं जीयात्प्रकामं जगति रसलसद्भावशास्त्रप्रणेता ॥७८१॥
यावद्द्वीपाब्धयो मेरुर्यावच्चन्द्रदिवाकरौ ।
तावद्वृद्धिं प्रयात्युच्चैर्विशदं जैनशासनम् ॥ ७८२ ॥

इति चतुर्दशमयोगिगुणस्थानम् ।

---

इति श्रीमद्वामदेवपण्डितविरचितो भावसंग्रहः

समाप्तः ।

---

श्री-श्रुतमुनि-विरचिता

# भाव-त्रिभङ्गी।

## भावसंग्रहापरनामा।

( संदृष्टि-सहिता )

**खविदघणघाइकम्मे अरहंते सुविदिदत्थणिवहे य।**
**सिद्धट्ठगुणे सिद्धे रयणत्तयसाहगे थुवे साहू ॥ १ ॥**

क्षपितघनघातिकर्मणोऽर्हतः सुविदितार्थनिवहांश्च।
सिद्धाष्टगुणान् सिद्धान् रत्नत्रयसाधकान् स्तौमि साधून् ॥

**इदि वंदिय पंचगुरू सरूवसिद्धत्थ भवियबोहत्थं।**
**सुत्तुत्तं मूलुत्तरभावसरूवं पवक्खामि ॥ २ ॥**

इति वन्दित्वा पंचगुरून् स्वरूपसिद्धार्थं भविकबोधार्थं।
सूत्रोक्तं मूलोत्तरभावस्वरूपं प्रवक्ष्यामि ॥

**णाणावरणचउण्हं खओवसमदो हवंति चउणाणा।**
**पणणाणावरणीएखयदो दु हवेइ केवलं णाणं ॥ ३ ॥**

ज्ञानावरणचतुर्णां क्षयोपशमतो भवन्ति चतुर्ज्ञानानि।
पंचज्ञानावरणीयक्षयतस्तु भवति केवलं ज्ञानं ॥

**मिच्छत्तणउदयादो जीवाणं होदि कुमति कुसुदं च।**
**वेभंगो अण्णाणति सण्णाणतियेव णियमेण ॥ ४ ॥**

मिथ्यात्वानोदयाज्जीवानां भवति कुमतिः कुश्रुतं च।
विभंगः अज्ञानत्रिकं सज्ज्ञानत्रिकमेव नियमेन ॥

**दंसणवरणक्खयदो केवलदंसण सुणामभावो हु ।**
**चक्खुद्दंसणपमुहावरणीयखओवसमदो य ॥ ५ ॥**

दर्शनावरणक्षयतः केवलदर्शनं सुनामभावो हि ।
चक्षुर्दर्शनप्रमुखावरणीयक्षयोपशमतश्च ॥

**चक्खुअचक्खूओहीदंसणभावा हवंति णियमेण ।**
**पणविग्घक्खयजादा खाइयदाणादिपणभावा ॥ ६ ॥**

चक्षुरचक्षुरवधिदर्शनभावा भवन्ति नियमेन ।
पंचविघ्नक्षयजाताः क्षायिकदानादिपंचभावाः ॥

**खाओवसमियभावो दाणं लाहं च भोगमुवभोगं ।**
**वीरियमेदे णेया पणविग्घखओवसमजादा ॥ ७ ॥**

क्षायोपशमिकभावो दानं लाभश्च भोग उपभोगः ।
वीर्यमेते ज्ञेया पंचविघ्नक्षयोपशमजाताः ॥

**दंसणमोहंति हवे मिच्छं मिस्सत्त सम्मपयडित्ती ।**
**अणकोहादी एदा णिद्दिट्ठा सत्तपयडीओ ॥ ८ ॥**

दर्शनमोहमिति भवेत् मिथ्यात्वं मिश्रत्वं सम्यक्त्वप्रकृ-
तिरिति । अनक्रोधादय एता निर्दिष्टाः सप्तकृतप्रकृतयः ॥

**सतण्हं उवसमदो उवसमसम्मो खयादु खइयो य ।**
**छक्कुवसमदो सम्मत्तुदयादो वेदगं सम्मं ॥ ९ ॥**

सप्तानामुपशमत उपशमसम्यक्त्वं क्षयात्क्षायिकं च ।
षट्कोपशमतः सम्यक्त्वोदयात् वेदकं सम्यक्त्वं ॥

**चारित्तमोहणीए उवसमदो होदि उवसमं चरणं ।**
**खयदो खइयं चरणं खओवसमदो सरागचारित्तं ॥ १० ॥**

चरित्रमोहनीयस्य उपशमतः भवत्युपशमं चरणं ।
क्षयतः क्षायिकं चरणं क्षयोपशमतः सरागचारित्रं ॥

**आदिमकसायबारसखओवसम संजलणणोकसायाण ।**
**उदयेण (य) जं चरणं सरागचारित्त तं जाण ॥ ११ ॥**

आदिमकषायद्वादशक्षयोपशमेन संज्वलननोकषायाणां ।
उदयेन 'च' यच्चरणं सरागचारित्रं तज्जानीहि ॥

**मज्झिमकसायअडउवसमे हु संजलणणोकसायाणं ।**
**खइउवसमदो होदि हु तं चेव मरागचारित्तं ॥ १२ ॥**

मध्यमकषायाष्टोपशमे हि संज्वलननोकषायाणां ।
क्षयोपशमतो भवति हि तच्चैव सरागचारित्रं ॥

**जीवदि जीविस्सदि जो हि जीविदो बाहिरेहिं पाणेहिं ।**
**अब्भंतरेहिं णियमा सो जीवो तस्स परिणामो ॥ १३ ॥**

जीवति जीविष्यति यो हि जीवितः बाह्यैः प्राणैः ।
अभ्यन्तरैः नियमात् स जीवस्तस्य परिणामः ॥

**रयणत्तयसिद्धीएऽणंतचउट्ठयसरूवगो भविदुं ।**
**जुग्गो जीवो भव्वो तव्विवरीओ अभव्वो दु ॥ १४ ॥**

रत्नत्रयसिद्ध्याऽनन्तचतुष्टयस्वरूपको भवितुं ।
योग्यो जीवो भव्यः तद्विपरीतोऽभव्यस्तु ॥

**जीवाणं मिच्छुदया अणउदयादो अतच्चसद्धाणं ।**
**हवदि हु तं मिच्छत्तं अणंतसंसारकारणं जाणे ॥ १५ ॥**

जीवानां मिथ्यात्वोदयादनोदयतोऽतत्वश्रद्धानं ।
भवति हि तन्मिथ्यात्वं अनंतसंसारकारणं जानीहि ॥

---

१ अनन्तानुबन्ध्युदयात् ।

**अपचक्खाणुदयादो[1] असंजमो पढमचउगुणट्ठाणे ।**
**पच्चक्खाणुदयादो देसजमो होदि देसगुणे ॥ १६ ॥**

अप्रत्याख्यानोदयात् असंयमः प्रथमचतुर्गुणस्थाने ।
प्रत्याख्यानोदयाद्देशयमो भवति देशगुणे ॥

**गदिणामुदयादो(चउ)गदिणामा वेदतिदयउदयादो ।**
**लिंगत्तयभाव(वो)पुण कसायजोगप्पवित्तिदो[2] लेस्सा ॥१७॥**

गतिनामोदयात् गतिनामा वेदत्रिकोदयात् ।
लिंगत्रयभावः पुनः कषाययोगप्रवृत्तितो लेश्याः ॥

**जाव दु केवलणाणस्सुदओ[3] ण हवेदि ताव अण्णाणं ।**
**कम्माण विप्पमुक्को जाव ण ताव दु असिद्धत्तं ॥ १८ ॥**

यावत्तु केवलज्ञानस्योदयो न भवति तावदज्ञानं ।
कर्मणां विप्रमोक्षो यावन्न तावत्तु असिद्धत्वं ॥

**कोहादीणुदयादो जीवाणं होंति चउकसाया हु ।**
**इदि सव्वुत्तरभावुप्पत्तिसरूवं वियाणाहि ॥ १९ ॥**

क्रोधादीनामुदयात् जीवानां भवन्ति चतुष्कषाया हि ।
इति सर्वोत्तरभावोत्पत्तिस्वरूपं विजानीहि ॥

**उवसमसरागचरियं खइया भावा य णव य मणपज्जं ।**
**रयणत्तयसंपत्तेसुत्तममणुवेसु होंति खलु ॥ २० ॥**

उपशमसरागचारित्रं क्षायिका भावाश्च नव च मनःपर्ययः ।
रत्नत्रयसम्प्राप्तेषु मनुष्येषु भवन्ति खलु ॥

---

१ नामैकदेशे नाम प्रवर्तते इति न्यायादप्रत्याख्यानशब्देनाप्रत्याख्यानावरणाख्यः कषायः गृह्यते । २ ' जोगपउत्ती लेस्सा कसायउदयाणुरंजिया होइ ' इत्यागमः । ३ उदयः प्रादुर्भावः ।

इति पीठिका-विचारणं ।

**भावा खइयो उवसम मिस्सो पुण पारिणामिओदइओ ।**
**एदेसं(सिं)भेदा णव दुग अडदस तिण्णि इगिवीसं ॥२१॥**

भावा: क्षायिक औपशमिको मिश्र: पुन: पारिणामिक औदयिक: ।
एतेषां भेदा नव द्वौ अष्टादश त्रय एकविंशति: ॥

**कम्मक्खए हु खइओ भावो कम्मुवसमम्मि उवसमियो ।**
**उदयो जीवस्स गुणो खओवसमिओ हवे भावो ॥ २२ ॥**

कर्मक्षये हि क्षयो भाव: कर्मोपशमे उपशमक: ।
उदयो जीवस्य गुण: क्षयोपशमको भवेत् भाव: ॥

**कारणणिरवेक्खभवो सहावियो पारिणामिओ भावो ।**
**कम्मुदयजकम्मुगुणो ओदयियो होदि भावो हु ॥ २३ ॥**

कारणनिरपेक्षभव: स्वाभाविक: पारिणामिको भाव: ।
कर्मोदयजकर्मगुण: औदयिको भवति भावो हि ॥

**केवलणाणं दंसण सम्मं चरियं च दाण लाहं च ।**
**भोगुवभोगवीरियभेदे णव खाइया भावा ॥ २४ ॥**

केवलज्ञानं दर्शनं सम्यक्त्वं चारित्रं च दानं लाभश्च ।
भोगोपभोगवीर्यं एते नव क्षायिका भावा: ॥

**उवसमसम्मं उवसमचरणं दुण्णेव उवसमा भावा ।**
**चउणाणं तियदंसणमण्णाणतियं च दाणादी ॥ २५ ॥**

उपशमसम्यक्त्वमुपशमचरणं द्वावेव उपशमौ भावौ ।
चतुर्ज्ञानं त्रिदर्शनं अज्ञानत्रिकं च दानादय: ॥

**वेदय सरागचरियं देसजमं विणवमिस्सभावा हु ।**
**जीवत्तं भव्वत्तमभव्वत्तं तिण्णि परिणामो(मा) ॥ २६ ॥**

वेदकं सरागचरितं देशयमं द्विनवमिश्रभावा हि ।
जीवत्वं भव्यत्वमभव्यत्वं त्रयः पारिणामिकाः ॥

**ओदइओ खलु भावो गदिलेस्सकसायलिंगमिच्छत्तं ।**
**अण्णाणमसिद्धत्तं असंजमं चेदि इगिवीसं ॥ २७ ॥**

औदयिकः खलु भावो गतिलेश्याकषायलिंगमिथ्यात्वं ।
अज्ञानमसिद्धत्वं असंयमश्चेति एकविंशतिः ॥

**पंचेव मूलभावा उत्तरभावा हवंति तेवण्णा ।**
**एदे सव्वे भावा जीवसरूवा मुणेयव्वा ॥ २८ ॥**

पंचैव मूलभावा उत्तरभावा भवन्ति त्रिपंचाशत् ।
एते सर्वे भावा जीवस्वरूपा मन्तव्याः ॥

उक्तं च—

**मोक्षं कुर्वन्ति मिश्रौपशमिकक्षायिकाभिधाः ।**
**बन्धमौदयिको भावो निष्क्रियाः पारिणामिकाः ॥ १ ॥**

बन्धमोक्षौ न कुर्वन्ति ( इत्यर्थः ) ।

**मिच्छतिगऽयदचउक्के उवसमचउगम्हि खवगचउगम्हि ।**
**वेसु जिणेसु विसुद्धे णायव्वा मूलभावा हु ॥ २९ ॥**

मिथ्यात्वत्रिकायतचतुष्के उपशमचतुष्के क्षपकचतुष्के ।
द्वयोर्जिनयोः विशुद्धा ज्ञातव्या मूलभावा हि ॥

**खविगुवसमगेण विणा सेसतिभावा हु पंच पंचेव ।**
**उवसमहीणाचउरो मिस्सुवसमहीणतियभावा ॥ ३० ॥**

क्षपकोपशकाभ्यां विना शेषत्रिभावा हि पंच पंचैव ।
उपशमहीनाश्चत्वारः मिश्रोपशमहीनात्रिकभावाः ॥

**खयिगो हु पारिणामियभावो सिद्धे हवंति णियमेण ।**
**इत्तो उत्तरभावो कहियं जाणं गुणट्ठाणे ॥ ३१ ॥**

क्षायिको हि परिणामिकभावः सिद्धे भवतः नियमेन ।
इत उत्तरभावं कथितं जानीहि गुणस्थाने ॥

**अयदादिसु सम्मत्तति-सण्णाणतिगोहिदंसणं देसे ।**
**देसजमो छट्ठादिसु सरागचरियं च मणपज्जो ॥ ३२ ॥**

अयदादिषु सम्यक्त्वत्रिसज्ज्ञानत्रिकावधिदर्शनं देशे ।
देशयमः षष्ठादिषु सरागचारित्रं च मनःपर्ययः ॥

**संते उवसमचरियं खीणे खाइयचरित्त जिण सिद्धे ।**
**खाइयभावा भणिया सेसं जाणेहि गुणठाणे ॥ ३३ ॥**

शान्ते उपशमचरितं क्षीणे क्षायिकचरितं जिने सिद्धे ।
क्षायिकभावा भणिताः शेषं जानीहि गुणस्थाने ॥

**ओदइया चक्खुदुगंऽण्णाणति दाणादिपंच परिणामा[1] ।**
**तिण्णेव सव्व मिलिदा मिच्छे चउतीसभावा हु ॥ ३४ ॥**

औदयिकाः चक्षुर्द्विकं अज्ञानत्रिकं दानादिपंच परिणामाः ।
त्रय एव सर्वे मिलिता मिथ्यात्वे चतुस्त्रिंशद्भावाः स्फुटं ॥

**दुग तिग णभ छ दुग णभ ति णभ विग-त्ति[3] दुग दुण्णि-**
**तेरं च । इगि अडछेदो भावस्सऽजोगिअंतेसु ठाणेसु[2] ॥ ३५ ॥**

द्विक-त्रिक-नभः-षट्-द्विक-नभः-त्रि-नभः-द्वित्रिक-द्विका-द्वौ-
त्रयोदश च । एकः अष्टौ छेदः भावस्यायोग्यन्तेषु स्थानेषु ॥

**मिच्छे मिच्छमभव्वं साणे अण्णाणतिदयमयदम्हि ।**
**किण्हादितिण्णि लेस्सा असंजमसुरणिरयगदिच्छेदो ३६ ॥**

---

१ पारिणामिकाः । २ उक्तसंख्याक्रमेण चतुर्दशसु गुणस्थानेषु भावानां व्युच्छेदो ज्ञातव्य इत्यर्थः । ३ अनिवृत्तिगुणस्थानस्य द्वौ भागौ सवेदोऽवेदश्च तत्र वेदभागान्ते त्रयाणां वेदानां अवेदभागान्ते त्रयाणां क्रोधमानमायाकषायाणां व्युच्छेदः इत्यर्थः ।

मिथ्यात्वे मिथ्यात्वमभव्यत्वं साणेऽज्ञानत्रितयमयते ।
कृष्णादितिस्रो लेश्याः असंयमसुरनरकगतिच्छेदः ॥

**देसगुणे देसजमो तिरियगदी अप्पमत्तगुणठाणे ।**
**तेऊपम्मालेस्सा वेदगसम्मत्तमिदि जाणे ॥ ३७ ॥**

देशगुणे देशयमस्तिर्यग्गतिः अप्रमत्तगुणस्थाने ।
तेजःपद्मलेश्ये वेदकसम्यक्त्वमिति जानीहि ॥

**अणियट्टिदुगदुभागे[1] वेदतियं कोह माण मायं च ।**
**सुहमे सरागचरियं लोहो संते दु उवसमो[2] भावा ॥ ३८ ॥**

अनिवृत्तिद्विकाद्विभागे वेदत्रिकं क्रोधो मानो माया च ।
सूक्ष्मे सरागचारित्रं लोभः शान्ते तु उपशमौ भावौ ॥

**खीणकसाए णाणचउक्कं दंसणतियं च अण्णाणं ।**
**पण दाणादि सजोगे सुक्कलेसे गदो छेदो ॥ ३९ ॥**

क्षीणकषाये ज्ञानचतुष्कं दर्शनत्रिकं चाज्ञानं ।
पंच दानादयः सयोगे शुक्लेश्याया गतः छेदः ॥

**दाणादिचऊ भव्वमसिद्धत्तं मणुयगदि जहक्खादं ।**
**चारित्तमजोगिजिणे वुच्छेदो होंति भावे दो ॥ ४० ॥**

दानादिचतुः भव्यत्वमसिद्धत्वं मनुष्यगतिः यथाख्यातं ।
चारित्रमयोगिजिने व्युच्छेदः भवतः भावौ द्वौ ॥

**केवलणाणं दंसणमणंतविरियं च खइयसम्मं च ।**
**जीवत्तं चेदे पण भावा सिद्धे हवंति फुडं ॥ ४१ ॥**

---

१ क्षपकोपशमकानिवृत्तिकरणद्वयस्य सवेदावेदभागद्वये । २ उपशमसम्यक्त्व-चारित्राख्यौ ।

केवलज्ञानं दर्शनमनन्तवीर्यं च क्षायिकसम्यक्त्वं च ।
जीवत्वं चैते पंच भावा सिद्धे भवन्ति स्फुटं ॥

**चदुतिगदुगछत्तीसं तिसु इगितीसं च अडडपणवीसं ।**
**दुगइगिवीसं वीसं चउद्दस तेरस भावा हु ॥ ४२ ॥**

चतुस्त्रिकद्विकषट्त्रिंशत् त्रिषु एकत्रिंशच्च अष्टाष्टपंचविंशतिः ।
द्विकैकविंशतिः विंशतिः चतुर्दश त्रयोदश भावा हि ॥

**उणइगिवीसं वीसं सत्तरसं तिसु य होंति बावीसं ।**
**पणपणअट्ठावीसं इगदुगतिगणवयतीसतालसमभावा ॥४३॥**

एकान्नैकविंशतिः विंशतिः सप्तदश त्रिषु च भवन्ति द्वाविंशतिः
पंचपंचाष्टाविंशतिः एकद्विकत्रिकनवकत्रिंशच्चत्वारिंशद्भावाः ॥

गुणस्थानत्रिभङ्गी समाप्ता ।

**सुयमुणिविणमियचलणं अणंतसंसारजलहिमुत्तिण्णं ।**
**णमिऊण वड्ढमाणं भावे वोच्छामि वित्थारे ॥ ४४ ॥**

श्रुतमुनिविनतचरणं अनन्तसंसारजलधिमुत्तीर्णं ।
नत्वा वर्धमानं भावान् वक्ष्यामि विस्तारे ॥

**आदिमणिरए भोगजतिरिए मणुवेसु सग्गदेवेसु ।**
**वेदगखाइयसम्मं पज्जत्तापज्जत्तगाणमेव हवे ॥ ४५ ॥**

आदिमनरके भोगजतिरश्चि मनुजेषु स्वर्गदेवेषु ।
वेदकक्षायिकसम्यक्त्वं पर्याप्तापर्याप्तकानामेव भवेत् ॥

**पढमुवसमसम्मत्तं पज्जत्ते होदि चादुगदिगाणं ।**
**विदिउवसमसम्मत्तं णरपज्जत्ते सुरअपज्जत्ते ॥ ४६ ॥**

१ मार्गणायां ।

प्रथमोपशमसम्यक्त्वं पर्याप्ते भवति चातुर्गतिकानां ।
द्वितीयोपशमसम्यक्त्वं नरपर्याप्ते सुरापर्याप्ते ॥

**सक्करपहुदीणरये वणजोइसभवणदेवदेवीणं ।**
**सेसत्थीणं पज्जत्तेसुवसम्मं वेदगं होइ ॥ ४७ ॥**

शर्कराप्रभृतिनरके वाणज्योतिष्कभवनदेवदेवीनां ।
शेषस्त्रीणां पर्याप्तेषु उपशमं वेदकं भवति ॥

**कम्मभूमिजतिरिक्खे वेदगसम्मत्तमुवसमं च हवे ।**
**सव्वेसिं सण्णीणं अपजत्ते णत्थि वेभंगो ॥ ४८ ॥**

कर्मभूमिजतिरश्चि वेदकसम्यक्त्वमुपशमं च भवेत् ।
सर्वेषां संज्ञिनां अपर्याप्ते नास्ति विभंगः ॥

**णिरये इयरगदी सुहलेसतिथीपुंसरागदेसजमं ।**
**मणपज्जवसमचरियं खाइयसम्मूणखाइया ण हवे ॥ ४९ ॥**

नरके इतरगतयः शुभलेश्यात्रयस्त्रीपुंससरागदेशयमं ।
मनःपर्ययशमचारित्रं क्षायिकसम्यक्त्वोनक्षायिका न भवन्ति ॥

**पढमदुगे कावोदा तदिए कावोदनील तुरिय अइनीला ।**
**पंचमणिरये नीला किण्णा य सेसगे किण्हा ॥ ५० ॥**

प्रथमद्विके कापोता तृतीये कापोतनीले तुर्येऽतिनीला ।
पंचमनरके नीला कृष्णा च शेषके कृष्णा ॥

**विदियादिसु छसु पुढविसु एवं णवरि असंजदट्ठाणे ।**
**खाइयसम्मं णत्थि हु सेसं जाणाहि पुव्वं व ॥ ५१ ॥**

द्वितीयादिषु षट्सु पृथिवीषु एवं णवरि असंयतस्थाने ।
क्षायिकसम्यक्त्वं नास्ति हि शेषं जानीहि पूर्ववत् ॥

**सामण्णणारयाणमपुण्णाणं घम्मणारयाणं च ।**
**वेभंगुवसमसम्मं ण हि सेसअपुण्णगे दु पढमगुणं[1] ॥५२॥**

सामान्यनारकाणामपूर्णानां घम्मानारकाणां च ।
वेभंगोपशमसम्यक्त्वं न हि शेषापूर्णके तु प्रथमगुणस्थानं ।

इति नरक-रचना ।

**सासणठिअण्णाणदुगं असंजदठियकिण्हनीललेसदुगं ।**
**मिच्छमभव्वं च तहा मिच्छाइट्ठिम्मि वुच्छेदो ॥ ५३ ॥**

सासादनस्थिताज्ञानद्विकं असंयतस्थितकृष्णनीललेश्याद्विकं ।
मिथ्यात्वमभव्यत्वं च तथा मिथ्यादृष्टौ व्युच्छेदः ॥

**कम्मभूमिजतिरिक्खे अण्णगदीतिदयखाइया भावा ।**
**मणपज्जवसमचरणं सरागचरियं च णेवत्थि ॥ ५४ ॥**

कर्मभूमिजतिरश्चि अन्यगतित्रितयक्षायिका भावाः ।
मनःपर्ययशमचरणं सरागचारित्रं च नैवास्ति ॥

**तेसिमपज्जत्ताणं सण्णाणतिगोहिदंसणं च वेभंगं ।**
**वेदगमुवसमसम्मं देसचरित्तं च णेवत्थि ॥ ५५ ॥**

तेषामपर्याप्तानां सज्ज्ञानत्रिकावधिदर्शनं विभंगः ।
वेदकमुपशमसम्यक्त्वं देशचारित्रं नैवास्ति ॥

---

१ अस्या अग्रेऽयं पाठः । विदियादिसु छसु पुढवीसु अपज्जत्तणेरइयाणं सम-सम्ममिच्छाइट्ठिगुणट्ठाणभावेसु वेभंगमवणीयं । तं जहा—वंसा जोगं २३ । मेघा २४ । अंजणा २३ । अरिट्ठा २४ । मघवीमाघवी जोगं २३ । सव्वत्थ-मिच्छाइट्ठिगुणट्ठाणमेगमेव । २ भोगभूमिजतिर्यङ्निर्वृत्यपर्याप्तस्य सासादनगुणे तत्रस्थमतिश्रुताज्ञानद्वयस्य असंयतस्थितकृष्णनीललेश्याद्विकस्य च व्युच्छेदः । इत्यस्याः पूर्वार्धगाथाया भावः ।

**एवं भोगजतिरिए पुण्णे किण्हतिलेस्सदेसजमं ।**
**थीसंढं ण हि तेसिं खाइयसम्मत्तमत्थित्ति ॥ ५६ ॥**

एवं भोगजतिरश्चि पूर्णे कृष्णत्रिलेश्यादेशसंयमं ।
स्त्रीषण्ढं न हि तेषां क्षायिकसम्यक्त्वमस्तीति ॥

**णिव्वत्तिअपज्जत्ते अवणिय सुहलेस्स किण्हतिहजुत्ता ।**
**वेभंगुवसमसम्मं ण हि अयदे अवरकावोदा ॥ ५७ ॥**

निर्वृत्यपर्याप्ते अपनीय शुभलेश्याः कृष्णत्रिकयुक्ताः ।
विभंगोपशमसम्यक्त्वं न हि अयते अवरकापोता ॥

**लद्धिअपुण्णतिरिक्खे वामगुणट्ठाणभावमज्झम्मि ।**
**थीपुंसिदरगदीतिग सुहतियलेस्सा ण वेभंगो ॥ ५८ ॥**

लब्ध्यपूर्णतिरश्चि वामगुणस्थानभावमध्ये ।
स्त्रीपुंसितरगतित्रिकं शुभत्रिकलेश्या न विभंगः ॥

**भोगजतिरिइत्थीणं अवणिय पुंवेदमित्थिसंजुत्तं ।**
**तासिं वेदगसम्मं उवसमसम्मं च दो चेव ॥ ५९ ॥**

भोगजतिर्यक्स्त्रीणां अपनीय पुंवेदं स्त्रीसंयुक्तं ।
तासां वेदकसम्यक्त्वं उपशमसम्यक्त्वं च द्वे चैव ॥

**तासिमपज्जत्तीणं किण्हातियलेस्स हवंति पुण ।**
**ण सण्णाणतिगं ओही दंसणसम्मत्तजुगलवेभंगं ॥ ६० ॥**

तासामपर्याप्तीनां कृष्णत्रिकलेश्या भवन्ति पुनः ।
न सज्ज्ञानत्रिकं अवधिदर्शनसम्यक्त्वयुगलविभंगं ॥

**मणुवेसिदरगदीतियहीणा भावा हवंति तत्थेव ।**
**णिव्वत्तिअपज्जत्ते मणदेसुवसमणदुगं ण वेभंगं ॥ ६१ ॥**

मनुष्येष्वितरगतित्रिकहीना भावा भवन्ति तत्रैव ।
निर्वृत्यपर्याप्तं मनोदेशोपशमनद्विकं न विभंगं ॥

**साणे थीसंढच्छिदी मिच्छे साणे असंजदपमत्ते ।**
**जोगिगुणे दुगचदुचदुरिगिवीसं णवच्छिदी कमसो ॥ ६२ ॥**

सासादने स्त्रीषंढच्छित्तिः मिथ्यात्वे सासादने असंयतप्रमत्ते ।
योगिगुणे द्विकचतुःचतुरेकविंशतिः नवच्छित्तिः क्रमशः ॥

**लद्धिअपुण्णमणुस्से वामगुणट्ठाणभावमज्झम्हि ।**
**थीपुंसिदरगदीतियसुहतियलेस्सा ण वेभंगो ॥ ६३ ॥**

लब्ध्यपूर्णमनुष्ये वामगुणस्थानभावमध्ये ।
स्त्रीपुंसितरगतित्रिकशुभत्रिकलेश्या न विभंगं ॥

**मणुसुव्व दव्वभावित्थी पुंसंढखाइया भावा ।**
**उवसमसरागचरणं मणपज्जवणाणमवि णत्थि ॥ ६४ ॥**

मनुष्यवद्द्रव्यभावस्त्रीषु पुंषण्ढक्षायिका भावाः ।
उपशमसरागचरणं मनःपर्ययज्ञानमपि नास्ति ॥

**तासिमपज्जत्तीणं वेभंगं णत्थि मिच्छगुणठाणे ।**
**सासादणगुणठाणे पवट्टणं होदि नियमेण ॥ ६५ ॥**

तासामपर्याप्तीनां विभंगं नास्ति मिथ्यात्वगुणस्थाने ।
सासादनगुणस्थाने प्रवर्तनं भवति नियमेन ॥

**उवसमखाइयसम्मं तियपरिणामा खओवसमिएसु ।**
**मणपज्जवदेसजमं सरागचरिया ण सेस हवे ॥ ६६ ॥**

उपशमक्षायिकसम्यक्त्वं त्रिकपरिणामाः क्षायोपशमिकेषु ।
मनःपर्ययदेशयमं सरागचारित्रं न शेषा भवन्ति ॥

**ओदइए थी संढं अण्णगदीतिदयमसुहतियलेस्सं ।**
**अवणिय सेसा हुंति हु भोगजमणुवेसु पुण्णेसु ॥ ६७ ॥**

औदयिके स्त्री षंढं अन्यगतित्रितयमशुभत्रिकलेश्याः ।
अपनीय शेषा भवन्ति हि भोगजमनुष्येषु पूर्णेषु ॥

**तण्णिव्वत्तिअपुण्णे असुहतिलेस्सेव उवसमं सम्मं ।**
**वेभंगं ण हि अयदे जहण्णकावोदलेस्सा हु ॥ ६८ ॥**

तन्निर्वृत्यपूर्णे अशुभत्रिलेश्या एव, उपशमं सम्यक्त्वं ।
विभंगं न हि अयते जघन्यकापोतलेश्या हि ॥

**एवं भोगत्थीणं खाइयसम्मं च पुरिसवेदं च ।**
**ण हि थीवेदं विज्जदि सेसं जाणाहि पुव्वं व ॥ ६९ ॥**

एवं भोगस्त्रीणां क्षायिकसम्यक्त्वं च पुरुषवेदं च ।
न हि, स्त्रीवेदो विद्यते शेषं जानीहि पूर्वमिव ॥

**तदपज्जत्तीसु हवे असुहतिलेस्सा हु मिच्छदुगठाणं ।**
**वेभंगं च ण विज्जदि मणुवगदिणिरूविदा एवं ॥ ७० ॥**

तदपर्याप्तिकासु भवेदशुभत्रिलेश्या हि मिथ्यत्वद्विकस्थानं ।
विभंगं च न विद्यते मनुष्यगतिनिरूपिता एवं ॥

**देवाणं देवगदी सेसं पज्जत्तभोगमणुसं वा ।**
**भवणतिगाणं कप्पित्थीणं ण हि खाइयं सम्मं ॥ ७१ ॥**

देवानां देवगतिः शेषाः पर्याप्तभोगमनुष्यवत् ।
भवनत्रिकाणां कल्पस्त्रीणां न हि क्षायिकं सम्यक्त्वं ॥

**भवणतिसोहम्मदुगे तेउजहण्णं तु मज्झिमं तेऊ ।**
**साणक्कुमारजुगले तेऊवर पम्मअवरं खु ॥ ७२ ॥**

भवनत्रिकसौधर्मद्विके तेजोजघन्यं तु मध्यमं तेजः ।

सनत्कुमारयुगले तेजोवरं पद्मावरं खलु ॥

बह्माछक्के पम्मा सदरदुगे पम्मसुक्कलेस्सा हु ।

आणदतेरे सुक्का सुक्कुक्कसा अणुदिसादीसु ॥ ७३ ॥

ब्रह्मषट्के पद्मा सतारद्विके पद्मशुक्ललेश्ये हि ।

आनतत्रयोदशसु शुक्ला शुक्लोत्कृष्टा अनुदिशादिषु ॥

पुंवेदो देवाणं देवीणं होदि थीवेदं ।

भुवणतिगाण अपुण्णे असुहतिलेस्सेव णियमेण ॥ ७४ ॥

पुंवेदो देवानां देवीनां भवति स्त्रीवेदः ।

भुवनत्रिकानां अपूर्णे अशुभत्रिलेश्या एव नियमेन ॥

कप्पित्थीणमपुण्णे तेऊलेस्साए[1] मज्झिमो होदि ।

उभयत्थ ण वेभंगो मिच्छो सासणगुणो होदि ॥ ७५ ॥

कल्पस्त्रीणामपूर्णे तेजोलेश्यायाः मध्यमो भवति ।

उभयत्र न विभंगं मिथ्यात्वं सासादनगुणो भवति ॥

सोहम्मादिसु उवरिमगेविज्जंतेसु जाव देवाणं ।

णिव्वत्तिअपुण्णाणं ण विभंग पढमविदियतुरियठाणा॥७६॥

सौधर्मादिषु उपरिमग्रैवेयकान्तेषु यावद्देवानां ।

निर्वृत्यपूर्णानां न विभंगं प्रथमद्वितीयतुर्यस्थानानि ॥

अणुदिसु अणुत्तरेसु हि जादा देवा हवंति सद्दिट्ठी ।

तम्हा मिच्छमभव्वं अण्णाणतिगं च ण हि तेसिं ॥ ७७ ॥

अनुदिशेषु अनुत्तरेषु जाता देवा भवन्ति सद्दृष्टयः ।

तस्मान्मिथ्यात्वमभव्यत्वं अज्ञानत्रिकं च न हि तेषां ॥

---

१ अस्य यकारवद् ह्रस्वोच्चारः ।

इति गतिमार्गणा ।

**एयक्खविगतिगक्खे तिरियगदी संढकिण्हतियलेस्सा ।**
**मिच्छकसायासंजममणाणमसिद्धमिदि एदे ॥ ७८ ॥**

एकाक्षद्वित्र्यक्षे तिर्यग्गतिः षंढकृष्णत्रिकलेश्याः ।
मिथ्यात्वकषायासंयमं अज्ञानमसिद्धमित्येते ॥

**दाणादिकुमदिकुसुदं अचक्खुदंसणमभव्वभव्वत्तं ।**
**जीवत्तं चेदेसिं चदुरक्खे चक्खुसंजुत्तं ॥ ७९ ॥**

दानादिकुमतिकुश्रुतं अचक्षुर्दर्शनमभव्यत्वभव्यत्वे ।
जीवत्वं चैतेषां चतुरक्षे चक्षुःसंयुक्तम् ॥

**पंचेंदिएसु तसकाइएसु दु सव्वे हवंति भावा हु ।**
**एयं[1] वा पणकाए ओराले णिरयदेवगदीहीणा ॥ ८० ॥**

पंचेन्द्रियेषु त्रसकायिकेषु तु सर्वे भवन्ति भावा हि ।
एकं वा पंचकाये औदारिके नरकदेवगतिहीनाः ॥

**ओरालं वा मिस्से ण हि वेभंगो सरागदेसजमं ।**
**मणपज्जवसमभावा साणे थीसंढवेदछिदी ॥ ८१ ॥**

औदारिकवत् मिश्रे न हि विभंगं सरागदेशयमं ।
मनःपर्ययशमभावाः साने स्त्रीषंढवेदच्छित्तिः ॥

**मिच्छाइट्ठिट्ठाणे सासणठाणे असंजदट्ठाणे ।**
**दुग चदु पणवीसं पुण सजोगठाणम्मि णवयछिदी ॥ ८२ ॥**

मिथ्यादृष्टिस्थाने सासादनस्थाने असंयतस्थाने ।
द्वौ चत्वारः पंचविंशतिः पुनः सयोगस्थाने नवकच्छित्तिः ॥

**वेगुव्वे णो संति हु मणपज्जुवसमसरागदेसजमं ।**
**खाइयसम्मत्तूणा खाइयभावा य तिरियमणुयगदी ॥ ८३ ॥**

---

1 एकेन्द्रियवत् ।

वैगूर्वे नो सन्ति हि मनःपर्ययशमसरागदेशयमाः ।
क्षायिकसम्यक्त्वोनाः क्षायिकभावाश्च तिर्यग्मनुजगती ॥

**वेगुव्वं वा मिस्से ण विभंगो किण्हदुगछिदी साणे ।**
**संढं णिरियगदिं पुण तम्हा अवणीय संजदे खयऊ ॥ ८४ ॥**

विगूर्ववत् मिश्रे न विभंगं कृष्णाद्विकच्छित्तिः साने ।
षंढं नरकगतिं पुनः तस्मादपनीय असंयते क्षिपतु ॥

**आहारदुगे होंति हु मणुयगदी तह कसायसुहतिलेस्सा ।**
**पुंवेदमसिद्धत्तं अण्णाणं तिण्णि सण्णाणं ॥ ८५ ॥**

आहारद्विके भवन्ति हि मनुष्यगतिः तथा कषायशुभत्रिलेश्याः ।
पुंवेदो सिद्धत्वं अज्ञानं त्रीणि सम्यग्ज्ञानानि ॥

**दाणादियं च दंसणतिदयं वेदगसरागचारित्तं ।**
**खाइयसम्मत्तमभव्व ण परिणामाय भावा हु ॥ ८६ ॥**

दानादिकं च दर्शनात्रिकं वेदकसरागचारित्रम् ।
क्षायिकसम्यक्त्वमभव्यत्वं न पारिणामिके भावा हि ॥

**कम्मइये णो संति हु मणपज्जसरागदेसचारित्तं ।**
**वेभंगुवसमचरणं साणे थीवेदवोच्छेदो ॥ ८७ ॥**

कार्मणे नो सन्ति हि मनःपर्ययसरागदेशचारित्राणि ।
विभंगोपशमचरणे साने स्त्रीवेदव्युच्छेदः ॥

**विदियगुणे णिरयगदी णत्थि दु सा अत्थि अविरदे ठाणे ।**
**दुतिउणतीसं णवयं मिच्छादिसु चउसु वोच्छेदो ॥ ८८ ॥**

द्वितीयगुणे नरकगतिः नास्ति तु सा अस्ति अविरते स्थाने ।
द्वित्र्येकान्नत्रिंशत् नवकं मिथ्यादिषु चतुर्षु व्युछेदः ॥

**मज्झिमचउमणवयणे खाइयदुगहीणखाइया ण हवे।**
**पुण सेसे मणवयणे सव्वे भावा हवंति फुडं ॥ ८९ ॥**

मध्यमचतुर्मनोवचने क्षायिकद्विकहीनक्षायिका न भवन्ति।
पुनः शेषे मनोवचने सर्वे भावा भवन्ति स्फुटं ॥

**पुंवेदे संढित्थीणिरयगदीहीणसेसओदइया।**
**मिस्सा भावा तियपरिणामा खाइयसम्मत्तउवसमं सम्मं ।९०।**

पुंवेदे षंढस्त्रीनरकगतिहीनशेषौदयिकाः। मिश्रा भावाः—
त्रिकपारिणामिकाः क्षायिकसम्यक्त्वमुपशमं सम्यक्त्वं ॥

**इत्थीवेदे वि तहा मणपज्जवपुरिसहीणइत्थिजुदं।**
**संढे वि तहा इत्थीदेवगदीहीणणिरयसंढजुदं ॥ ९१ ॥**

स्त्रीवेदेऽपि तथा मनःपर्ययपुरुषहीनस्त्रीयुक्तं।
षंढेऽपि तथा स्त्रीदेवगतिहीननरकषंढयुक्ताः ॥

**कोहचउक्काणेक्के पगडी इदरा य उवसमं चरणं।**
**खाइयसम्मत्तूणा खाइयभावा य णो संति ॥ ९२ ॥**

क्रोधचतुष्काणां एका प्रकृतिः, इतराश्च उपशमं चरणं।
क्षायिकसम्यक्त्वोनाः क्षायिकभावाश्च नो सन्ति ॥

**एवं माणादितिए सुहुमसरागुत्ति होदि लोहो हु।**
**अण्णाणतिए मिच्छा-इट्ठिस्स य होंति भावा हु ॥ ९३ ॥**

एवं मानादित्रिके सूक्ष्मसराग इति भवति लोभो हि।
अज्ञानत्रिके मिथ्यादृष्टेः च भवन्ति भावा हि ॥

**केवलणाणं दंसण खाइणदाणादिपंचकं च पुणो।**
**कुमइति मिच्छमभव्वं सण्णाणतिगम्मि णो संति ॥ ९४ ॥**

केवलज्ञानं दर्शनं क्षायिकदानादिपंचकं च पुनः ।
कुमतित्रिकं मिथ्यात्वमभव्यत्वं संज्ञानत्रिके नो सन्ति ॥

**मणपज्जे मणुवगदी पुवेदसुहतिलेस्सकोहादी ।**
**अण्णाणमसिद्धत्तं णाणति दंसणति च दाणादी ॥ ९५ ॥**

मनःपर्यये मनुष्यगतिः पुंवेदशुभत्रिलेश्याक्रोधादयः ।
अज्ञानमसिद्धत्वं ज्ञानत्रिकं दर्शनत्रिकं च दानादयः ॥

**वेदगखाइयसम्मं उवसमखाइयसरागचारित्तं ।**
**जीवत्तं भव्वत्तं इदि एदे संति भावा हु ॥ ९६ ॥**

वेदकक्षायिकसम्यक्त्वं उपशमक्षायिकसरागचारित्रं ।
जीवत्वं भव्यत्वमित्येते सन्ति भावा हि ॥

**केवलणाणे खाइयभावा मणुवगदी सुक्कलेस्साइ ।**
**जीवत्तं भव्वत्तमसिद्धत्तं चेदि चउदसा भावा ॥ ९७ ॥**

केवलज्ञाने क्षायिकभावा मनुष्यगतिः शुक्ललेश्या ।
जीवत्वं भव्यत्वमसिद्धत्वं चेति चतुर्दश भावाः ॥

**ओदइया भावा पुण णाणति दंसणतियं च दाणादी ।**
**सम्मत्तति अण्णाणति परिणामति य असंजमे भावा ॥९८॥**

औदयिका भावाः पुनः ज्ञानत्रिकं दर्शनत्रिकं च दानादयः ।
सम्यक्त्वत्रिकं अज्ञानत्रिकं पारिणामिकत्रिकं च असंयमे भावाः॥

**देसजमे सुहलेस्सतिवेदतिणरतिरियगदिकसाया हु ।**
**अण्णाणमसिद्धत्तं णाणतिदंसणतिदेसदाणादी ॥ ९९ ॥**

देशयमे शुभलेश्यात्रिवेदत्रिनरकातिर्यगतिकषाया हि ।
अज्ञानमसिद्धत्वं ज्ञानत्रिकदर्शनत्रिकदेशदानादयः ॥

---

१ 'भावा हु' पाठः पुस्तके । वारद्वयं लिखितेयं गाथा पुस्तके तत्र एकस्मिन् स्थाने हुर्नास्ति ।

**जीवत्तं भव्वत्तं सम्मत्ततियं सामाइयदुगे एवं ।**
**तिरियगदिदेसहीणा मणपज्जवसरागजमसहियं ॥१००॥**

जीवत्वं भव्यत्वं सम्यक्त्वत्रिकं सामायिकद्विके एवं ।
तिर्यग्गतिदेशहीना मनःपर्ययसरागयमसहिताः ॥

**एवं परिहारे मण-पज्जवथीसंढहीणया एवं ।**
**सुहमे मणजुद हीणा वेदतिकोहतिदयतेयदुगा ॥ १०१ ॥**

एवं परिहारे मनःपर्ययस्त्रीषंढहीनका एवं ।
सूक्ष्मे मनोयुक्ता हीना वेदत्रिकक्रोधत्रितयतेजोद्विकाः ॥

**जहखाइए वि एदे सरागजमलोहहीणभावा हु ।**
**उवसमचरणं खाइयभावा य हवंति णियमेण ॥ १०२ ॥**

यथाख्यातेऽपि एते सरागयमलोभहीनभावा हि ।
उपशमचरणं क्षायिकभावाश्च भवन्ति नियमेन ॥

**चक्खुजुगे आलोए खाइयसम्मत्तचरणहीणा दु ।**
**सेसा खाइयभावा णो संति हु ओहिदंसणे एवं ॥ १०३ ।**

चक्षुर्युगे आलोके क्षायिकसम्यक्त्वहीनास्तु ।
शेषाः क्षायिकभावा नो सन्ति हि अवधिदर्शने एवं ॥

**तेसिं मिच्छमभव्वं अण्णाणतियं च णत्थि णियमेण ।**
**केवलदंसण भावा केवलणाणेव णायव्वा ॥ १०४ ॥**

तेषां मिथ्यात्वं अभव्यत्वं अज्ञानत्रिकं च नास्ति नियमेन ।
केवलदर्शने भावा केवलज्ञानवत् ज्ञातव्याः ॥

**किण्हतिये सुहलेस्सति मणपज्जुवसमसरागदेसजमं ।**
**खाइयसम्मत्तूणा खाइयभावा य णो संति ॥ १०५ ॥**

कृष्णात्रिके शुभलेश्यात्रिकमनःपर्ययशमसरागदेशयमाः ।
क्षायिकसम्यक्त्वोनाः क्षायिकभावाश्च नो सन्ति ॥

**ण हि णिरयगदी किण्हति सुक्कं उवसमचरित्त तेउदुगे।**
**खाइयदंसणणाणं चरित्ताणि हु खइयदाणादी ॥ १०६ ॥**

न हि नरगतिः कृष्णत्रिकं शुक्लं उपशमचारित्रं तेजोद्विके।
क्षायिकदर्शनज्ञानं चारित्रं हि क्षायिकदानादयः ॥

**णो संति सुक्कलेस्से णिरयगदी इयरपंचलेस्सा हु।**
**भव्वे सव्वे भावा मिच्छट्ठाणम्हि अभव्वस्स ॥ १०७ ॥**

नो सन्ति शुक्ललेश्यायां नरकगतिः इतरपंचलेश्या हि।
भव्ये सर्वे भावा मिथ्यदृष्टिस्थाने अभव्यस्य ॥.

**मिच्छरुचिम्हि य जी(भा)वा चउतीसा सासणम्हि बत्तीसा।**
**मिस्सम्हि दु तित्तीसा भावा पुव्वत्तपरिणामा ॥ १०८ ॥**

मिथ्यारुचौ च भावा चतुस्त्रिंशत् सासने द्वात्रिंशत्।
मिश्रे तु त्रयस्त्रिंशत् भावाः पूर्वोक्तपरिणामाः ॥

**मिच्छमभव्वं वेदगमण्णाणतियं च खाइया भावा।**
**ण हि उवसमसम्मत्ते सेसा भावा हवंति तहिं ॥ १०९ ॥**

मिथ्यात्वमभव्यं वेदकमज्ञानत्रिकं च क्षायिका भावाः।
न हि उपशमसम्यक्त्वे शेषा भावा भवन्ति तत्र ॥

**उवसमभावूणेदे वेदगभावा हवंति एदेसिं।**
**अवणिय वेदगमुवसमजमखाइयभावसंजुत्ता ॥ ११० ॥**

उपशमभावोना एते वेदकभावा भवन्ति एतेषां।
अपनीय वेदकं उपशमयमक्षायिकभावसंयुक्ताः ॥

**खाइयसम्मत्तेदे भावा सससहम्मि ? केवलं णाणं।**
**दंसण खाइयदाणादिया ण हवंति णियमेण ॥ १११ ॥**

क्षायिकसम्यक्त्वे एते भावाः संज्ञिनि केवलं ज्ञानं।
दर्शनं क्षायिकदानादिका न भवन्ति नियमेन ॥

**तिरियगदि लिंगमसुहतिलेस्सकसायासंजममसिद्धं ।**
**अण्णाणं मिच्छत्तं कुमइदुगं चक्खुदुगं च दाणादी ॥११२॥**

तिर्यग्गतिः लिङ्गं अशुभत्रिकलेश्याकषायासंयमा असिद्धत्वम् ।
अज्ञानं मिथ्यात्वं कुमतिद्विकं चक्षुर्द्विकं च दानादयः ॥

**तियपरिणामा एदे असण्णिजीवस्स संति भावा हु ।**
**आहारेऽखिलभावा मणपज्जवसमसरागदेसजमं ॥ ११३ ॥**

त्रिकपारिणामिका एते असंज्ञिजीवस्य सन्ति भावा हि ।
आहारेऽखिलभावा मनःपर्ययशमसरागदेशयमं ॥

**वेभंगमणाहारे णो संति हु सेसभावगणणा य ।**
**विच्छित्ति गुणट्ठाणा कम्मणकायम्हि वणीदव्वा ॥११४॥**

विभंगमनाहारे नो संति हि शेषभावगणना च ।
विच्छित्तिः गुणस्थानानि कार्मणकाये वर्णितव्यानि ॥

**अरहंतसिद्धसाहूतिदयं जिणधम्मवयणपडिमाओ ।**
**जिणणिलया इदि एदे णव देवा दिंतु मे बोहिं ॥ ११५ ॥**

अर्हत्सिद्धसाधुत्रितयं जिनधर्मवचनप्रतिमाः ।
जिननिलया इत्येते नव देवा ददतु मे बोधिं ॥

**इदि गुणमग्गणठाणे भावा कहिया पबोहसुयमुणिणा ।**
**सोहंतु ते मुणिंदा सुयपरिपुण्णा दु गुणपुण्णा ॥ ११६ ॥**

इति गुणमार्गणास्थाने भावा कथिता प्रवोधश्रुतमुनिना ।
शोधयन्तु तान् मुनीन्द्राः श्रुतपरिपूर्णास्तु गुणपूर्णाः ॥

इति मुनि-श्रीश्रुतमुनि-कृता भावत्रिभंगी*

समाप्ता ।

---

*'भावसंग्रहः समाप्तः' इति पुस्तकान्ते पाठः । प्रारंभे उल्लिखितनामानुसारेण परिवर्तितः ।

# अथ संदृष्टि-रचना।

## गुणस्थान रचना।

| मि. | सा. | मि. | अ. | दे. | प्र. | अ. | अपू. | अ. | अ. | सू. | उप. | क्षी. | स. | अयो. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| २ | ३ | ० | ६ | २ | ० | ३ | ० | ३ | ३ | २ | २ | १३ | १ | ८ |
| ३४ | ३२ | ३३ | ३६ | ३१ | ३१ | ३१ | २८ | ८ | २५ | २२ | २१ | २० | १४ | १३ |
| १९ | २१ | २० | २७ | २२ | २२ | २२ | २५ | २५ | २८ | ३१ | ३२ | ३३ | ३९ | ४० |

### सामान्य नरक-रचना

३३

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | ५ |
| २६ | २४ | २५ | २८ |
| ७ | ९ | ८ | ५ |

### नारकापर्याप्त

३१

| मि. | अ. |
|---|---|
| ६ | ३ |
| २५ | २५ |
| ६ | ६ |

### घम्मा

३१

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | ३ |
| २४ | २२ | २३ | २६ |
| ७ | ९ | ८ | ५ |

### अपर्याप्त।

२९

| मि. | अ. |
|---|---|
| ४ | ३ |
| २३ | २५ |
| ६ | ४ |

### वंशा

३०

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | ३ |
| २४ | २२ | २३ | २५ |
| ६ | ८ | ७ | ५ |

### मेघा

३१

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | ४ |
| २५ | २३ | २४ | २६ |
| ६ | ८ | ७ | ५ |

### अंजना

३०

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | ३ |
| २४ | २२ | २३ | २५ |
| ६ | ८ | ७ | ५ |

**अरिष्टा**

३१

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | ४ |
| २५ | २३ | २४ | २६ |
| ६ | ८ | ७ | ५ |

**मघवी-माघवी**

३०

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | ३ |
| २४ | २२ | २३ | २५ |
| ६ | ८ | ७ | ५ |

**षण्णारकापर्याप्त**

| मि. |
|---|
| ० |
| २३ |
| ० |

**कर्मभूमिजतिर्यग्**

३८

| मि. | सा. | मि. | अ. | दे. |
|---|---|---|---|---|
| २ | ३ | ० | ४ | २ |
| ३१ | २९ | ३० | ३२ | २९ |
| ७ | ९ | ८ | ६ | ९ |

**तदपर्याप्ता**

३०

| मि. | सा. |
|---|---|
| २ | २ |
| ३० | २८ |
| ० | २ |

**भोगभूमिजतिर्यग**

३३

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | ४ |
| २६ | २४ | २५ | २८ |
| ७ | ९ | ८ | ५ |

**तदपर्याप्त**

३१

| मि. | सा. | अ. |
|---|---|---|
| २ | ४ | ३ |
| २५ | २३ | २५ |
| ६ | ८ | ६ |

**ल. अ.**

२५

| मि. |
|---|
| ० |
| २५ |
| ० |

**भोगभूमिजतिरश्ची**

३२

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | २ |
| २६ | २४ | २५ | २७ |
| ६ | ८ | ७ | ५ |

**तदपर्याप्त**

२५

| मि. | सा. |
|---|---|
| २ | २ |
| २५ | २३ |
| ० | २ |

## मनुष्य-रचना

५०

| मि. | सा. | मि. | अ. | दे. | प्र. | अ. | अ. | अ. | अ. | सू. | उ. | क्षी. | स. | अ. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| २ | ३ | ० | ४ | १ | ० | ३ | ० | ३ | ३ | २ | २ | १३ | १ | ८ |
| ३१ | २९ | ३० | ३३ | ३० | ३१ | ३१ | २८ | २८ | २५ | २२ | २१ | २० | १४ | १३ |
| १९ | २१ | २० | १७ | २० | १९ | १९ | २२ | २२ | २५ | २८ | २९ | ३० | ३६ | ३७ |

### निर्वृत्तिमनुष्य

४५

| मि. | सा. | अ. | प्र. | स. |
|---|---|---|---|---|
| २ | ४ | ४ | २१ | ९ |
| ३० | २८ | ३० | २७ | १४ |
| १५ | १७ | १५ | १८ | ३१ |

### मनुष्य-स्त्री

३६

| मि. | सा. | मि. | अ. | दे. |
|---|---|---|---|---|
| २ | ३ | ० | ४ | १ |
| २९ | २६ | २८ | ३० | २७ |
| ७ | ९ | ८ | ६ | ९ |

### म. अपर्याप्तः

२८

| मि. | सा. |
|---|---|
| २ | २ |
| २८ | २६ |
| ० | २ |

### अ. म.

२५

| मि. |
|---|
| ० |
| २५ |
| ० |

### भोगभूमिमनुष्य

३३

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | १ |
| २६ | २४ | २५ | २८ |
| ७ | ९ | ८ | ५ |

### तद्पर्याप्त

३१

| मि. | सा. | अ. |
|---|---|---|
| ३ | ४ | २ |
| २५ | २३ | २५ |
| ६ | ८ | ६ |

### भोगभूमिज-स्त्री

३२

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | १ |
| २६ | २४ | २५ | २७ |
| ६ | ८ | ७ | ५ |

### त. प.

२५

| मि. | सा. |
|---|---|
| २ | ३ |
| २५ | २३ |
| ० | ० |

**सामान्यदेव** ३३

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | २ |
| २६ | २४ | २५ | २८ |
| ७ | ९ | ८ | ५ |

**भवनत्रिकल्पस्त्री** ३०

| मि. | सा. | मि. | अ. |
|---|---|---|---|
| २ | ३ | ० | २ |
| २४ | २२ | २३ | २५ |
| ६ | ८ | ७ | ५ |

**भ. स्त्री. अ.** २५

| मि. | सा. |
|---|---|
| २ | २ |
| २५ | २३ |
| ० | २ |

**क. स्त्री. अ.** २३

